ॐ.
१

ॐ श्रीगणेशाय नमः ॐ नमः स्वप्रकाशाय समसिद्धसुखसिद्धये विशुद्धाय विवर्जितानां निदानाय विदात्मने १ जयति यथाजा
तानां वाग्जातपारिजातश्रीः श्रीलक्ष्मीधरविबुधावतंसवरणाम्बुरेणुकरः २ अनतिश्रमयोगिनोपि भावं गहनं श्रयगतं बुभ
त्समानाः हृदि विश्रान्तदीधितिप्रवेशाभ्यविविक्षुश्वरनिर्मितं रसज्ञाः ३ विवेविनायेदर्पिरहस्यपारगे गिरो समर्पणेऽपरिशिशिरोमणे
रमः तथापि मे विषदतया विहितावतो गता धृता गणेन समस्य गतेर्गिरां ४ विघ्ननिहतये कृतं मङ्गलं शिष्यशिक्षायै निबध्ना
ति ॐमिति चतुर्थ्यन्तमेतद्ग्रन्थं परमात्मने स्वस्य नेनाभेदेनान्वेति आत्मपदमात्मत्वजातिमत्सरं मरमतं सर्वविषयकज्ञाना
दिमतः पदार्थज्ञानादिमत्परमेव तत्र परमं पदं सर्वविषयकार्थकं प्रकदेशज्ञानेन तदन्वयः सर्वभूतेति बहुव्रीहिः रणावस्था
ऽस्थाः शरीरेवालभ्यते विष्टम्भः पतनप्रतिबन्धकसंयोगः कायायोजनं षष्ट्यादेरित्यत्र धृतेरीश्वरसाधकत्वे दृष्टान्तो वा यथेष्टकात
तथा च श्रुतिः एतस्य वा अक्षरस्य प्रशासने गार्गि द्यावापृथिवी विधृते तिष्ठतः इति द्वितीये विष्टम्भस्य लिङ्गारम्भकपरमाणुत
कारेपि बोध्यः विष्टम्भानन्तरमपि पाकस्थितिसन्नाशकाश्यतयोपपत्तिः अत्र दृष्टात्यन्तिकत्रानेदोऽडःखध्वंसोपस्मात्मोऽखंडानंदा
वाधीयस्य आत्यन्तिकदुःखनिवृत्तिजनकज्ञानविषयायेत्यर्थः पूर्णो यस्य हलित्यप्रकारकेष्टविशेष्यकेश्वारहितायेत्यर्थ :
प्रतियोगिप्रसिद्धिरसमदादौ प्रतिज्ञायावैकल्पमाशंक्योद्धरति सर्वेति सर्वो गर्वे यो प्रत्यक्षानमानखंडरूपो तयोरेक
वाक्यतापकप्रयोजनकतम् तस्याः प्रतिपत्तये ज्ञानाय समन्वयेनमोदाय योगिनेनत प्रमेकमिति सूचनाय ग्रन्थस्या १

प्रत्यक्षनिरूपणेन कृतकृत्यतां मत्वाऽनुमानज्ञाने प्रवृत्तिर्न स्यात् संगतिप्रदर्शनविशिष्टप्रतिज्ञाया फलद्वयसत्त्वात्प्रत्य
क्षयेवकारः विशेषणस्यैकवाक्यताप्रतिपत्तिर्विशेष्यस्य शिष्यावधाने फलमिति विवेकः द्वितीयप्रत्यक्षपदधारणप्र
मवारणाय प्रत्यक्षविशेषाकारसहितस्य निर्देशः अत्रेति प्रत्यक्षोपजीवकत्वादिति ग्रन्थप्रतिपाद्यउपजीवकभावश्चमर्थः
अनुमानस्य प्रत्यक्षोपजीवकत्वेऽप्युक्ते प्रत्यक्षस्यानुमानोपजीव्यत्वस्यार्थतो लाभात् फलतः प्रमाणफलयोः साक्षात्कारानु
मित्योः स्वरूपतश्चेद्विधानुमानाख्यप्रमाणयोः तथात्वानुमितिसाक्षात्कारयोरनुमानप्रत्यक्षयोश्चेत्यर्थः नन्वनुमितिरुपजीव
कत्वे साक्षात्कारस्यायीमाशंकते प्रत्यक्षफलस्येति अनुमितेरनुव्यवसायो मानससाक्षात्कारः वह्निमनुमिनोमीत्यादिः तत्र
विषयतयाऽनुमितेर्हेतुत्वादित्यर्थः आदिपदमनुमित्यात्मकविशेषणज्ञानजन्यविशिष्टसाक्षात्कारपरं तत्र विशेषण
ज्ञानविधयाऽनुमितेर्हेतुत्वात् सर्वा साक्षात्कारत्वावच्छिन्नतया नोपजीविका साक्षात्कारत्वसामानाधिकरण्यमात्रेण
नुमित्युजीवकत्वमस्त्वेऽपि साक्षात्कारत्वावच्छेदेन तथा घटादिसाक्षात्कारे व्यभिचारादित्यर्थः अनुमितित्वावच्छेदेन साक्षात्
कारोपजीवकत्वे घटयति अनुमितयस्त्विति साक्षादिति पर्वतो वह्निमानित्यादौ व्याप्त्यादिप्रत्यक्षजन्यत्वात् परंपर
येति शाब्दात्मकपरामर्शजन्यानुमितेरपि परंपरया प्रत्यक्षप्रयोज्यत्वादित्यर्थः ननु मूलकृतोपजीवकत्वमात्रमुक्तं न तु फ
लत्वावच्छेदकावच्छिन्ने तत्र यत्किंचित्साक्षात्कारस्यानुमित्युपजीवकत्वेऽपि निर्वहतीत्यत आह पुरस्कृतस्येति फलत्वावच्छेद

कावच्छिन्नमेवोपजीवकत्वं तेन न विवादितमित्यर्थः परंपरयानुमित्युपजीवकत्वं साक्षात्कारत्वावच्छेदेनाप्यस्तीत्याशंकते यद्य
ओं. पीति प्रत्यक्षजननीमत्यक्षप्रयोजिकां न देवाह समयेति समयो दीपादियदशक्तिः दीपपदं दीपे शक्तं प्रमितिहेतुत्वं तदेहेतुत्वा
२ त्तत्र प्रयुज्यमानत्वादिस्तु प्रमितिरिति भावः व्याकरणादिना शक्तिग्रहस्थलेप्याह मदिति मत्कर्तृकत्वमेतामत्कर्तृत्वमाध्यत्वे आदि
७ नामदिष्टसाधनत्वे परिच्छेदिकां न द्विषयिका अनुमितिमुपजीवतीत्येवेत्यर्थः इंद्रियमत्यक्षजन्यत्व प्रत्यक्षे क्रिया
जन्ये कृत्याग्रहणेतिजन्यप्रवृत्तिमत्कृतिसाध्यत्वमदिष्टसाधनत्वज्ञानजन्या तत्र चानुमित्यात्मकत्वमेव दीपदाने मत्कृतिजन्य
मत्कृतिं विना प्रसत्वे मत्प्रियसत्वात् मदिष्टसाधने तथा च न वेदबोधितत्वात् ननु तथापि साक्षात्कारत्वावच्छेदेनानुमित्यु
पजीवकत्वं नायातमेव ईश्वरीयसाक्षात्कारे व्यभिचारादित्याशंक्याह ईश्वरेति प्रमाणफलविभाजकोपाध्यवच्छेदेनोपजी
वकत्वमिह विवादितं सर्वोपाधिजन्यसाक्षात्कारत्वरूप ईश्वरज्ञानव्यावृत्त एव जन्यसाक्षात्कारत्वावच्छेदेनानुमित्युपजी
वकत्वमस्त्येवेत्यादेयार्थः यद्यपि दीपदस्वदत्तगौतमादिवचनाव्रादत्वपत्वावच्छेदेन न साक्षात्कारत्वावच्छेदेन तथापि
त्वगिंद्रियादिजनकादृष्टोपयुक्तानुमितित्वत्रवोध्या शरीरे हत्वदृष्टजनकानुमितिवौध्येय तथापीति दृष्टद्वारकत्वेन
दृष्टाद्वारकत्वे तेनाकानुमितेर्दृष्टप्रहमादिद्वारकत्वेपि न क्षतिः अनुमितित्वावच्छेदेन न अदृष्टाद्वारकमेवोपजीवकत्वे
वह्निव्याप्यादिपक्षत्वमदृष्टं जनयित्वानुमितिं जनयतीत्यर्थः न न फलत्वावच्छेदकावच्छेदेनेति वाच्यं अदृष्टाद्वारकत्वेमति २

सद्धारकोपजीवकत्वस्यैव सम्पन्नत्वात् अनुमित्यनुव्यवसाये सद्धारकोपजीवकत्वाभावादेव व्यभिचारविरहादित्यत आह उत
रस्येति उक्तरूपस्येत्यर्थः अविनिगम्यत्वात् व्यभिचारित्वात् द्वितीये अनुमित्यनुव्यवसाये प्रथमानुव्यवसायसद्धारकस्यानु
मित्युपजीवकत्वस्य सत्वात् स्वरूपत उपजीवकत्वे घटयति सर्वे चेति व्याप्तिज्ञानरूपस्यानुमितिकरणस्य सद्धारस्य परंपरया
चेन्द्रियानुपजीवकत्वात्कथमनुमितिकरणत्वावच्छेदेनेन्द्रियोपजीवकत्वमित्यत आह अनुमितिमिति तत्करणेतितत्पदम
नुमितिपरे प्रत्यासत्तिर्व्यापारसामानाधिकरण्ये तदभावेनेत्यर्थः अतथात्वादनुमितिं प्रत्यकरणत्वात् व्याप्तिज्ञानपरामर्श
योः समवायघटितसामानाधिकरण्येन कार्यकारणभावादस्मदादिपरामर्शेनेश्वरीयव्याप्तिज्ञानव्यापारत्वं इति भावः व्याप्ति
ज्ञानानुमित्योः उक्तसामानाधिकरण्येनेहेतुहेतुमद्भावइत्यत्र भवत्फले सामानाधिकरण्यात्मकप्रत्यासत्ति-- नेहणेम
र्थः इदानीमिन्द्रियत्वावच्छेदेनानुमानोपजीवकत्वमेव नास्तीत्याह सर्वेषुनरितिमनःश्रवणयोरिति तथा च प्रत्यक्षसद्धारके म
प्युपजीवकत्वे इन्द्रियत्वावच्छेदेन नास्तीत्यर्थः एवं च फलयोरुपजीव्योपजीवकभावे सद्धारकत्वाविशेषेण व्यभिचारनिरासः
स्वरूपत उपजीव्योपजीवकभावेन तद्विनापि इत्यर्थः न च तथाप्यनुमितिकरणत्वावच्छेदेन प्रत्यक्षोपजीवकत्वेनास्ति मनसोप्य
नुमितिकरणतया तत्र व्यभिचारादित्यत आह स्पष्टारेति तथा च प्रत्यक्षत्वसामानाधिकरण्यमनसोप्यसद्धारकमनुमा
नोपजीवकत्वेनेति दर्शयति नैवेति उत्पत्तिमदपिवद्वारादिवत्

ग्रों. ३

यद्रूपमित्यर्थः उक्तनियमेपिव्यभिचारंदर्शयति अथेति उपजीव्यंप्रयोजकं उपजीवकंप्रयोज्यमुक्तंविदिति अत्रैवानुमि·
तिनिरूपणानन्तरमनुमाननिरूपणात् पूर्वमपिसाक्षात्कारेनिरूप्यइन्द्रियनिरूपणादित्यर्थः परिहरति किंचानन्तरेति नहिय
न्निरूपणसंगतिमननंतदनेनतरनिरूप्यमितिनियमोयेनायंव्यभिचारःस्यात् किंतुयदनन्तरंनिरूप्यतेतत्संगतिमदिति
तत्रवोक्तव्यभिचारोव्यापकव्यभिचारत्वात्रदोषइतिसमुदायार्थः तदेवदर्शयितुंलक्षणमाह प्रानंतर्येति प्रानंतर्येणा·
भिधाने प्रानंतर्याभिधानेतत्प्रयोजकायाजिज्ञासायाजनकंयज्ज्ञानंतद्विषयोर्थः संगतिरित्यन्वयः भवतिचप्रत्यक्षकार
णानेनज्ञातेतत्कार्यत्वेनरूपेणप्रत्यक्षकार्यस्मृतिः एकसंबंधिज्ञानस्यापरसंबंधिस्मारकत्वात् ततःप्रत्यक्षकार्यज्ञानने
नरूपेणप्रत्यक्षकार्यज्ञानस्यज्ञाने ततःप्रत्यक्षकार्यज्ञानमदिष्टसाधनमितिज्ञानेततःप्रत्यक्षकार्यज्ञानेममभवतिति
शिष्येच्छारूपाजिज्ञासाभवतीतिवक्ष्यमाणग्रंथस्यारंभस्यात् किमस्यकार्यमित्यादिजिज्ञासायाअगुरावनुमतेः ततः
प्रश्नः तदभावेपिगुरोरस्यलिंगकेशिष्यजिज्ञासानुमाने ततःप्रत्यक्षकार्ये बोधकवाक्ये परकीयप्रत्यक्षकार्यज्ञान
रूपेष्टसाधनेमितिज्ञानाङ्कुरोत्साहदशवाक्येच्छातदाकारूपेष्टसाधनत्वकृतिसाध्यत्वबोधात्केष्टाभिधानादौचिकीर्षा तत
स्तत्रप्रवृत्तिः ततः कंठक्रियादिक्रमेणकेष्टाभिधानादौचिकीर्षाततोवर्णादिक्रमेणप्रत्यक्षकार्यबोधकवाक्योत्पत्तिः तत्र
बोधकपरंपरयाप्रत्यक्षकार्यज्ञानेभवतितिजिज्ञासाप्रयोजिकातज्जनकंचज्ञानेप्रत्यक्षकार्यज्ञानेमदिष्टसाधनमितिज्ञा ३

ने तद्विषयोर्थः प्रसक्तकार्यत्वे तदनुमानेऽसंगतिरिति लक्षणसमन्वयः घटादिजिज्ञासाजनकस्य घटज्ञानमिष्टसा
धनमित्यादिज्ञानस्य विषये घटत्वादावतिव्याप्तिवारणाय प्रयोजकान्ते तदर्थं यदभिधानोत्तरं यदभिधानप्रयोजके
जिज्ञासाजनकज्ञानविषयो योर्थः स तस्य तत्रासंगतिः व्याप्तिनिरूपणानन्तरं किमस्मदनुमितिप्रयोजकमिति जिज्ञा
सया निरूपिते पक्षधर्मत्वेऽनुमितिलक्षणोककार्यत्वे ग्रहत्वादेरपि संगतिर्माभूदिति तदुपादाने ज्ञानेतयो
भिधानप्रयोजकज्ञानविषयत्वमात्रोक्तौ प्रसक्तकार्यज्ञानमिष्टसाधनमित्यनुमिति जनकज्ञानविषये तदन्वयव्यतिरे
कानुविधायित्वादिना तादात्म्येन हेतावतिव्याप्तिः एतेन तादृशाभिधानप्रयोजकजनकज्ञानविषयत्वमप्यपास्तम् उक्तेष्ट
साधनत्वज्ञानस्याप्यानन्तर्याभिधानप्रयोजकत्वेन तज्जनकज्ञानविषयत्वात् एतेन तादृशाभिधानप्रयोजकजिज्ञासाप्रयो
जकज्ञानविषयत्वमपास्तं उक्तेष्टसाधनत्वज्ञानस्यापीष्टसाधनत्वज्ञानव्यवधानेन तादृशजिज्ञासाप्रयोजकत्वात् तादृशाभिधा
नप्रयोजकेच्छाजनकज्ञानविषयत्वे प्रसक्तकार्यबोधकवाक्येच्छाजनकस्य तादृशवाक्यमिष्टसाधनमिति ज्ञानस्य विषये
वाक्येऽतिव्याप्तिः तादृशेष्टसाधनत्वज्ञानस्यापि आनन्तर्याभिधानप्रयोजकवाक्येच्छाजनकत्वात् तादृशाभिधानप्रयोजक
जिज्ञासाजनकविषयत्वमात्रोक्तौ फलेच्छायास्तादृशजिज्ञासाजनकत्वात्तद्विषये फलेऽतिव्याप्तिरिति ज्ञानेत्युक्तं नन्वेव
मिष्टमप्यतिव्याप्तं प्रसक्तकार्यज्ञानमिष्टसाधनमिति ज्ञानेन तयोरभिधानप्रयोजकजिज्ञासाजनके ज्ञाने तद्विषयस्य प्रस

उ॰ ४

देप्रसक्तत्वं कार्यं उद्देश्यसाधनत्वं चेति चेत् मैवम् ज्ञाने विशेष्यतानिरूपिताया विषयतासंबंधावच्छिन्नप्रकारतातदवच्छेदक
त्वघर्याभिरूपविषयत्वस्याविवक्षितत्वात् तस्य च विशिष्टे प्रसक्तकार्यत्वेनैव विश्रामात् प्रकृते योजयति ज्ञायते चेति ज्ञाने
इति कारणज्ञानेमिति कार्यत्वेन ज्ञाततइत्यर्थः एवं च कारणतामपि संगतित्वेन उद्देश्यसहकारिणा वानेतयोरभिधानमिति
भावः सप्रसंगउपोद्घातो हेतुतावसरस्तथा निर्वाहकैककार्यत्वे षोढासंगतिरिष्यते इति प्राञ्चः स्मृतस्य सतउपेक्षानर्हत्वं
प्रसंगः उपोद्घातः स्मृतिप्रकारो धर्मइति तदर्थः उपोद्घातत्वं वानेनराभिधानप्रयोजकत्वं कार्यत्वापन्नत्वे सतीति विशेषणा
एनेनत्रनातिव्याप्तिः चिन्ताप्रकृतसिद्ध्यर्थामुपोद्घातं विदुर्बुधाः प्रकृतसिद्धेरनुकूलचिन्ताविषयत्वं तदर्थः अनुकूलत्वं चकावि
त्वप्रकृतत्वघटकतयाप्यात्मतिलक्षणेव्याप्तेः तज्ज्ञानेविनाव्याप्तिघटितलक्षणस्यदुर्वचत्वात् कश्चित्तदुपस्थापकत्वेन य
थासामान्यलक्षणायाः पक्षधर्मनिष्ठव्याप्तेः स्वयोपस्थितौ लक्षणबोधात् हेतुता कार्यकारणभावः यथा प्रत्य
क्षानुमानादेः प्रतिबंधकजिज्ञासानिवृत्तौ सत्यामवश्यवक्तव्यत्वमवसरः निवृत्ते प्रतिबंधकाभावकथनमात्रम्
स्वरूपसत्त्वेनैव तदुपयोगात् ज्ञानोपयोगित्वएव संगतित्वात् यथानुमानोपमानयोर्वक्ष्यमाणम् निर्वाहकत्वमे
ककार्यप्रयोजकत्वं यथाव्याप्तिपक्षधर्मतयोः व्याप्तौ निरूपितायां किमस्मदनुमितिप्रयोजकमिति जिज्ञासायां पक्ष
धर्मतानिरूपणात् नचहेतुतादविशेषः हेतुत्वं प्रयोजकयोः संगतिरिदं तु प्रयोजकयोरेवेति भेदात् एककार्यत्वे ४

कनिरूपितत्वाप्यनिरूपप्रयोजने अनुमानत्वव्याप्यस्य निरूपणेनैव किमस्य दनुमानत्वव्याप्यमितिपदकार्यं न संगत्याः
परप्रयोजनत्वमनुमानस्यापवर्गइत्यपवर्गनिरूपणादिति संक्षेपः ननूपमानसंगतिप्रदर्शने प्रकृतानुपयु-
क्तमित्यत आह लाघवायेति तथाल्पवादिसंमतत्वादनुमानेनेतइमिति क्रौशाहगौरवापत्तेरित्यर्थः तथाचोपमाने
निरूपणीये सत्यप्यशाहितानमरे अवसरत्वइत्येवोच्यतां किमज्ञातदर्शनेनेतिवाच्यं प्रत्यक्षानुमानयोः उपजीव्योपजीवकभाव
सामान्यपिप्रसक्तस्यवहुवादिसंमतत्वानदनेनरमल्पवादिसंमतमनुमानेनिरूप्यतइति संगत्यन्तरप्रदर्शनार्थं तत्रैव तदु
क्तेश्चैकत्वात् नोपमानइति तदनभ्युपगमेयमिति तान्प्रत्यपि भावात् अभ्युपगमेवावहूतरदुःखानुवंधिप्रतिपत्तिकत्वात्तय
थमेतज्जिज्ञास्येतिभावः कस्यचिदिति नत्वदुःखिबलवद्द्वेषरहितस्येत्यर्थः तथाचावसरसंगतिप्रतिवंधकीभूतानुमानजिज्ञा
सानिवृत्तौ उपवक्तव्यत्वज्ञानादित्यर्थः प्राक्केवलानिकादौ तत्वसंगतिव्याख्यानेदर्शितमेव सार्वभौमसंमतमाह शाब्दा
त्वेति उपमितिग्राह्यशक्तिकगवयादिशब्दादन्यः प्रहोणशब्दादिः तस्यशक्तिग्राहके गोपदंगविशक्तेहत्वेतराभावे ह
हेत्वन्नपवज्जमानत्वात्इत्यादिरूपमनुमानमपेक्षतइत्यन्वयः गवयादिपदमधिकृत्यासप्रवृत्तिनिमित्तकत्वबोधकेसा
मान्यतोक्तमितिगवयपदसप्रवृत्तिनिमित्तकेइत्तिमत्वाद्युपमितमतस्यप्रवृत्तिनिमित्तकेइत्येवंरूपमित्यर्थः नचास्योपमा
नानुपयोगइतिवाच्यं गोसदृशोगवयपदवाच्यइत्यतिदेशवाक्यार्थज्ञानेउपयोगसत्वात् गवयपदवाच्यतावच्छेदकधर्मे

ॐ. ५ 5

[illegible]स्यपि तत् सर्वं तत्तदारूढ श्रेतस्तोटद्धजनकं प्रकृष्टोपायिकमिति सकलनैयतान्ज्ञानस्यानुमानसाध्यत्वात् तदधीन
या गादिसिद्धिप्रयाप्टरछोत्पत्तेः तस्यैव कार्यमात्रहेतुत्वेपोपपन्ने प्रत्यपि उपजीव्यत्वसद्भावादितिभावः इदं च प्रमाणतव
[illegible]वच्छेदेनोपजीवकत्वेसंगतिरित्यभिप्रायेणोक्तं तदभावेपि सामानाधिकरण्यमात्रेणोपजीवकत्वेपिदोषाभाव
स्याकत्वात् [illegible]विदितिवद्भवादिसमतत्वादिति मूलग्रंथाविरोधाद्युपजीवकत्वमेवेमेवकारसंगतिरित्यवसरसंगत्याभाष्यम् २
तत्र प्रत्यक्षानुमानयोः सङ्गतिमैत्रेयिनिरूपणयोः कथंतल्लाभोतआह सम्भवतीति साक्षात्कारज्ञानस्यानु[illegible]
नेहेतुत्वात् प्रथमोपस्थितिकरणेनानुमानज्ञानेनप्रत्यक्षज्ञानेहेतुरतआह प्रथतन्यर्वकमिति त्रिविधमनुमानेषु
[illegible]वत्सामान्यतोदृष्टं चेति[illegible]: पूर्ववत्कारणलिंगकं अथपंतेतः घटवान्विजातीयसंयोगादित्यादौ शेषवत्का
र्यलिङ्गकं वह्निमान्धूमादित्यादौ सामान्यतोदृष्टं तदुभयभिन्नलिंगकं पतद्रूपवानेतद्रसादित्यादौ तस्यहेतुत्वनिष्ठ
व्याप्ति[illegible]मितिनैवविचार्यः तत्[illegible]पूर्वकमित्यनेनकथंप्रत्यक्षपूर्वकत्वलाभइत्यत आह तद्वहेतेति प्रकृतग्रंथे
तल्लि[illegible]समाह [illegible] व्याप्तिज्ञानविरहे[illegible]सहचारदर्शनव्याप्तिग्राहकमित्यत्रदर्शनपदस्याप्रत्य
क्षप[illegible]रित्यर्थं तस्यचिति व्याप्तिर्हि प्रत्यक्ष[illegible]सहचारप्रत्यक्षजन्मेतनवा अनुमानं निरूपय
ति से[illegible]: [illegible]निरूपयतीति तज्ज्ञानेन सर्वः [illegible]पाकरूपोतरेणानुमानज्ञानस्यप्रत्यक्षज्ञानानुपजीवकत्वे ५

पि उक्तप्रकाराभ्यां ज्ञानस्य प्रत्यक्षज्ञानसाध्यत्वमेवेति भावः अनुमानोपमाननिरूपणयोरपि पौर्वापर्यं घटयति एव
मिति अनुमानमित्रत्वेनेति उपमितिकरणत्वेनोपमानज्ञानस्यानुमानज्ञानानुपजीवकत्वेपि अनुमानमित्रत्वेति
तेज्ञानस्यानुमानज्ञानसाध्यत्वात् तद्रूपेणैव तत्र निरूपयिष्यमाणत्वादित्यर्थः अनुमानेन निरूप्यत्वस्य तत्र निरूप
णविषयोऽनुमानमिति प्रतिज्ञावशाच्च निरूपणे कर्तव्यत्वलाभः तत्रेति मूले तच्छब्देन कर्तव्यनिरूपणविषयानु
मानपरामर्षस्य तस्यार्थे सत्त्वस्यासम्भावलक्षणत्वात् फलितार्थमाह लक्षणेति प्रकारमेतत्तृतीयार्थः लक्षणादि
प्रकारकं कर्तव्यं निरूपणं तद्विषयत्वे सतीत्यर्थः निरूपणं तद्बोधजनकवाक्यम् व्यापारेणैवं खिविषयत्वे नन्वव्या
प्तिज्ञानमनुमाने तन्निरूपणेऽनुमितिज्ञानमनुपयुक्तं अत अनुमितिनिरूपणे अर्थान्तरत्वमित्यत आह करणे
त्येति अनुमितिकरणस्येत्यर्थः क्रियाभेदेति व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानरूपेत्यर्थः भिन्नेति तत्
प्रतीतस्वरूपादित्यर्थः तथा चानुमानेन निरूप्यत्वस्य तत्र करणत्वमुपमितिमर्यादयानुमितिकरणत्वरूपमनुमानत्वे तत्र
निरूप्यत्वावच्छेदकम् तद्रूपेणानुमानत्वेनैवानुमितिज्ञानसाध्यमिति विशेषणं ज्ञाननिर्वाहार्थमनुमितिनिरूप
णस्य प्रकृतोपयोगित्वमेवेत्यर्थः केचित्त्वनुमानपदस्य भावव्युत्पत्त्यानुमितिनिरूपणमपि प्रतिज्ञातमेवातो नाऽर्थान्त
रत्वशंकेत्याहुः वास्तवीत्यादिपदं तत्करणमनुमानमित्येतत्पर्यन्तधारणार्थम् तद्रहितपाठे तल्लक्षणमाहेति

ओं ६

स्वतेत्र्येव वाक्येनत्वाभासः व्याप्तीत्यनुमितिलक्षणस्य प्रतीकं निराभासमेवेति बोध्यम् अथेति उपमस्तलक्षणवाक्येऽर्
त्यर्थः अर्थ इति वस्तमासेनान्वयः व्याप्तिविशिष्टपक्षधर्मतयोः सामानाधिकरण्यमवगाहते यज्ज्ञानेन जन्यं ज्ञानमनु
मितिरित्यर्थः वह्निव्याप्यधूमवान्पर्वत इति ज्ञाने हि व्याप्तिर्धूमे पक्षधर्मता पर्वते प्रकारः आद्ये स्वरूपं द्वितीये संयोगः संसर्गः त
त्र संसर्गो विशेषणस्य प्रतियोगित्वे विशेष्यस्य चानुयोगित्वे भासते तथा च धूमे व्याप्तिसंबंधनिरूपितमनुयोगित्वं पर्वत
संबंधनिरूपिते च प्रतियोगित्वे इष्यते इति प्रतियोगित्वानुयोगित्वरूपयोर्व्याप्तिसंबंधपक्षधर्मतासंबंधयोर्धूमे भावा।
त्सिद्धं सामानाधिकरण्यभानमिति भावः ननु लक्षणवाक्यानुपात्ते सामानाधिकरण्ये कुतो लभ्यत इत्यत आह कर्मधा
रयेति व्याप्तिविशिष्टस्यासौ पक्षधर्मश्चेति समासे कृते तादृग्रेतत्समस्याश्रयणादित्यर्थः पदार्थतावच्छेदके इति व्या
प्तिविशिष्टपक्षधर्मपदयोरर्थे व्याप्तिविशिष्टत्वान्पक्षधर्मत्वयोश्च पदार्थतावच्छेदके व्याप्तिविशिष्टत्वे पक्षधर्मत्वे च
पदार्थविशेषणत्वे सैव पदार्थतावच्छेदकत्वात् तयोः सामानाधिकरण्ये भावप्रत्ययार्थ इति भावः नीलोत्पलत्वमित्यादौ
नीलत्वोत्पलत्वयोः सामानाधिकरण्यबोधात् अत्र केचित् कर्मधारयोत्तरभावप्रत्ययस्थले नीलत्ववदुत्पलत्वमिति
बोधः सामानाधिकरण्यं संसर्गः अत्रापि सामानाधिकरण्येन व्याप्तिसंबंधवत्पक्षतासंबंधेनेत्यर्थः सामानाधिकरण्यव
त्त्वादिति विशेषस्तु संसर्गमर्यादया सामानाधिकरण्यावगाहिबोधजनकत्वादिति व्याख्येयमित्याहुः अत्रेदं सामाना ६

धिकरण्ये प्रत्ययार्थः तत्र नीलोत्पलपदलक्ष्ययोः नीलोत्पलत्वयोरन्वय इत्याहुः अयं ह्रदो वह्निमानित्यादावव्याप्तिः तज्ज
न्ये वह्निव्याप्यधूमवान् ह्रद इति ज्ञाने व्याप्तिसंबंधपदसंबंधयोर्यत्सामानाधिकरण्यं तदप्रसिद्धेस्तद्विषयकत्वाभावात्
इत्यत आह ज्ञानपदेति उपसंदाने प्रयोगः व्याप्तिसंबंधपदत्पदसंबंधयोर्यत्सामानाधिकरण्यं तत्तद्विषयकेतिनार्थः
किंतु व्याप्तिसंबंधे पदसंबंधसामानाधिरण्यं पदसंबंधे व्याप्तिसंबंधसामानाधिकरण्यं यथा यत्र विषय इति तयोः प्रत्येकं
प्रसिद्धत्वादुभयोपसंग्रहोपपत्तिरित्यर्थः तदेतदुपाध्यायमते दूषयति तत्रेति हेतुमाह परामर्शेनेति तत्र हि व्याप्त्यादिसं
बंधमात्रविषयेणानुव्याप्त्यादिसंबंधस्य सामानाधिकरण्यमपि प्रमाणाभावात् तथा च वह्निव्याप्यधूमवान्पर्वत इति ज्ञा
नजन्यायामनुमितावव्याप्तिः व्याप्तिसंबंधपदसंबंधसामानाधिकरण्यावगाहिज्ञानजन्यत्वाभावात् न चैवमसंभवः
वेति वाच्यं वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्तिसंबंधपर्वतसंबंधयोः सामानाधिकरण्ये वेत्यादिसमूहालंबनस्य लक्ष
णसत्वात् अत एव नियमत इत्युक्तं ननु व्याप्तिसंबंधसामानाधिकरण्यज्ञानत्वेनानुमितिहेतुत्वात् तद्विषयकपरामर्शा
दनुमितिरेव न भवतीति क्वाव्याप्तिरित्यत आह गौरवेणेति तद्विषयकत्वेनेति उक्तसामानाधिकरण्यविषयकत्वेनेत्यर्थः
सामानाधिकरण्यप्रवेशे गौरवस्य स्पष्टत्वात् तथा च व्याप्यप्रकारकपक्षनिष्ठपत्वेनैव हेतुत्वमित्यर्थः ननु वह्निव्याप्यो धू
मो धूमवान्पर्वत इति समूहालंबनाद्वह्निव्याप्यधूमवान्पर्वत इति विशिष्टज्ञानस्याभेदान्वयानुपपत्त्या संबंधस्यापि संबंधो वि

ॐ शिष्टज्ञाने भासमानत्वस्यावश्यं स्वीकार्यं दण्डी पुरुष इति विशिष्टज्ञाने हि दण्डः प्रकारतया संयोगः संसर्गतया पुरुषश्च वि
७ शेष्यत्वेन भासते इति त्रयो विषयाः दण्डपुरुषसंयोगा इति समूहालम्बनेऽपि तावन्त एव ज्ञानभेदश्च विषयभेदाधीनः
अन्यथा साकारवादापत्तेः तदुक्तं अर्थेनैव विशेषो हि निराकारतया धियामिति अर्थाभिन्न एव विशेष इत्यर्थः त
थाच विशिष्टज्ञाने संसर्गतापन्नसंयोगप्रतियोगित्वं दण्डस्य प्रतियोगित्वे पुरुषस्य चानुयोगित्वे भासत इति स्वीकारे सिद्धो विष
यभेदः तयोर्दण्डपुरुषसंयोगा इति समूहालम्बनेनावगमात् प्रकृतेऽपि वह्निव्याप्यो धूमो धूमवान् पर्वत इत्यत्र व्याप्तिसंब
न्धानुयोगित्वं धूमे व्याप्तौ वह्नेः संबन्धप्रतियोगित्वे विषयः धूमवान् पर्वत इत्यत्र धूमे संयोगप्रतियोगित्वे पर्वते तदनुयो
गित्वे विषयः वह्निव्याप्यधूमवान् पर्वत इत्यत्र तु व्याप्तिसंबन्धानुयोगित्वं पर्वतसंबन्धप्रतियोगित्वं च धूमे भासत इति सिद्धं
सामानाधिकरण्यभाने समूहालम्बनेन व्याप्तिसंबन्धानुयोगित्वस्य धूमवान् पर्वत इत्यंशेनावगाहनात् तेन समूहपर्व
तसंबन्धप्रतियोगित्वस्य सामानाधिकरण्यभानमिति विशिष्टाद्विषयभेदसिद्धिरित्यत आह संबन्धसंयोगेति उपपादि
तत्वादिति तत्प्रकारकत्वमेव तद्विशिष्टज्ञानत्वं तत्र स्वरूपसंबन्धविशेषः समूहालम्बनव्यावृत्तेः अन्यथा दण्डपुरुषसंयो
गप्रतियोगित्वानुयोगित्वानि समूहालम्बनाद्दण्डी पुरुष इति विशिष्टज्ञानस्य भेदो न स्यादिति प्रसक्तत्वखण्डे मणिकृ
तानिरूपितत्वादित्यर्थः ननु वस्तुगत्या व्याप्तिसंबन्धसामानाधिकरण्ये यस्य तद्धर्मवत्तज्ज्ञानजन्यत्वमेवार्थः तत्र सा

मानाधिकरण्यानवगाहनेप्युक्तमेव न च लक्षणवाक्यार्थबोधे सामानाधिकरण्यभानात्तद्विषयीभूतज्ञानेपि सा
मानाधिकरण्यविषयकत्वं लभ्यत इति वाच्यं घटनिर्विकल्पकमित्यादिवाक्यार्थबोधे घटत्वादेः प्रकारत्वेपि तदुल्ले
खे निर्विकल्पके तदभावात् न च प्रमेयत्वेन पक्षधर्मताज्ञानानुव्यवसायेऽतिव्याप्तिः व्याप्तिप्रकारकत्वस्यैव विवक्ष-
णीयत्वात् अत आह प्रमेति वह्निव्याप्तिसंबंधसमानाधिकरणस्य ह्रदसंबंधस्याप्रसिद्धत्वादित्यर्थः तत्र लक्षणं
वाक्यार्थबोधानुपपत्तिमप्याह प्रावांतरेति अनुमितिभेदेन लक्षणभेदाद्वह्निव्याप्तिसंबंधसमानाधिकरणह्रद
धर्मताज्ञानजन्यज्ञाने वह्निसाध्यकह्रदपक्षकानुमितिरिति तत्रान्वयग्रहः स च वह्निव्याप्तिसंबंधसमानाधिकरण्यन
ह्रदधर्मताद्युपयोग्यताज्ञानकालेडुल्लेख इत्यर्थः महावाक्यार्थबोधेऽवांतरवाक्यार्थस्यापि विषयत्वादित्याशये-
नाह विषाणेति विषाणत्वावच्छेदेनेत्यर्थः अन्यथा विषाणत्वसामानाधिकरण्यमात्रेण शशसंबंधाभावज्ञान
स्य विषाणत्वसामानाधिकरण्यमात्रेण शशसंबंधज्ञाने प्रत्यविरोधित्वात् विषाणत्वसामानाधिकरण्यमात्रेण शश
संबंधज्ञानसंभवापत्तेः अवच्छेदकावच्छेदेन बाधनिर्णयस्तु उभयत्रापि विरोधीति न कथमपि विषाणे शशीयत्व
धीसंभव इति भावः ननु शशविषाणजन्यकार्मुकमित्यत्र शशपदस्य शशसंबंधिनि विषाणपदस्य च विषाणसं
बंधिनि लक्षणा तदेकदेशे विषाणे शशसंबंधिनोऽभेदान्वयः विषाणसंबंधिनश्चाभेदेन जन्यान्वयः तथा च श

उ॰ शसंबंधाभिन्नविषाणसंबंध्यभिन्नमन्यमितिविषयः तत्र विषाणे शशसंबंध्यभेदो विषयः ततश्च यतेन शशसंबंधः
८ प्राशशसंबंधिः शशसं प्रकारकाभेदसंसर्गकविषाणविशेष्यकज्ञाने च विषाणविशेष्यकशशसंबंधाभावप्रका
९८ रकज्ञाने न विरोधिग्राह्याभावानवगाहित्वात् विषाणे शशसंबंधिभिन्नमिति ज्ञानस्यैव तद्विरोधित्वात् सम्यग्लम
षष्ठीस्मरणाद्दोष इति पदे शशसंबंधस्यैव विषाणे ग्राह्यत्वादिति केचित् तादात्म्येन संबंधिग्रहे संबंधाभावज्ञान-
स्यापि विरोधित्वादित्यन्ये शशस्य शशपदार्थस्येत्यर्थः शशसंबंधिन इति यावत् तस्य संबंधीयोऽभेदः तदभाव
स्य शशसंबंधिभेदस्येत्यर्थः यद्वा शशसंबंधोऽभावोऽयस्येति बहुव्रीहिणा शशसंबंधिभेदस्यैव ग्रहणं तदभावस्य
शशसंबंधरूपत्वात् भेदात्यंताभावस्य प्रतियोगितावच्छेदकस्वरूपत्वादिति तन्त्र्याः भ्रमानुमितेरलब्धताभावाप्ति
रित्याशंकते न चेति प्रमाणेति प्रमाणत्वविवेकस्य प्रतिज्ञातत्वात्तद्घटकप्रमायाप्यवलंबत्वादिति भावः
प्रमैवेति सर्वांशप्रमेत्यर्थः अन्यथा भ्रमस्यापि क्वचिद्विशेषे प्रमात्वात् ननु गंधप्रागभावकालावच्छिन्नो घटो गंध
व्याप्यपृथिवीत्ववानित्यादौ शुद्धसमवायेन गंधपृथिवीत्वयोर्व्याप्तिग्रहमूलकात्तल्लिंगकपरामर्शात् घटपक्ष
कगंधप्रागभावकालावच्छिन्नसमवायसंसर्गकगंधविधेयकानुमितिर्भ्रमरूपा जायते तत्रापि व्याप्तिः स्यादत
आह यदि वेति प्रमापरमिति भ्रमान्यपरमित्यर्थः उपाध्यायमते व्यापकतावच्छेदकसंबंधेनैव व्यापकभानमि ८

यस्मात् शुद्धसमवायेन व्याप्तिग्रहे शुद्धसमवायेनैव चन्द्रे गंधो भासते तथा चोक्तानुमितिर्भ्रमैव भवतीति सूचयितुं य
दिवेत्युक्तं सुव्याप्येति सुव्याप्यव्याप्यतावगाहिता वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शेण जनिता या पर्वतो वह्निमा
नित्यादौ प्रपक्षधर्मे पक्षधर्मत्वावगाहिता सत्ताव्याप्यधूमवान् गुण इत्यादिपरामर्शेण जनिता यो गुणः सत्तावानित्या
दौ चानुमितौ च व्याप्तेः तत्र च स्वतो व्याप्तिविशिष्टपक्षधर्मतयोः सामानाधिकरण्याभावेन परामर्शस्य तद्विषयकज्ञान
त्वाभावात् तद्विषयकज्ञानजन्यत्वस्यानुमितौ दुर्लभत्वात् प्रमात्वेन बलवत्त्वादिति भावः ननु भ्रमात्मकपरामर्शात्कथं प्रमा
नुमितिरित्यत आह वस्तुत इति साध्यवत्पक्षविशेष्यकपरामर्शस्यैवानुमितौ प्रमात्वनियामकत्वादित्यर्थः ननु लिंगा
यथा न पक्षे वह्निव्याप्यधूमवान् पर्वतो वह्निमान् सत्ताव्याप्यधूमवान् गुणः सत्तावानित्यनुमितेः प्रकारः तत्रांशेनांशे व
ह्निव्याप्तिविषयकत्वे गुणांशे धूमविषयकत्वेनानुमितेर्भ्रमत्वान्न व्याप्तिः सर्वांशप्रमायाप्रबलत्वमादित्यत आह लिं
गेति लिंगोपहिते साध्यव्याप्तिविशिष्टलिंगविशिष्टे पक्षे लैंगिकस्य व्यापकस्यानुमितौ भानमित्यर्थः निरासेने
ति गौरवात् प्रमाणाभावाच्चेति भावः ननु साध्यवत्पक्षकत्वस्थले ह्रदीयवह्निव्याप्यधूमवत्ताज्ञानादिसत्त्वादेवा
नाव्याप्तिरित्यत आह ईदृशेति तादृशेति व्याप्तिसंबंधेन समानाधिकरण्यपदसंबंधेनेत्यर्थः अतिप्रसंजकत्वादिति अतः
त्वादावपि तद्बीजस्य सत्त्वादतिव्याप्तेः वस्तुतो जातिगर्भलक्षणस्यावश्यकत्वान्नाव्याप्तिरिति तत्त्वं अतएवेति

प्रमात्मकपरामर्शजन्यानुमितित्वाभावेत्यर्थः व्याप्तिविशिष्टपक्षधर्मतात्वतद्विषयकत्वाभावात् सर्वोक्तपरामर्शाणामित्यर्थः
ॐ. आदिपदं व्याप्तिविशिष्टविषयकं यत्पक्षधर्मताज्ञाने व्याप्तिविशिष्टाव्याप्तिसमानाधिकरणायाः पक्षधर्मताया इत्यादि परे सिद्धम
५ न्तमाह व्याप्तिविशिष्टस्येति लभ्यत इति हेत्वाद्यंशे प्रमाणे प्रमेयकमत्वे संबध्यत इति कुत्सभावप्रत्ययार्थे सोऽभवत्राप्यन्वया
दित्यर्थः ननु व्याप्तिविशिष्टस्यैव पक्षधर्मस्य वह्न्यादेरभेदात्कथं हेत्वाः पदार्थभेद एव तदंगीकारादत आह पदार्थयोरि
ति प्रमाणप्रमेयेत्यादिसूत्रे प्रमाणादीनां दृष्टांतेन सह हेत्वाभेदेन स्यात् प्रमाणादीनामपि दृष्टांतत्वात् दृष्टांतस्यैकैव
त्वान्वयित्वात् ततः पदार्थतावच्छेदकभेद एव हेतुरिति भावः अन्येत प्रमाणप्रमेययोरेव हेतुत्वेन स्यात् प्रमेयपदेन
द्वादशपरत्वेन पारिभाषितत्वेपि तु हेतुरपि तत्र निवेशनात् व्याप्तिज्ञानादेश्च प्रमाणत्वादित्याहुः अन्यत्रेति नीलघटयो
रभेद इति प्रत्यक्षत्वेऽपि नन्वेवं नीलोत्पलमिमादौ हेतुरेव स्यादित्यत आह पदार्थद्वयेति तथा वाभेदविवक्षायां क
र्मधारयः परस्परानन्वितपदार्थद्वयविवक्षायां वा हेतुरिति भावः पदार्थभेदे हेतुरिति पक्षेपि प्रकारान्तरेणाह कार्ये साधय
ति विशिष्टेति भावप्रत्ययेन तथा विशिष्टपदेनैव वैशिष्ट्यलाभात् व्याप्तिविशिष्टेत्य पक्षधर्मतावेत्येव व्याख्येयम् त
था चोक्तरीत्या व्याप्तिविशिष्टलाभः पक्षधर्मपदोत्तरभावप्रत्ययेन च पक्षधर्मत्वलाभ इति विवेकः नन्वेवमिति उ
भयविषयकत्वमात्रविवक्षायामित्यर्थः तत्र प्रमांशे व्याप्तिवैशिष्ट्यविषयत्वस्य आलोकांशे पक्षधर्मविषयत्वस्यैव मा ५

60

नात्रानुमानव्यवसायेतिव्याप्तिरित्यर्थः समाधत्ते एकत्रेति तत्रतद्धर्मिभेदेनोभयावगाहनान्नातिव्याप्तिः एवम
पीति धूमत्वद्रव्यत्वरूपाभ्यामुपस्थितेधूमरूपैकस्मिन्नेवधर्मिणितदुभयवैशिष्ट्यस्यावगाहनात् तज्जन्यानुव्यव
सायेतिव्याप्तिः एकरूपेणेति यद्रूपावच्छिन्नव्याप्तिवैशिष्ट्यं गृह्यतेतद्रूपावच्छिन्नप्रकारतानिरूपितविशेष्यताशा
लिज्ञानजन्यत्वयर्थः उक्तस्थलेतन्नतथेतिसहेम मीमांसकेति वह्निव्याप्यवान्पर्वतइत्यादिपरामर्शजन्यानु
मितावव्याप्तिः तस्यव्याप्त्यंशेनिर्धर्मितावच्छेदकत्वात् किंचिद्रूपावच्छिन्नव्याप्तिवैशिष्ट्यानवभासात् ततोनुमिति
र्नास्तीतिउक्तौवमीमांसकमतानुप्रवेशापत्तेः किंचिद्रूपावच्छिन्नव्याप्तिवैशिष्ट्यानवभासाद्धूमोधूमवान्पर्वत
इतिज्ञानजन्येविशिष्टपरामर्शेतिव्याप्तिः ततोप्यनुमितिस्वीकारेतुमीमांसकमतानुप्रवेशइतिव्याचख्युः ए
वंस्मिन्नादिदशायांतज्जन्यपरामर्शेतिव्याप्तिरपिवोध्यानन्तुव्याप्यतिरिक्तधर्मानवच्छिन्नप्रकारतानिरूपितपक्षवि
शेष्यताशालिज्ञानजन्यत्वेलक्षणमस्तुएतादृशप्रकारताशालित्वेवह्निव्याप्यवानित्यत्रास्येवेतिनोक्तदोषइत्यत
आह: मिथइति परामर्शेति वह्निव्याप्यधूमवानितिज्ञानेव्याप्यतिरिक्तेनधूमत्वरूपेणापिधर्मेणप्रकारताया
अवच्छिन्नत्वात् व्याप्यतिरिक्तधर्मानवच्छिन्नप्रकारतायाश्चाभावान्नादृशपरामर्शजन्यानुमितावव्याप्तिरित्यर्थः
व्याप्तिर्व्याप्यतावच्छेदकधर्मस्तेनतदुभयातिरिक्तधर्मानवच्छिन्नप्रकारतानिवेशेतुनायंदोषइतिबोध्यम् तदु

ऊं. १० 10

भयेति व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयविषयकत्वव्याप्यो धर्मः परामर्शत्वं तदवच्छिन्नकारणताप्रतियोगिककार्यता
शालिज्ञानत्वसमुदायार्थः एवं च धूमो वह्निव्याप्य इत्याद्यंशे पर्वतत्वमस्तीत्यादेर्विषयत्वेनैवानुव्यवसायप्रमितिकारणत्वे तत्तत्त
दुभयविषयकत्वव्याप्यमिति नातिव्याप्तिः न च तज्ज्ञानव्यक्तित्वेन तज्ज्ञानव्यक्तिप्रत्यक्षत्वेन कार्यकारणभावमादाया
तिव्याप्तिः एवं विशेषणज्ञानस्य तद्व्यक्तित्वेन हेतुतामादाय वह्निव्याप्यधूमवान्पर्वत इत्यादिज्ञानजन्यपर्वतो वह्निमा
नित्यादिप्रत्यक्षे चेति वाच्यं विभ्रमते विषयस्य विशेषणज्ञानदेश्याविशिष्य हेतुताभावात् न च ज्ञानस्मरणयोः स
मानप्रकारकत्वेन हेतुहेतुमद्भावे विशिष्टस्मरणेतिव्याप्तिः चरमज्ञानपदस्यानुभवपरत्वात् न च वह्निव्याप्यवान्पर्वतो
नास्तीत्यादौ लौकिकप्रत्यक्षेऽतिव्याप्तिः व्याप्तेरतीन्द्रियतया तदवच्छिन्नप्रतियोगिताकाभावस्याप्यतीन्द्रियतया तल्लौ
किकप्रत्यक्षाभावात् अन्यांशे च प्रत्यक्षे प्रतियोगितावच्छेदकप्रकारकज्ञानस्य हेतुत्वात् इष्यते पक्षधर्मतेति
व्याप्तिविषयकत्वव्याप्यधर्मावच्छिन्नत्वादेवेव साधुत्वात् तत्परित्यागे च मूलविरोधात् न च व्याप्तिवैशिष्ट्यविषयक
ताशवैयर्थ्यमेवोद्भाव्यतामिति अधूमवान्पर्वतो नास्तीत्यभावलौकिकप्रत्यक्षातिव्याप्तेः धूमवान्पर्वत इति प्रतियोगि
तावच्छेदकप्रकारकपक्षधर्मत्वविषयकत्वव्याप्यत्वात् न च वह्निव्याप्यो धूम इत्याद्यंशे इति व्याप्तिधर्मतावच्छेदकीकृत्य इत्य
त्वे वैशिष्ट्यबोधे व्याप्तिविशिष्टधूमस्य पर्वतत्वादौ वैशिष्ट्यावगाहिनि वह्निव्याप्यधूमवान्पर्वत इत्यादौ वातिव्याप्तिः स्या १०

येविशेष्यतावच्छेदकप्रकारकनिश्चयत्वेनद्वितीयेचविशेषणतावच्छेदकप्रकारकनिश्चयविषयावह्निव्याप्यधूमइ
तिज्ञानस्यहेतुत्वात् तद्वारणायपक्षधर्मतोपादानमार्थकमितिवाच्यं मिश्रमतेतादृशहेतुत्वानंगीकारात्तादृशवि
शिष्टवैशिष्ट्यबोधस्यविशिष्टबुद्धिद्वयसामग्रीनिर्वाह्यत्वादार्थसमाजग्रस्तत्वाकार्यतानवच्छेदकत्वात् नचव
ह्निव्याप्योधूमइत्युपनीतभानेतिव्याप्तिः व्याप्तिघटकपदार्थसमूहालंबनरूपत्वात्तस्यतत्रतत्तत्पदार्थज्ञानत्वेनैवहेतु
त्वात् तस्यचव्याप्तिवैशिष्ट्यविषयकत्वव्याप्यत्वाभावात् अन्यथापक्षधर्मतोपादानेपिवह्निव्याप्यधूमवान्पर्वतोऽयम
वह्निव्याप्यधूमवत्पर्वतवान्देश इत्यादिविशिष्टवैशिष्ट्यबुद्धौवह्निव्याप्यधूमवान् पर्वतइत्युपनीतभानेवातिव्याप्तेः
ननुवह्निव्याप्यवत्सदृशः पर्वतपदवाच्यः इत्यादिदेशवाक्यार्थज्ञानजन्योपमितावतिव्याप्तिवारणार्थंतत् नचव्याप्ते
स्सामानाधिकरण्यरूपत्वात्पक्षधर्मतायदितत्वात्तथापिदोषतादवस्थ्यंपर्वतत्वादिविशिष्टसंबंधस्यतदर्थत्वात्
तत्रचाधिकरणत्वेनैवपर्वतादेर्भानात् पर्वतत्वादिपदेनव्याप्तिविशिष्टोपस्थितिद्वाराजनितविशिष्टशाब्दबोधेवातिव्या
प्तिवारणार्थंतत् इतिचेत् तदुपादानेपिवह्निव्याप्यधूमवत्पर्वतसदृशोमहानसमितिज्ञानजन्योपमितौतत्त्वादिपदस्य
तत्त्वादिपदेनव्याप्यविशिष्टपक्षोपस्थित्याजनितेतच्छाब्देवातिव्याप्तिवारणायचरमज्ञानपदस्यशाब्दान्यज्ञानपरत्वावा
श्यकत्वे ततएवोक्तस्थलेपिदोषनिरासात् वस्तुतस्तु एकत्रैवेतिपक्षस्योविषयतापन्नउभयावगाहित्वस्यव्याप्तिनि

उँ॰
११

ष्टप्रकारतानिरूपितविशेष्यताभिन्नप्रकारतानिरूपितपक्षविशेष्यताशालित्वस्य विवक्षितत्वादिति विशेषाभिप्रायात्तु कोऽपि दो
षइत्याहुः व्याप्तिविशिष्टपदस्य पक्षधर्मताज्ञानपदेन कर्मधारयइति मिश्रोक्ते द्वितीये सिद्धान्तपक्षमाह व्याप्तिविशिष्टइति
ननु वह्निव्याप्तिवैशिष्ट्यं धूमे न तु पक्षधर्मताज्ञाने इत्याशंक्याह व्याप्तिप्रकारकमिति यत्र यस्य यः संबंधः स एव तत्र तस्य वैशि
ष्ट्यमिति स्वीकारात् नैवमपि धूमो वह्निव्याप्यो धूमवान्पर्वतइति ज्ञानजन्यानुव्यवसायेऽतिव्याप्तिः व्याप्त्यवच्छिन्नप्रकारता
केत्यर्थात् तत्र व्याप्तिप्रकारतानिरूपितधूमविशेष्यतायाः पर्वतविशेष्यतानिरूपितधूमप्रकारतायाश्च भेदात् धूम
प्रकारतायां व्याप्तेरनवच्छेदकत्वात् ननु वह्निव्याप्येंधनवान्पर्वतइत्यादिपरामर्शजन्यप्रमात्मानुमितावव्याप्तिरत्रापि समानेवे
त्याशंकते धूममिति वह्निमदिंधनसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमप्रसिद्धं अत्राकाशइति वृत्तिनियामक
संबंधेन साध्यत्वलाभाय साध्यविशेषकत्वमुक्तं अत्र साध्यतावच्छेदकसंयोगसंबंधेन साध्याधिकरणाप्रसिद्ध्या तद्वृत्तित्वमप्यप्र
सिद्धं एवं संयोगेनात्माधिकरणाप्रसिद्ध्या आत्मसामानाधिकरण्यमपीत्यर्थः अतएव मूलतरामित्युक्तं तावदिति व्याप्ति
घटकेत्यर्थः तथाविधपरस्परसंबंधावगाहित्वं समूहालंबनव्यावृत्तो विषयताविशेषः अधिकरणेसाधनसंबंधः अधि
करणस्य वृत्तित्वं तस्याऽभावेन स्वप्रतियोगितायां तस्यावच्छेदकत्वं तस्याऽभावे इत्याद्याकारकमवगाहते तेन धूमोऽधि
करणे तत्वृत्तिरभावोऽभावप्रतियोगितेत्याद्याकारकधीजन्येनातिव्याप्तिः एवं इंधनतावच्छिन्नेंधननिष्ठविशेष्य॰ ११

ताद्यप्रकारतानिरूपिता इत्यादिरीत्या व्याप्तिग्राहकपदार्थानां निरूपकभावापन्नविषयताशालिपक्षधर्मता-
ज्ञानजन्यत्वे लक्षणार्थः। व्याप्यभाववत्स्थलेऽपि तादृशज्ञानस्य भ्रमात्मकस्य संभवान्नाव्याप्तिरित्यर्थः। व्यतिरेकिणी-
ति वह्न्यभावव्यापकाभावप्रतियोगी धूमवानिति परामर्षेनादृशप्रतियोगितस्य प्रकारत्वात् व्यापकसामानाधिक-
रण्यरूपव्याप्तिघटकपदार्थानां परस्परस्योपश्लेषस्य तज्ज्ञानानवगाहनादिति भावः। न च साध्यासत्ताभाववद्वृत्ति-
रूपान्वयव्याप्तिज्ञानजन्यानुमितावव्याप्तिसंभवाद्व्यतिरेकानुधावनं व्यर्थमिति वाच्यं सिद्धान्तलक्षणोक्तव्याप्तिज्ञा-
नमेव हेतुरित्यभिप्रायादुपलक्षणताद्वा व्यभिचारेति रन्त्यभाववद्वृत्तिर्धूम इति ज्ञानविरोधिविज्ञानविषयी-
योधर्मतत्प्रकारकपक्षधर्मताज्ञानजन्यत्वे लक्षणार्थः। सद्धर्मोऽन्वयव्याप्तौ धूमसमानाधिकरणाभावा इति
योगितानवच्छेदकवह्नित्वावच्छिन्नवह्निसामानाधिकरण्यं व्यतिरेकव्याप्तौ तु वह्न्यभावव्यापकीभूताभावप्रतियो-
गित्वमित्यन्यदेतत्। तद्घटकपदार्थानां परस्परोपश्लेषावगाहित्वस्यैव प्रवेशान्नाव्याप्तिरिति भावः। न च विरोधिता-
वच्छेदकभेदेन विरोधितानां भेदात्कथमनुगम इति वाच्यं। विरोधितासंबंधेन व्यभिचारधीमत्त्वस्य विवक्षितत्वात्
मेवैवाननुगमस्यवादोषत्वात्। न च तादृशव्याप्तेर्घटादेश्च समूहालंबनविषयस्यैव विषयत्वात्। घटवान्पर्वत इत्या-
दिज्ञानजन्यानुव्यवसायेतिव्याप्तिः। यद्विषयत्वेन प्रतिबंधकत्वविवक्षायामपि प्रत्येकं तत्तद्घटकपदार्थज्ञानजन्या

ग्रे.
१२ नुव्यवसायेतिव्याप्तिः यद्विषत्वेन प्रतिबंधकत्वविवक्षायामपि प्रत्येकं तत्तद्दकपदार्थज्ञानजन्यानुव्यवसायेमेतिवाच्यं
तादृशधीविषयतस्य ज्ञाने विषयत्वयावत्प्रतिबंधकतावच्छेदकत्वपर्याप्त्यधिकरणत्वरूपस्यानिवेशात् नचकेवलमह
नित्वज्ञानस्यापि व्यभिचारधीविरोधित्वादहन्निमानितिज्ञानानुव्यवसायेतिव्याप्तिः व्यभिचारज्ञानत्वावच्छिन्नप्रतिबा
ध्यतानिरूपितप्रतिबंधकतानिवेशात् तत्प्रतिबध्यतायाश्चहमितिज्ञानत्वमेवावच्छेदकं नतुव्यभिचारज्ञानत्वमिति
दोषात् नचधूमोवह्निव्याप्य इति याम्यवच्छेदकत्वेनज्ञातस्यधूमत्वादेरपि व्यभिचारधीविरोधितावच्छेदकत्वात् धूम
वानितिज्ञाजनमेऽतिव्याप्तिः तद्व्याहत्तायायाप्यत्वप्रतिबंधकतायाविवादितत्वात् नचव्यतिरेकव्याप्तिज्ञानस्य कथंव्य
भिचारधीविरोधित्वं ग्राह्याभावानवगाहित्वादित्यतआह भवतिहीति तथाचानुभवबलादतथाभूतस्यापिमा
णिमेत्रौषधादिवद्विरोधित्वमितिभावः अथ तादृशवन्हिसमानाधिकरणधूमसामानाधिकरण्यग्रहेऽप्यापि
नियमतोवान्हिव्यभिचारग्रहात्तदयानस्यापि प्रतिबंधकतापत्तातादृशवह्निसमानाधिकरणधूमसमानाधिकर
णवान्यर्वतइतिधीजन्येऽतिव्याप्तिरतआह तथाविधेति नतथेति तादृशप्रतिबंधकतावच्छेदकं न्यतमर्थः तद्ग्रहेऽपि
तादृशधूमसामानाधिकरण्यग्रहेपीत्यर्थः स्यादेतत् तादृशसामानाधिकरण्यधूमत्वमपि न प्रतिबंधकतावा
च्छेदकं तादृशधूमस्यासमभादौग्रहेऽपिवान्हिव्यभिचारस्यतत्रग्रहात् नचतत्रासमभत्वादिनाव्यभिचारग्रहेऽपिधूमत्वे १२

न्नतदभावान्नदोषइतिवाच्यं उक्तधूमसामानाधिकरण्यग्रहेपितत्संभवात् नचतस्यधूमसामानाधिकरण्यज्ञानत्वेनप्रति
बंधकत्वं किंतुवह्निसमानाधिकरणधूमवत्ज्ञानत्वेनैवेतिवाच्यं तादृशवह्निसमानाधिकरणधूमग्रहेपितद्बोधयतयाता
त् तादृशवह्निज्ञानमात्रादपिधूमधर्मिकव्यभिचारज्ञानानुत्पत्त्यातादृशवह्निज्ञानत्वेनैवप्रतिबंधकत्वात् एवंव्यतिरेक
व्याप्तिज्ञानस्यव्यभिचारधीविरोधित्वमपिदुर्लभं वन्ह्यभाववन्निष्ठाभावाप्रतियोगीधूमाभावइतिज्ञानसत्त्वेपिधूमेधू
माभावाभावरूपत्वज्ञानाभावेधूमेवह्निव्यभिचारज्ञानोदयादित्यतआह व्यतिरेकेति तथाचव्यतिरेकव्याप्तिज्ञानजन्या
नुमितेरप्रसिध्यानाव्याप्तिरितिभावः भ्रमसंशयेति विपरीतज्ञानोत्तरप्रत्यक्षानिर्णयत्वावच्छिन्नेप्रतीत्यर्थः विप
रीतज्ञानोत्तरप्रत्यक्षनिर्णयत्वावच्छिन्नेप्रतीत्यर्थः विपरीतज्ञानाभावकालीनप्रत्यक्षेव्यभिचारवारणायतदुत्तरत्व
निवेशः अनुमित्यादौतद्वारणायप्रत्यक्षेति संशयोत्तरसंशयेतद्वारणायनिर्णयेति नायंपुरुषइतिज्ञानेपुरुष
त्वव्याप्यकरादिमत्ताज्ञानरूपविशेषदर्शनेविनापुरुषप्रत्यक्षानुदयादुक्तकार्यकारणभावः कल्प्यतेइतिमिश्राः उ
पाध्यायास्तु विशेषदर्शनाभावविशिष्टविपरीतज्ञानेप्रतिबंधके विपरीतज्ञानकालेविशेषदर्शनसत्त्वेचविपरीत
ज्ञानेविशेषदर्शनाभाववैशिष्ट्याभावादुक्तविपरीतज्ञानाभावसत्त्वात्प्रत्यक्षोपपत्तिः अतोविपरीतज्ञानप्रतिबंधक
तायांविशेषदर्शनस्युत्तेजकमात्रमित्याहुः दीधितिकृतस्तु विशेषदर्शनेनहेतुत्वेनोत्तेजके तत्संशयपरकोटि

श्री. १३ 13

कज्ञानत्वरूपनिर्णीयत्वस्यार्थसमाजसिद्धत्वाजन्यतानवच्छेदकत्वात् नीलेतरघटत्ववत् एवं कोटिद्वयभासकसाम
ग्रीसत्वेतत्तत्कोटिकज्ञानत्वरूपसंशयत्वमपि तथा नीलघटत्ववदित्याहुः तत्रोक्तमतद्वयेजन्यत्वाभिशंकानवकाशा
त्मतत्रयमुक्तं तवेति विपरीतज्ञानेनेतरप्रत्यक्षेत्यर्थः गुरुत्वव्याप्यवत्ताज्ञानरूपस्य विशेषदर्शनस्य व्याप्तिविशि
ष्टपक्षधर्मताज्ञानत्वाजन्यज्ञानत्वस्यैतन्मतत्वात् तथापीति व्याप्यवत्तानिश्चयत्वरूपेणेत्यर्थः विवक्षितत्वादि
ति व्याप्तिविशिष्टपक्षधर्मतानिश्चयत्वावच्छिन्नकारणताप्रतियोगिककार्यताशालिज्ञानत्वमनुमितित्वे विशे
षदर्शनस्य तत्तद्रूपेण कारणत्वात्किन्तु रूपान्तरेणेत्याहुः भ्रमापत्तिरिति विपरीतज्ञानविरोधितेनेत्यर्थः अत एवाथ
कोनवत्वाभावनिश्चयोत्तरमालोकसमवधाने विशेषदर्शनाभावेऽपि घटप्रत्यक्षनिर्णयः कुंकुमे गंधसंदेहेव
तैलादिसमवधानोत्तरमेव गंधप्रत्यक्षं एवं करादिमात्रस्पार्शरिति स्पार्शनाभावावच्छेदकत्वेन गृहीतकरादि
मत्तात्वानेकरादौ गुरुत्वव्याप्यवत्ताज्ञानाभावेऽपि गुरुत्वप्रत्यक्षं चेतिभावः अत एवेति उक्तरूपावच्छिन्नकारणता
याविवक्षितत्वादित्यर्थः लिंगवत्वादिति वह्निव्याप्यधूमवत्पर्वतमहानसमित्याकारकवाक्यार्थज्ञानजन्या
यामयं महानसपदवाच्य सत्वुपमितावित्यर्थः ननु तु कवाक्यार्थज्ञाने व्याप्याश्रयत्वविशिष्टस्याभेदेन धूमे तस्य वे
मत्वर्थसंबंधोकदेशसंबंधे वैशिष्ट्यावगाहित्वात् तथा च वह्निव्याप्याश्रयत्वविशिष्टाभिन्नधूमसंबंधेवैशिष्ट्यसद्भा १३

भिन्नं महानसं इति तदर्थः लक्षणार्थस्तु पक्षे व्याप्तिविशिष्टवैशिष्ट्यावगाहि यत् ज्ञानं तज्जन्यज्ञानत्वमिति कथमति
व्याप्तिः सत्त्ववह्निव्याप्यवन्महानससदृशः पर्वत इत्यतिदेशवाक्यार्थस्य विवादितत्वात् पिंडसन्निकर्षोत्तरकाले व
ह्निव्याप्यवत्सदृश इत्याकारकसादृश्यप्रत्यक्षस्य पक्षे व्याप्तिविशिष्टवैशिष्ट्यावगाहित्वात् तज्जन्यत्वादुपमितेस्तत्रातिः
व्याप्तिरित्यत आह तथाविधेति गृहीतदृशांतिकपदसमभिव्याहृतेत्यर्थः यद्वा वह्निव्याप्यवत्पर्वतादिसादृश्यप्रतिप
पदेनेत्यर्थः तत्र उक्तदोषोपमितित्वस्य तन्महावाक्यार्थज्ञानकार्यतावच्छेदकतया व्यभिचाराभावात् न वा यन्नयेति प
रार्थस्थले न्यायवाक्यस्यायमाकारः पर्वतो वह्निमान् धूमात् यो यो धूमवान्स वह्निमान् यथा महानसं तथा चा
यं तस्मात्तथेति प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्याः पंचावयवाः तदर्थज्ञानैर्मिलितैर्महावाक्यार्थज्ञानं
जन्यते न च तथा चायमित्युपनयार्थज्ञानस्य वह्निव्याप्यधूमवान्पर्वत इत्याकारकतया व्याप्तिविशिष्टपक्षधर्मता
ज्ञानत्वात् तज्जन्ये महावाक्यार्थबोधे व्याप्तिरित्यर्थः न च अवांतरवाक्यार्थज्ञानेन महावाक्यार्थबोधे हेतुः खलेकपोतन्यायेन यु
गपदेव परस्परान्वितार्थान्वयबोधोपपत्तेरित्यत आह न च हेतुनेति स वह्निमानित्यादौ वह्निव्याप्यधूमवत्पर्वतपरेण तदादि
शब्देनेत्यर्थः तत्र तत्पदार्थज्ञानस्य व्याप्तिविशिष्टपक्षधर्मताज्ञानरूपत्वात्तज्जन्ये वह्निव्याप्यधूमवान्पर्वतो वह्निमानि
ति वाक्यार्थबोधे व्याप्तिरित्यर्थः ननु वह्निस्य तेन रूपेण तदादेर्बोधकत्वं न तु केनेत्यत आह संकेतितेत्यादौ वह्निमा

ॐ त्रित्वादौ घटादिपदस्याप्यवस्थादोषात् शक्तिकसंकेतस्य लक्ष्ये पूर्ववदतिव्याप्तिरित्यर्थः प्रथमातिव्याप्तिमुपपादयति शु
२८ त्पादयिष्यत इति ग्रन्थयवग्रन्थे इति शेषः यद्यपि उपनयार्थबोधे तदुत्तरं निगमनादिरूपवाक्यांतरघटकपदोपस्थितिः तत
स्तत्पदार्थस्मरणं अत्रैव क्षणे उपनयादिरूपवाक्यार्थधीनाशः यतस्य उपनयवाक्यार्थबोधोत्पत्तिक्षणे एतद्यात् तृतीय
त्वात् ततो निगमनादिवाक्यार्थबोधः तत्पूर्वक्षणेपि उपनयादिवाक्यार्थज्ञानस्याऽसत्वात्कथं तस्य निगमनवाक्या
र्थबोधोत्तरकालीनमहावाक्यार्थबोधहेतुत्वं तथापि उपनयार्थबोधात्पूर्वं उपनयघटकपदार्थानां निगमनघट
कपदानां च समूहालंबनं स्मरणं ततउपनयवाक्यार्थबोधस्य निगमनघटकपदार्थस्मरणस्य च सामग्र्याः सत्वेऽ
नुभवसामग्र्या बलवत्वात् उपनयवाक्यार्थबोधः ततः स्थितिक्षणे च द्वितीयेन निगमनघटकपदस्मरणेन तदर्थस्मरणं
कार्यं काले पदज्ञानस्याभावेपि पूर्वक्षणे तत्सत्वात् अयं च क्षणउपनयार्थबोधस्य द्वितीयो निगमनघटकपदार्थस्म
रणस्य प्रथमः तदुत्तरक्षणे मिलिताभ्यामुपनयार्थबोधनिगमनपदार्थस्मरणाभ्यां महावाक्यार्थबोधः अत्र च पदा
र्थस्मरणमविनश्यदवस्थं उपनयार्थबोधश्चाविनश्यदवस्थत्वहेतुः न चोपनयार्थबोधद्वितीयक्षणे तत्स्मरणानुपप
त्या कथं महावाक्यार्थबोध इत्यापदजन्यपदार्थशाब्दधीहेतुत्वादिति वाच्यं तादृशपदार्थज्ञानत्वेन हेतुत्वात् तस्मादनु
भवात्मकत्वेपि ग्रन्थदोषात् विषयांतरसंचारेणैव शाब्दबोधधाराया नानापत्तेरिति प्राचीनमते तिव्याप्तिरित्यर्थः द्वितीयामप २८

पादयति तदादेश्चेति विशेषरूपेणेति बुद्धिस्थत्वेनोपलक्षणीभूयशक्यतावच्छेदकानुगममात्रसंपादकं शक्यतावच्छे
दकं तु घटत्वादिकमेवेत्यर्थः अन्यथा तन्मानयत्तादृशघटत्वादिप्रकारकः शाब्दबोधो न स्यात् किंतु बुद्धिस्थत्वप्रकारकए
वपदार्थोपस्थितिशाब्दबोधो न स्यात् किंतु बुद्धिस्थत्वप्रकारकएव पदार्थोपस्थितिशाब्दबोधयोः समानप्रकारकत्वेन का
र्यकारणभावात् न चैवं शक्यतावच्छेदकनानात्वादनेकशक्त्यापत्तिः शक्यतावच्छेदकतावच्छेदकैक्येन तत्परिहारादिति
भावः समासेति पदजन्येति अनुमितिहेतुतायां तु पदजन्यत्वनिवेशाभावान्न दोष इत्यर्थः ननु तथापि तादृशनिश्चयज
न्यत्वमव्याहतं न च तादृशनिश्चयत्वपर्याप्ते हेतुतावच्छेदकत्वे विवक्षणीये अत्राप्यप्रामाण्यग्रहाभावनिवेशात् व्याप्तिवि
शिष्टपक्षधर्मतानिश्चयत्वमात्रे हेतुतावच्छेदकतायाः अपर्याप्तेरिति अत एव निश्चयत्वघटितधर्मावच्छिन्नकारणताकपरा
मर्षजन्यत्वमस्त्येवेति अतिव्याप्तिर्वारैवेत्यतिव्याप्तिरत आह निश्चयत्वस्येति स्मृतिशाब्दयोः संशयत्वाभावेन तद्घटिता
यो निश्चयत्वनिवेशवैयर्थ्यादित्यर्थः अन्ये तु शाब्दे पदजन्यपदार्थोपस्थितित्वेन न हेतुत्वं ननु वक्ष्यपदर्शितकलायादेः शाब्दवि
षयकत्वापत्तिः स्वजन्यपदार्थोपस्थितिसंबंधे पदज्ञानविरहादेव तन्निरासात् अतः पदार्थोपस्थितित्वेनैव कारणं ननु तत्र
पदजन्यत्वप्रवेशाश्रुत आह निश्चयत्वस्यापाद्यः ननु द्विशिष्टेति रत्वप्रकारतानिरूपितविशेष्यताभिन्नदंडप्रकारतानि
रूपितपुरुषविशेष्यताशालिविशिष्टस्यैवोपस्थितिरीत्या जायमाने रक्तदंडवान्पुरुष इति बोधे दंडत्वधर्मितावच्छेदकी

क्तत्वरक्तत्वप्रकारकोदंडोरक्तइत्याकारकोविशेषणतावच्छेदकप्रकारकबोधोनिर्णीयतेनकारणं दंडोरक्तोनवेत्यादिसं
उं. शयकालेतदनुत्पत्तेः विशेषणतावच्छेदकांशेसंशयात्मकस्यविशिष्टवैशिष्ट्यबोधस्यानुभवविरोधादनंगीकारात् यत्रतद्रु
१५ पदंडस्यदंडेचरक्तत्वस्यवैशिष्ट्यंभासते सविशेष्यविशेषणंतत्रविशेषणांतरमितिविषयताशालीबोधः तत्रपुरुषविशि
15 ष्यतानिरूपितदंडप्रकारतातोरक्तत्वप्रकारतानिरूपितदंडनिष्ठविशेष्यतायाभिन्नत्वात् रक्तत्वस्यविशेषणतावच्छेदकत्वा
भावादुक्तानुभवानुपमर्दोडक्तसंशयात्तेनतरमप्येतदुत्पत्तिः स्वीक्रियतेएवंचवह्निव्याप्यधूमवत्पर्वतवान्देशइतिविशिष्टवै
शिष्ट्यबोधेवह्निव्याप्यधूमविशिष्टस्यपर्वतस्यदेशेवैशिष्ट्यभानात् वह्निव्याप्यधूमवान्पर्वतइत्याकारस्यविशेषणतावच्छेद
कप्रकारकनिर्णयस्यहेतुतानत्रातिव्याप्तिः विशेषणतावच्छेदकतत्स्यानुगतस्याभावेनप्रत्येकमेवहेतुतादितितत्तदित्र
कें प्रसंगाद्विशिष्टवैशिष्ट्यद्वयमन्यदप्युच्यते दंडीदेवदत्तःकुंडलीचत्रदंडधर्मितावच्छेदकीकृतस्यकुंडलस्यवैशिष्ट्यंश्रूय
ते दंडीकुंडलीदेवदत्तइत्यत्रतुदंडकुंडलयोर्युगपद्देवदत्तवैशिष्ट्यंदेवदत्तेश्रूयते तत्रदंडधर्मितावच्छेदकीकृतस्याद्येविशि
ष्टवैशिष्ट्यमिति द्वितीयमेकत्रद्वयमितिव्यपदिश्यतइतिविवेकः आद्येदंडकुंडलान्यप्रकारतानिरूपितविशेष्यत्वमेकं
द्वितीयेभिन्नमितिदिक् समाधत्ते ज्ञानोपरमेपीति ज्ञाननाशेपीत्यर्थः अयंभावः प्रथमंघटइतिज्ञानंततोघटोमदि
ष्टसाधनमितिवाज्ञानोन्तरंइच्छाद्वेषोवा ततइच्छाततयोर्द्वेषद्वेषयतयोर्वानिर्विकल्पकं अर्थवज्ञानना। १५

ष्टः ततो घटमिच्छामि द्वेष्मीति वा । ननु व्यवसायः तत्र घटत्वविशिष्टघटस्य इच्छायां द्वेषे वा वैशिष्ट्यं भासते तत्र विशेषणताव
च्छेदकघटत्वादिप्रकारकज्ञानस्य पूर्वं लक्षणे नाशात्तदभावे ऽपि घटत्वप्रकारतानिरूपितघटनिष्ठविशेष्यताभिन्नविषया
तासंबंधावच्छिन्नप्रकारतानिरूपितेच्छाद्वेषान्यतरविशेष्यताशालिनो ऽनुव्यवसायात्मकस्य विशिष्टवैशिष्ट्यप्रत्य
क्षस्य जायमानत्वात् विशेषणतावच्छेदकप्रकारकज्ञानत्वेन विशिष्टवैशिष्ट्या ऽनुभवत्वेन कार्यकारणभावे प्रमाणा
भावो व्यभिचारात् ननु यत्र घटज्ञानोत्पत्तिद्वितीयक्षणे इच्छाद्वेषयोरुत्पत्तिस्तत्र इच्छादिनिर्विकल्पे तत्पूर्वक्षणे उप
नायस्यैकं घटत्वादिविशिष्टज्ञानस्य सत्त्वादिच्छादिविशेष्यकं घटत्वादिविशिष्टस्योपनीतभानं च तत्र विशेषणतावच्छे
दकप्रकारकोपनीतभानसत्त्वान्न व्यभिचारः इदं च इच्छाद्वेषेच्छाज्ञानस्यापि वैशिष्ट्यग्रहोपपत्त्यर्थः तदनवगाहीच्छांशे
विशिष्टवैशिष्ट्यानवगाहिनो ऽनुव्यवसायो ज्ञानोत्पत्तितृतीयक्षणे व्यवस्थितः तत्पूर्वक्षणे घटत्वादिप्रकारकज्ञानसत्त्वा
त् यत्रास्थितिक्षणावच्छिन्नेन विनश्यदवस्थेन ज्ञानेनेच्छाद्वेषयोरुत्पत्तिः तत्र निर्विकल्पकसमये उपनीतभानसाम
ग्र्याः पूर्वक्षणे ऽनिरितनाप्यभावात्तदनुव्यवसायो न स्वीक्रियते इत्येवेति क व्यभिचारो ऽत आह वस्तुत इति घटं करोमीत्याकार
कस्य घटत्वविशिष्टघटवैशिष्ट्यं कृत्यावगाहमानस्य प्रत्यक्षस्योपनीतभानेनाप्युपपादयितुमशक्यत्वात् कृतेरिच्छानन्त
रोत्पत्तिकत्वनियमान्न व्यभिचारस्तदवारकत्वमित्यर्थः न च कृत्यादिसाधारणाकारात्पूर्वं नियमेन विशिष्टस्य तत्कल्पनात् इ

प्रविशेषणतावच्छेदकप्रकारकज्ञानस्य तत्राव्यभिचार इत्यत आह विशेषणेति विशिष्टेति विशेषणतावच्छेदकप्रकारक
ॐ. संस्कारादित्यर्थः रक्तदण्डवानिति स्मरणे रक्तो दण्ड इत्याकारकविशेषणतावच्छेदकप्रकारकसंस्कारस्य हेतुत्वात् तादृशज्ञा
२८ नत्वस्य संस्कारे विरहात् व्यभिचार इति भावः तत्कारणत्वविशेषणतावच्छेदकप्रकारकगुणत्वेनैव हेतुत्वं विशिष्टवैशिष्ट्य
16 ज्ञाने प्रतिवाच्यं तथा च निर्णयत्वस्य हेतुतावच्छेदककोटावप्रवेशाद्गतमिति हेतुतायां वा निश्चयत्वस्यावच्छेदकत्वात्रव्यभिचारः
इत्याशयवानाह तद्विषयकेति विशेषणतावच्छेदकविशिष्टविषयकेत्यर्थः न्यूनवृत्तेरिति तादृशप्रकारकज्ञानत्वस्य
इच्छासंस्कारादावभावात् तथा च रक्तत्वाभावप्रकारकरक्तत्वप्रकारकत्वेन प्रकारतासंबन्धेन रक्तत्वेन वा हेतुत्वे न तद्गु
णत्वस्यापि प्रवेशो व्यर्थत्वादिति फलितार्थः तत्रैव संस्कारसाधारणरूपेण हेतुत्वे रक्तदण्डवति पुरुषे चक्षुःसंनिकर्षे नि
र्विकल्पकस्यैव विशिष्टबोधः स्यात् अनुद्बुद्धसंस्कारस्य तदुद्बुद्धहेतोः सत्त्वात् एवं रक्तो दण्डो न वेति संशयदशायामपीति चे
त् अत्राहुः तत उद्बोधकाभावविशिष्टसंस्कारत्वाभाववत् यद्विशेषणतावच्छेदकप्रकारकत्वेन हेतुत्वे उक्तसंस्काराभा
वस्य ज्ञानादौ संस्कारत्वाभावादुद्बुद्धसंस्कारे तदुद्बोधकाभाववैशिष्ट्याभावान्न व्यभिचार एवेति न न्यूनत्वमिति प्रत्यक्षेऽपि अनेनैव रूपेण
हेतुत्वमास्तामित्यत आह इच्छादित इति ततो ऽनुमित्यादयानत्साधारणरूपेण हेतुतायां मानाभावात् ननु तथापि
इच्छाद्यन्यतमत्वप्रकारकत्वेनानुमितिं प्रति हेतुत्वमस्त्वतः संस्काराद्वेति संस्कारान्यतमस्यापि निवेशे तादृशसंस्कारा २८

द्विशिष्टवैशिष्ट्यविषयकस्मरणानुपपत्तिरित्यर्थः ज्ञानत्वेनेति ज्ञानत्वघटितनिश्चयत्वेनेत्यर्थः तत्रेति अनुमितिं प्रतीत्य-
र्थः परामर्शानुव्यवसाय इति वह्निव्याप्यधूमवत्पर्वतं जानामीत्याकारके परामर्शमानसप्रत्यक्षे अतिव्याप्तिः विषयता-
यास्तत्र तत्त्वे हेतुत्वात् ननु परामर्शरूपायां वह्न्यनुमितिसामग्र्याः मनःसंयुक्तसमवायरूपायाः परामर्शप्रत्यक्षसाम-
ग्र्याश्च सत्त्वे विषयभेदेऽनुमितिसामग्र्या बलवत्त्वात् वह्न्यनुमितिरेव भवति ननु परामर्शानुव्यवसाय इति कथमति-
व्याप्तिशंकेति चेन्न बाधे सिद्धौ वा तत्संभवात् यत्र परामर्शे द्वितीयक्षणेऽनुमितिस्तृतीयक्षणे विनश्यदवस्थपरामर्श-
स्यानुव्यवसायसंभवाच्चेति भावः समाधत्ते सामान्य इति साक्षात्कारत्वेन विषयत्वेन वा कार्यकारणभावः यत्र लौ-
किकविषयतासंबन्धेन साक्षात्कारस्तत्र तादात्म्यसंबन्धेन विषय इति लौकिकविषयतातादात्म्यसंबन्धौ क्रमेण कार्य-
कारणतावच्छेदकाविति भावः अतीतादीनामलौकिकप्रत्यक्षे व्यभिचारवारणाय कार्यतावच्छेदकसंबन्धे कोटौ लौकि-
कत्वनिवेश इति भावः नन्वनुगतविषयत्वसंबन्धेन घटज्ञानविषयत्वमेव ज्ञानत्वेनानुगतेनतदिति वाच्यं इच्छाविषयत्वे प्रमेयमित्या-
दिप्रत्ययादिज्ञानविषयत्वस्य कारणतावच्छेदकमादाय विनिगमनाविरहात् अत आह तत्तदिति केचित्तु प्रत्यक्षीयलौ-
किकविषयतावत्त्वरूपविषयत्वेन कारणतावच्छेदकं कार्यताघटितत्वात् रूपादिहेतुत्वविलयापत्तेरत आह तत्तदिती-
त्याहुः तत्तद्घटप्रत्यक्षत्वेन तत्तद्घटत्वेन विशिष्यैव कार्यकारणभाव इत्यर्थः ननु च द्विशेषयोः कार्यकारणभावस्तत्रा

उ॰
१७
17

मात्मयोरपी निव्याप्तेः रतज्ज्ञानत्व प्रत्यक्षे तज्ज्ञान व्यक्तित्वेन हेतुत्वे परामर्शप्रत्यक्षे परामर्शत्वेनापि हेतुत्वं स्यादित्यत आह कदाचि
दिति अप्रयोजिकायाः अपितव्याप्तेः लीकारे इत्यर्थः नव्याप्तिज्ञानत्वेनैव तद्धेतुत्वेन तत्परामर्शत्वेन गौरवात् अत एव तदुक्तव्या
प्तौ वाचके वितिनुक्तमित्यर्थः व्याप्तिप्रकारकत्व पक्षधर्मताविषयकत्व संख्यायात्मतज्ज्ञानत्वानां वत्तृणां परामर्शघटकानां साम्य
लाभाय मैत्रावलोकितत्वे वेश्च निमित्तत्वे नीलेनरतेचरत्वेचेति वत्तद्रूपेण निर्दिष्टे विशिष्टस्मरणद्वितिवह्निव्याप्यधूमवान्पर्वत इति
स्मरणे वह्निव्याप्यधूमवान्पर्वत इति निर्णयस्य हेतुतानुपेक्षान्यत्वेनेति उपेक्षान्यत्व विशिष्टवह्निव्याप्यधूमवत्पर्वत निश्च
यत्वेन तादृशस्मृतेर्हेतुत्वे अनुमितिहेतुतायां तदुपेक्षान्यत्वनिवेशाभावादुभयत्रैकरूपेण हेतुताभावान्नातिव्याप्तिरित्यर्थः
उपेक्षाप्रतियोगिकभेदवत्त्वरूपस्य उपेक्षान्यत्वस्य निवेशे उपेक्षाघटकभेदस्य भयभेदस्योपेक्षायामपि सत्त्वादुपेक्षात्मकज्ञानाद
पि स्मृत्यापत्तिरत उपेक्षात्वावच्छिन्नप्रतियोगिताकभेदवत्त्वरूपेत्तद्भेदवत्त्वं प्रतियोगितावच्छेदके योपेक्षात्वे उर्वत निमित्ताशय
वानाह उपेक्षात्वे हीति चाक्षुषत्वमिति उपेक्षात्वं विहाय चाक्षुषत्वमनुपेक्षात्मकचाक्षुषे चाक्षुषत्वं विहायोपेक्षात्वमनुपेक्षात्म·
कस्पार्शने उपेक्षात्मकस्पार्शने उपेक्षात्मकचाक्षुषे उपेक्षात्वं चाक्षुषत्वं चेति संकरः इत्यर्थः एवं स्पार्शनत्वेनापि योज्यम्
ननु चाक्षुषत्वादिव्याप्यमुपेक्षात्वं नानैव न चाक्षुषत्वमेव नानेति विनिगमनाविरहः चक्षुरादिकार्यकारणभावग्रहा
पत्तेः अतो न संस्कारः नैवमप्युपेक्षान्यत्वेन हेतुतानुपपत्तिः अनुगतोपेक्षात्वाभावेन तदवच्छिन्नप्रतियोगिताकभेदनिवे· १७

णासंभवादितिवाच्यं उपेन्द्राभेदकूटस्यैवस्पष्टं प्रतिहेतुतायांनिवेशात् अतआह औशिकत्वेति एकमेवज्ञानेकिंचिद्विषयो
शेउपेन्द्रा किंचिद्देशत्वपेन्द्रौतद्दर्शनात् जातेरपिकापिबाधानंगीकारात् नचौशिकत्वेनजातिबाधकं व्यक्तेरभेदस्तुल्यत्वं
संकरोथानवस्थितिः रूपहानिरसंबंधो जातिबाधकसंग्रहः इत्याचार्यैः षण्णामेवपरिगणितत्वात् अयंवात्रार्थः आकाशत्वे
नजातिः उभयावृत्तित्वात् तत्त्वघटत्ववत् एतद्घटभेदोऽयं घटे एतद्घटभेदप्रतियोगित्वेतद्घटेतरद्रव्यत्वं घटे चघटत्वस्य
सत्वाडभयसंबंधेनघटत्वादिर्नानाव्यक्तिवृत्तिधर्मः तदत्यन्तमाकाशत्वेप्यस्ति घटवृत्तिभेदप्रतियोगितावच्छेदकप्रतियोगिकभेदव
त्तिवाकशत्वस्यसत्वेपिउक्तसंबंधेनाकाशेभेदवत्वाभावात् कलशत्वेनघटत्वातिरिक्ताजातिः तेनसहन्यूनानतिरिक्तवृत्तित्वात्
संकरउक्तः घटत्वादिजातौ नजातित्वंजातिः अनवस्थापत्तेः नवजातित्वस्यैकव्यक्तिकत्वमेवात्रबाधकमितिवाच्यं घटत्वा
दिजातिमादायानेकव्यक्तिकत्वोपपत्तेः विशेषत्वेनजातिः सजातीयमात्राद्विशेषाणामव्यावर्तकत्वापत्तौ विशेषाणामेवप्रमा
णाभावादसिद्धिप्रसंगात् सजातीयानामपिव्यावर्तकत्वोपगमे तत्तद्रूपवत्त्वादिभिरेवपरमाणूनांपरस्परव्यावृत्तिसिद्धेः
अभावेअभावत्वंनजातिः समवायरूपसंबंधाभावात् औशिकत्वेचनाद्योक्तमितिचेत्सत्यं आचार्योक्तेरुपलक्षणमात्रत्वा
त् प्रामाणिकानामव्याप्यवृत्तित्वेऽपिजातित्वव्यवहाराभावात् अन्यथासंकरस्यापिदूषकताबीजाभावाद्बाधकत्वप्रसं
गात् इत्येके अपरेतुसंकरेचैतदभावात् स्वसमानाधिकरणात्यन्ताभावप्रतियोगिनिष्ठाभावोभयसामानाधिक

रणपकतत्स्यसंकरत्वरूपात् नचोभयाभाववान्मिभारायचूद्रत्वादेरपि सांकर्यवारणाय प्रति योगिव्यधिकरणस्याभावविशेषण
ॐ तावच्छेदकतेउपेक्षात्वस्य समानाधिकरणात्यंताभावस्य कथं उक्तसंकरघटकत्वमिति वाच्यं वैशिष्ट्यावासज्यवृत्तिधर्मान
१८ वच्छिन्नप्रतियोगिताकत्वस्यैवात्यंताभावे निवेशादित्याहुः तादृशादिति प्रवृत्तिनिवृत्त्यजनकात् अजिज्ञासितविषयका
196 देत्यर्थः समुत्पन्नेरिति तस्योपेक्षारूपत्वे तत्तदनुत्पन्ने रूपेक्षात्मत्वेन स्मृतिहेतुत्वादित्यर्थः रूपांतरापरिचयादन्योन्या
श्रयादिति उपेक्षात्मत्वज्ञाने संस्कारजनकत्वज्ञाने तस्मिंश्च संस्काराजनकत्वरूपोपेक्षात्वघटितोपेक्षात्मत्वज्ञानेऽन्यो
न्याश्रय इत्यर्थः रूपापरिचयादितिपाठांतरम् संस्काराजनकतावच्छेदकधर्मश्च स्मृत्तरूपसंस्काराजनकत्वाजनकता
वच्छेदकरूपज्ञानेविनानुपपन्नमित्यर्थः ननु संस्काराजनकात्मत्वमेव तथास्यादत आह अन्योन्याश्रयादिति ननूपे
क्षात्वस्यानुगतस्य दुर्वचतया तदवच्छिन्नप्रतियोगिताकैकभेदनिवेशानुपपत्तावपि वस्तुगत्या यावंत्युपेक्षात्वानानि तेषां
तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटस्यैवानायत्या निवेशोस्त्वित्यत आह संस्काराजनकस्यैवेति अस्मरणे भवन्
ति उपेक्षात्मस्थले इति विशेषः तथाच संस्कारं प्रति हेतुतायामेवैकोपेक्षात्मत्वेन निवेशे ननु स्मृतिं प्रति तस्यानव्यविनिगम
काभावः संस्कारहेतुतायां तन्निवेशे तज्ज्ञानेन संस्कारव्यक्तिकल्पने गौरवादिति भावः नाप्यनुभवत्वेनेति तथाच कारणताव
च्छेदकभेदानातिव्याप्तिः नचानुमितावप्यनुभवत्वेनजनकत्वं स्मरणात्मकपरामर्शादिपञ्चानुमितिहेतुत्वेनेतिशंकार्थः १८

सकृदिति एकवारमनुभूतस्य वस्तुनो द्वितीयादिस्मरणं न स्यात् ननु प्रथमस्मरणं यत्रा तत्र संस्कारनाशो न भवति किं
तु चरमस्यैव तथा च सकृदनुभवजन्यसंस्कारादेव द्वितीयादिस्मरणोपपत्तिरित्यत आह संस्कारस्येति स्वजन्यप्रथम
स्मरणेनैव तज्जनकसंस्कारनाशे तदुत्तरं च तद्विषयकानुभवान्तराभावेन तद्विषयकस्मरणान्तरं न स्यात् अननुभवेन संस्का
रजनकतायास्त्वयास्वीकारात् स्मरणात् संस्कारानुपपत्तेः अस्माकं तु ज्ञानेन संस्कारजनकतात् प्रथमस्मरणजन्यसंस्का
रेण द्वितीयस्मरणोपपत्तेरित्यर्थः ननु यत्र घटपटोभयविषयकसमूहालंबनात्मक एव संस्कारो जातः तत्र घटमात्रोद्बोध
कसमवधानदशायां कदाचित् घटमात्रस्मरणं कालान्तरे तद्बोधकवशात् पटस्मरणमित्यनुभवसिद्धं तत्र संस्कारस्य
फलनाश्यत्वेनुपपत्तेः प्राथमिकघटस्मरणादेव समूहालंबनसंस्कारनाशे प्रतितादृशस्मरणे हेतुः एवं पटादिस्थले
पि उक्तसमूहालंबनस्य च नाश्यतावच्छेदकद्वयाक्रान्तत्वात् एकमात्रविषयकस्मरणान्नाशः न चैवं तस्य नाश एव न स्यात्
उक्तस्थले नाशकस्मरणद्वयस्य मिलनाभावादिति वाच्यं निर्वेतस्मरणद्वयेन कालेन वा तन्नाशोपपत्तेरिति भावः अत्रेतत
त्रसंस्कारद्वयमेव न तु समूहालंबनमेकः ततो नोक्तानुपपत्तिरित्याहुः ननु तत्कारकसंस्कारनाशेन तादृशस्मरण
त्वेन कार्यकारणभावे घटस्मरणेन स्वजनकस्यैव स्वजन्यस्यापि संस्कारस्य नाशः स्यात् न चेष्टापत्तिः तस्य त्रिक्षणिक
त्वापत्तेः अत्र केचित् स्मरणद्वितीयक्षणोत्पन्नसंस्कारस्योक्तरीत्या नाशापत्तौ तृतीयक्षणोत्पन्नसंस्कारान्तरादेवाग्रिमतत्स्म

उं॰ १५

रणामुपपाये नहि तस्यापि नाशः संभवति यतः स्मरणोत्पत्तिः द्वितीयक्षणे पूर्वसंस्कारनाशसंस्कारान्तरोत्पत्ती तृतीयक्ष
णे पूर्वक्षणोत्पन्नसंस्कारनाशः संस्कारान्तरोत्पत्तिस्तत्पूर्वक्षणे स्मरणस्यासत्त्वात् इत्याह अन्येति विनश्यदवस्थमेव ज्ञाने
संस्कारजनकं अन्यत्र हि द्वितीयक्षणे संस्कारोत्पत्तिः किं तु तृतीयक्षण एव तस्य च स्मरणान्नाशः संभावित एव संस्कारो
त्पत्तिक्षणे स्मरणनाशेन संस्कारद्वितीयक्षणात्पूर्वक्षणे स्मरणस्यैवासत्त्वात् न च द्वितीयक्षणे संस्कारोत्पत्तौ बाधकाभावः
समानप्रकारकसंस्कारं प्रति समानप्रकारकसंस्कारस्य प्रतिबन्धकत्वकल्पनात् स्मृत्युत्पत्तिक्षणे च तज्जनकसंस्कारस्य स
त्त्वादित्याह ननु तथापि फलकालसंस्कारादीनां संस्कारनाशे परस्परं व्यभिचार इति चेत् मैवं तन्नाश्यतावच्छेदकजाती
नां संस्कारेष्वसांकर्यात् विजातीयविजातीयसंस्कारनाशं प्रति तेषां हेतुत्वात् समूहालंबनादीनामपि परेण एकविशेष्य
कनानाप्रकारकविशिष्टज्ञाने संग्राह्ये ननु अन्त्यसंस्कारस्य स्वजन्यचरमस्मरणादेव नाशोऽस्त्वत आह जायते चेति दार्ढ्या
त्झटितिस्मरणकल्पसंस्कारनिष्ठो जातिविशेषः भावनायाः पटुतरभावनाजनकत्वस्य भाष्यकृतोक्तत्वादिति भावः ननु
तत्र मानाभावः झटितिस्फोटकसमवधानादेव झटिति स्मरणोपपत्तेः पुनः पुनः स्मरणोत्तरकालीनसंस्कार एव फलबलात्
कल्पनादत आह परिशिष्य चेति तत्प्रकारकानुभवत्वेन हेतुतायां स्मरणस्य संस्कारजनकत्वसंदेहाद्व्यभिचारसंदेहः अ
तस्तत्संदिग्धव्यभिचारकत्वान्निश्चिताव्यभिचारकत्वेन तत्प्रकारकज्ञानत्वमेव संस्कारहेतुतावच्छेदकं कल्प्यत इत्यर्थः उ १५

दमेवेति निश्चितायभिचारकत्वमेवेत्यर्थः अन्यत्रेति प्रत्यक्षादावित्यर्थः इष्टतावच्छेदकं प्रवृत्तिविषयश्चेत्युभयवैशिष्ट्यावगाहि
ज्ञानत्वेन तत्र कारणता न त्विष्टतावच्छेदकप्रकारकप्रवृत्तिविषयविशेष्यकज्ञानत्वेन अत्र रजनत्वमित्यस्यासंग्रहात् उभयवैशि
ष्ट्यावगाहित्वेन यथोक्तस्योद्बोधकत्वमित्यस्य च संग्रहादिति भावः न स्मृतेः संस्कारजनकत्वेन सिद्धान्तसिद्धमित्याशंक्याह अ
भिहितत्वेनेति स्वकार्येति पदवाच्ये वैशिष्ट्ये मिलितानां महावाक्यार्थबोधो न संभवति तावज्जन्यस्मृतौ नो मेलकाभावादिति टीकाफक्किकार्थः
अत्र स्वजन्यसंस्कारनाशपदस्य स्मरणानुकूलतया स्पष्टमेव स्मृतेः संस्कारजनकत्वलाभादिति भावः एवं विशिष्टस्मरणेऽतिव्याप्ति
रिति सर्वपदैः सिद्धे प्राचां मतेन समाधत्ते चरमेति तथा च व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यानुभवत्वस्य विशिष्टस्मरणे असत्त्वा
न्नातिव्याप्तिरित्यर्थः साक्षादिति व्याप्तिविशिष्टपक्षधर्मताज्ञानसाक्षाज्जन्यज्ञानत्वं लक्षणे विशिष्टस्मरणे चोक्तज्ञानस्य संस्का
रद्वारा हेतुत्वात् साक्षाज्जन्यत्वं नास्तीत्यर्थः कश्चिदित्यस्वरसः तथा हि सिद्ध्यनन्तरं परामर्शोपनीतद्वितीयक्षणे सोत्तरवर्त्तियो
ग्यविभुविशेषगुणविधया परामर्शात्सिद्धिनाशः ततो विनश्यदवस्थपरामर्शेणानुमितिस्तत्र व्याप्तिः परामर्शजन्यायाः सिद्धिना
शस्य जन्यत्वादनुमितेः तज्जन्यजन्यत्वरूपसाक्षाज्जन्यत्वाभावात् न च तज्जन्यसंस्कारजन्यत्वं तदिति वाच्यं अनुभवत्वजात्यवच्छिन्नपर
तया पूर्वलक्षणत्वात् तदनङ्गीकारेणाह किं वेति व्याप्यविशेष्यकात् वह्निव्याप्यधूमः पर्वते इत्यादेः वह्निव्याप्तिविशिष्टधूमवत्तधर्मि
तावच्छेदकीकृत्य पर्वतवह्नित्वप्रकारकात् पक्षविशेष्यकात् वह्निव्याप्यधूमवान् पर्वत इत्यादेः तदुभयेति व्याप्तिपक्षधर्मताभय

ॐ २ 20

वैशिष्ट्यावगाहिनिश्चयत्वेनेत्यर्थः तद्देवेति उक्तनिश्चयजन्यज्ञानमित्थं वानुमितिलक्षणं कार्यमित्यर्थः ननूक्तरीत्या हेतुत्वम
युक्तं व्याप्यपक्ष इति ज्ञानादप्यनुमित्सापत्तेः पक्षनिष्ठाधारत्वावगाहित्वेन तत्र पक्षे व्याप्य इत्यतोनुमित्यनुपपत्तेः व्याप्यनिष्ठा
धेयत्वावगाहित्वेन तत्र व्याप्यवान्पक्ष इत्यस्मादनुपपत्तेः सत्से व्याप्यनिरूपितपर्वतनिष्ठाधेयत्वावगाहित्वेन हेतुत्वे आधारा
धेयत्वयोरन्यतरत्वविनिवेशतयोभयथापि तत्प्रतीतेरिति केचित् अन्येतु प्राहुः स्थले आधेयत्वमेव सत्तम्यर्थः तत्त्वविनिवेशते
वक्ष्याहृदा नास्ति अतो नेदं युक्तं किंतु व्याप्याभाववान्पक्षः पक्षेन व्याप्य इत्याकारकस्य हृदालंबन विरोधित्वेन द्वयोरनुगम
तात्पर्यमित्याहुः ननु भयस्तावपि अनेनैव रूपेण न्यायमिमाशंक्याह एकतरेति व्याप्यविशेष्यकज्ञानाद्व्याप्यविशे
ष्यकमेव पक्षविशेष्यकाच्च पक्षविशेष्यकमेव स्मरणं जायते अतो वह्निव्याप्यधूमवान्पर्वत इति स्मरणे तादृशस्य वह्नि
व्याप्योधूमः पर्वते इति स्मरणे च तादृशस्यैव ज्ञानस्य हेतुत्वं ननूक्तानुगतरूपेति नातिव्याप्तिरित्यर्थः अन्यथेति विशिष्ट
हेतुतावच्छेदकस्येत्यर्थः स्मरणद्वयेप्युक्तानुगतरूपेण हेतुत्वे पक्षविशेष्यकस्मरणदशायामपि व्याप्यविशेष्यस्मरणा
पत्तिः सामग्रीसत्वात् अनियमेनेति पाठे एकतरविशेष्यकस्मरणमात्रोत्पत्तौ नियामकाभावेनेत्यर्थः ननूक्तविशेषकार
णाभावकल्पनेनान्तरं उक्तानुगतरूपेण सामान्यकार्यकारणभावः कल्पनीयः अत आह समानेति समानविशेष्यकस्म
मानाप्रकारकताभ्यां ज्ञानस्मरणयोः कार्यकारणभावः ततः उक्तरीत्या विशेष्यकल्पनेन तथाविधसामान्यकार्यकारण २०

भावा वृत्त्यवच्छिन्नसमानविशेष्यकप्रकारकत्वेन कार्यकारणभावानन्तरमनुगतरूपेणेत्यर्थः एवं चेति व्याप्तिपक्षधर्म
ताभयवैशिष्ट्यावगाहिज्ञानत्वेनानुमितिप्रतिहेतुत्वे इत्यर्थः वह्निव्याप्यधूमवत्पर्वतवानित्याद्याकारविशिष्टवैशिष्ट्यबोधे वह्निव्या
प्यधूमवान्पर्वत इति विशेषणतावच्छेदकप्रकारकनिर्णयस्य अनुमितिजनकतावच्छेदकीभूतानुगतरूपेण हेतुत्वाभा
वात् अन्यथा वह्निव्याप्यो धूमः पर्वतश्चेति ज्ञानेऽपि वह्निव्याप्यधूमवत्पर्वतवानित्याकारविशिष्टवैशिष्ट्यबोधा
पत्तेरित्यर्थः वस्तुतस्त्वादिति पूर्वोक्तरीत्या व्याप्तिप्रकारधीविरोधीविषयत्वेनान्वयव्यतिरेकव्याप्तेः अनुगमस्य तद्धर्मप्रकार
कपक्षधर्मताज्ञानत्वेनानुमितिहेतुत्वे स्मरणादौ नातिव्याप्तिशंका स्मरणेऽपि स्वस्य विशिष्टवैहेतुत्वावश्यकत्वात् अ
न्योन्याभावगर्भव्याप्तिज्ञानादन्यत्वाभावगर्भव्याप्तेः स्मरणादित्यर्थः अत एवेति उक्तानुगतरूपावच्छिन्नहेतुत्वनिवे
शादेवेत्यर्थः वह्निव्याप्यवान्पर्वतो नास्तीति ज्ञाने वह्निव्याप्यवान्पर्वत इत्यस्य पर्वते वह्निव्याप्यधूमाद्यस्य स्मृत ज्ञान
स्य हेतुत्वेऽपि नातिव्याप्तिः प्रतियोगिज्ञानस्य तत्र विशिष्टवैहेतुत्वात् अन्यथा व्याप्यवत्त्वज्ञानानन्तरं वह्निव्याप्याभाववत्त्वाप्र
त्यक्षस्य पक्षे वह्निव्याप्यज्ञानाद्व्याप्यवत्त्वस्य प्रसंगात् अपि शब्दोऽतिव्याप्तिशंकायामस्वरससूचनार्थः व्याप्यवह्नि
त्वप्रतियोगिकाभावस्यातीन्द्रियत्वात्प्रत्यक्षानुपपत्तेः प्रतियोगितावच्छेदकप्रकारकज्ञानहेतुतायां निश्चयत्वाप्रवेशाच्च ज्ञा
नत्वेन हेतुत्वकल्पनादेव निर्विकल्पकोत्तरमभावप्रत्यक्षवारणात् ननु भ्रमवैशिष्ट्यावगाहित्वेन न हेतुत्वं अप्रमाणज्ञाना

ॐ. नां पृथगभावनिवेशानुरोधेन व्याप्यविशेष्यकपक्षविशेष्यकज्ञानयोः पृथगेव हेतुत्वादित्यत आह व्याप्ति
२१ विषयकत्वेनेति पर्वतो वह्निमानित्याद्यनुमितौ व्याप्तेरविषयत्वात् लिङ्गोपधानस्य निरस्तत्वात् अतिव्याप्तिस्थलेषु
तु सर्वत्र जन्यज्ञानस्य व्याप्तिविषयकत्वान्नातिव्याप्तिरित्यर्थः एतेनेति व्याप्यविषयकत्वविशेषणेनेति निरस्तमित्य
न्वयः निरसनीयमाह स्मृतिप्रतीत्यादिनातिव्याप्तिरित्येतेन तस्य वायमर्थः व्याप्यवत्पक्षवत्त्वेनेति वह्निव्याप्य
मवत् पर्वतत्ववान्देश इत्याद्यवित्यर्थः ननु विशेषणतावच्छेदकप्रकारकत्वेन ज्ञानत्वरहितेन विशिष्टवैशिष्ट्यबोधे हे
तुतस्यावश्यकत्वात् कथं तत्रानुमितिलक्षणस्य ज्ञानत्वावच्छिन्नकारणतागर्भस्यातिव्याप्तिरित्याशङ्कायां यथा विशे
षबुद्धौ विशेषणज्ञानहेतुतायां ज्ञानत्वप्रवेशस्तथा विशिष्टवैशिष्ट्यबुद्धौ विशेषणतावच्छेदकप्रकारकज्ञानहे
तुतायां इत्युपपादयितुं विशिष्टबुद्धौ विशेषणज्ञानहेतुत्वमुपपादयति स्मृतिप्रतीतिहेतुत्वस्येति यद्वद्यस्य
स्मृतेश्च तस्य च कल्पनादित्यनेनान्वयः तथा च विशिष्टानुभवे साक्षादेव विशेषणज्ञानस्य हेतुत्वे विशिष्टस्मर
णे च संस्कारद्वारेति विशेषणज्ञानस्य विशिष्टज्ञानहेतुतावत्त्वस्यापि अनुभवत्वाभावावच्छिन्नत्वलक्षणव्याप्यत्व.
सत्त्वात्तदाऽदायातिव्याप्तिः अनुभवत्वनिष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वस्य तदर्थत्वात् जातिमत्त्वमपि
समवायेन वोध्यं अन्यथा अनुमितित्वजातेरपि कालिकेन घटादौ सत्त्वादतिव्याप्तेः एवं चेति जातिगर्भलक्ष २१

णकरणेनेत्यर्थः नन्वातिरिति अन्वयव्याप्तिज्ञानजन्यानुमितिवृत्तिमनुमितित्वजातिमादाय व्यतिरेकव्याप्तिज्ञानजन्या
नुमितावपि लक्षणगमनादव्याप्तिरित्यर्थः एतदपेक्षालाघवादाह पर्वतवह्नीति पर्वतवह्निव्याप्यवैशिष्ट्यावगाहि
निश्चयत्वावच्छिन्नप्रकारणताप्रतियोगिककार्यतावच्छेदका ज्ञानवृत्तिर्या जातिस्तद्वत्त्वमेकलक्षणे अत्रोक्तकार्यता
वच्छेदकजातिमत्त्वोक्तौ कार्यतावच्छेदकवह्न्यनुमितित्वकोटिप्रविष्टवह्नित्वादिजातिमादाय वह्न्याद्यावतिव्याप्तिः कार्यता
वच्छेदकत्वपर्याप्त्याश्रयत्वविवक्षायां तु अनुमितित्वमात्रस्यातथात्वादसंभवापत्तेः अतो ज्ञानवृत्तित्वं जातिविशेषणं न तु
धूमपरामर्शस्य कार्यतावच्छेदकं न वह्न्यनुमितित्वमात्रं आलोकलिङ्गकानुमितौ व्यभिचारात् किंतु स्वाव्यवहितोत्तरत्वसं
बन्धेन धूमपरामर्शविशिष्टानुमितित्वं तथा च परामर्शत्वस्य ज्ञानघटितत्वात्कार्यतावच्छेदककोटिप्रविष्टज्ञानत्वजाति
मादाय ज्ञानमात्रेऽतिव्याप्तिः ज्ञानवृत्तित्वविशेषणेन ज्ञानत्वजातेर्व्यावर्तितत्वादत आह सामानाधिकरण्येनेति तथा च
ज्ञानवृत्तीत्यपहाय पूर्वोक्तकार्यतायाः सामानाधिकरण्येनावच्छेदिका या जातिस्तद्वत्त्वं लक्षणमित्यर्थः तदर्थश्च
कार्याधिकरणवृत्तित्वे सत्यवच्छेदकत्वं कार्यताधिकरणे नियमतः प्रकारीभूय भासमानत्वमिति यावत् नन्वेवमपि
नैतल्लक्षणे पर्वतवह्निव्याप्यवैशिष्ट्यावगाहित्वेन कारणतायाः प्रागेव निरासादत आह वह्निव्याप्यवदिति अत्रापि ज्ञान
वृत्तित्वं पूर्वोक्तस्वरसेन सामानाधिकरण्येनेति योजनीयं व्याप्यविषयकेति पूर्वोक्तातिव्याप्तिवारणार्थं तस्यैवलाय

उ॰
२२

वार्थनिष्कर्षमाह व्याप्तिमानेऽइति सम्महालेवनरीत्याविशिष्टस्यैवव्याप्तिमत्त्वेभासमानत्वादवश्यमित्युक्तं व्याप्तिविषयतानियत
विषयताकमित्यर्थः साध्यतावच्छेदकसाध्ययोर्वारणार्थमुक्तापराणामित्यविषयइति यन्निष्ठविषयतावच्छिन्नाकारणताल
क्षणेनिवेश्यते तज्जन्यानुमित्यविषयइत्यर्थः सत्वार्थोऽभावोधिकरणत्वंवृत्तित्वंप्रतियोगित्वेहेतु स्वपदत्वस्यतमाविषयक
त्वेनिविष्टलक्षणेनीत्यर्थः नन्वव्यवहितोत्तरत्वसंबंधेनधूमपरामर्शवदनुमितित्वं नधूमपरामर्शजन्यतावच्छेदकम्
अव्यवहितोत्तरत्वस्याननुगमात्तत्संबंधेनतमानाभावाच्च किंतुतत्परामर्शोत्तरत्वव्यक्तित्वेकार्यतावच्छेदकंतत्रचानुमि
तित्वंनतिष्ठमिति उक्तलक्षणानामसंभवइत्यतआह योकोविदिति एकत्राह्निकयात्रनुमितिव्यक्तेरुपादानात्प्रसक्ता
दावतिव्याप्तिः प्रत्यक्षत्वादेरपिकालिकादिनानुमितिवृत्तित्वादतिव्याप्तिः स्यादतः समवेतेति अनुभवत्वमादायप्रत्य
क्षत्वादौतद्वारणाय अनुभवत्वान्यजातित्वमादायतद्वारणाय अनुभवान्यासमवेतेति तस्यस्मरणेपिसमवेतत्वात्
नदोषः अनुमितित्वस्यापिकालिकेनप्रत्यक्षत्वादिवृत्तित्वात्तद्वारणायसमवायित्वमिति समवायेनयथोक्तधर्मवत्त्वमित्यर्थः
नन्वत्रानुभवत्वान्यत्वेनानुभवप्रतियोगिकभेदवत्वं अनुभवत्वेचघटभिन्नत्वेतदुभयभेदस्यानुभवत्वेपिसत्वात् किंत्वनुभवत्व
त्वावच्छिन्नप्रतियोगिताकभेदवत्त्वमेव तथाचानुभवेतरासमवेतत्वेसतिसकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिता
कभेदलाभेप्रतियोगितावच्छेदककोटौसत्यंतनिवेशप्रयोजनाभावात् सकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिता २२

कभेदस्यैव निवेशात् तस्य च ज्ञानत्वाद्यवभावात्तद्वारणासिद्धेः अनुभवान्यासमवेतत्वस्यैवार्थः इति चेन्न विशिष्टावच्छिन्नप्रति
योगिताकस्य विशेषणावच्छिन्नप्रतियोगिताकस्य च भेदस्यातिरिक्ततया सत्वेन तस्यापि तत्प्रतियोगितावच्छेदकतया निवेशो
ऽविशेषाभावघटकतया वैयर्थ्याभावात् ज्ञानत्वस्य चानुभवेतरसमवेतत्वेन विशिष्टभेदानाश्रयतया तद्वारणार्थं अनुभवेतरासम
वेतत्वनिवेशस्य लक्षणे युक्तत्वात् इति केचित् अनुभवत्वस्वरूपत एवान्यासम्याभावे प्रकारः जातेः स्वाश्रयतादात्म्यसंबंधावच्छि
न्नैव निरवच्छिन्नाप्रकारतेति नियमानभ्युपगमादित्यन्ये अनुभवपदवाच्यतावच्छेदकतावच्छिन्नप्रतियोगिताकभेदानिवेश
इत्यपरे तन्नायाऽपि स्वरूपतो भानमवच्छेदकत्वेनाभ्युपगम्य तदवच्छिन्नभेदनिवेशादिति केचित् अन्ये तु तद्व्यक्तिसमवेता
नुभवत्वान्यधर्मसमवायित्वमेकलक्षणे अत्र सकलानुभवसमवेतत्वावच्छिन्नप्रतियोगिताकभेदानिवेशादेव ज्ञानत्वादे
र्निरासः तद्व्यक्तिसमवेतानुभवान्यासमवेतधर्मसमवायित्वं द्वितीये न वा यावदनुभवत्वमादायातिव्याप्तिः अनुभवविभाज
कधर्मावच्छिन्नप्रतियोगिताकभेदवत्त्वस्य समानाधिकरणत्वन्निवेशात्तद्वारणादिति प्राहुः विशेषणतावच्छेदकप्र
कारकनिश्चयस्य विशिष्टवैशिष्ट्यानुभवत्वकार्यतावच्छेदकमिति तद्घटकतया अनुभवत्वजातिसिद्धिमिति वोध्यं तदंगीका
रेणाह अनुभवत्वेति प्रत्यक्षातिरिक्तायामनुभवत्वजातौ प्रमाणाभावादित्यर्थः ज्ञानत्वस्य स्मरणासमवेतत्वेनैव प्रत्यक्षत्व
स्य च तद्व्यक्तिसमवेतत्वेनैव वारणादिति भावः अत्रापि स्मरणासमवेतानुभवत्वान्यधर्मसमवायित्वे तादृशप्रत्यक्षासम

ॐ. २३ वैतेनतद्व्यक्तिसमवेतधर्मसमवायित्वादिकं लक्षणं कार्यमित्याहुः अन्यमतेत्याह व्याप्तिज्ञानेनेति अत्रावच्छिन्नोनस्य द्वितीयकार्यता-
याभेदान्वयः व्याप्तिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यतानवच्छेदकानुभवत्वव्याप्यजातिमतोऽसौ वह्निव्याप्यो धूमइत्या
दिप्रत्यक्षस्येति व्याप्तिः परामर्शत्वावच्छिन्नत्वादिमात्रोऽसौ वह्निव्याप्यधूमवत्पर्वतवान्देशइत्यादिविशिष्टवैशिष्ट्यबोधहेतुनिकार्यताऽ
23 धिकरणहेतुप्रत्यक्षत्वजातिमादायातिव्याप्तिः वह्निव्याप्यधूमवान्पर्वतइतिविशेषणतावच्छेदकप्रकारकनिर्णयस्यपरामर्शत्वा
त्मकत्वात् तत्रव्याप्तिज्ञानत्वेनहेतुत्वाभावान्नातिव्याप्तिः अनुमितौतत्करणव्यापारयोरेकधर्मावच्छिन्नप्रतिकारणत्वाभावश्यक-
मितिनासंभवः केचिदित्यस्वरसः तद्बीजेतुव्याप्तिज्ञानस्यस्थानेरसाध्यप्रकारकानुमितित्वेकार्यतावच्छेदकपरामर्शस्यतस्यो
नरपर्वतविशेष्यकवह्निप्रकारकानुमितित्वमित्युभयोर्नैकंकार्यतावच्छेदकंउक्तनियमेमानाभावात् मिश्रमतेत्याह परेत्विति
वक्ष्यमाणपक्षतालक्षणवाक्यघटकपदादेवलाभइत्याह पक्षधर्मतेति पक्षताश्रयस्यपक्षपदवाच्यत्वात् विशेषणतयापक्षतोपस्थि-
तिः विशेषणत्वेवविशेष्यान्वितान्वयित्वेमेवंषष्ठ्यार्थजन्यान्वयस्यपक्षेमत्वादर्थान्पक्षतायामपिज्ञानान्वयइतिपक्षतायास्सहकारित्वेव
क्ष्यमाणेसंगच्छइतिभावः तथाचेतिपक्षताजन्यत्वेसतिपरामर्शजन्यज्ञानेइतिलक्षणमित्यर्थः ननुवह्निव्याप्यधूमवत्पर्वताभाव-
वानितिप्रत्यक्षस्यवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्यविशेषणतावच्छेदकप्रकारकनिश्चयविषयाजन्यत्वान्नातिव्याप्ति
वारणायपक्षताजन्यत्वमेवास्तुकिंपरामर्शजन्यत्वनिवेशनेत्यतआह यथोक्तायाइति सिसाधयिषाविरहविशिष्टसिद्ध्यभा २३

वह्निरूपाया इत्यर्थः पर्वते वह्न्यनुमिति जायतामित्येतादृशेच्छाविरहविशिष्टे पर्वतो वह्निमानिति ज्ञाने तदभावमानसप्रत्यक्षे वि ५८
षयविषयाइच्छाभावस्य हेतुत्वात् ननु यथोक्तपक्षताया अयोग्यतात्र तस्या लौकिकप्रत्यक्षतः सिसाधयिषाविरहस्यैककाला
वच्छिन्नसामानाधिकरण्येन सिद्धौ विशेषणताकालादेः मानसप्रत्यक्षत्वानर्हत्वादित्यत आह विशेष्येति विशिष्टाभावो विशे
ष्याभावप्रयुक्तपर्यवसन्न इत्यर्थः ज्ञानस्य च मानसत्वलौकिकोपपत्तात् तदभावस्यापि तत्त्वात् यद्वा यत्र विषयविशेषे सिसाधयि
षानुमितिरेव नोत्पन्ना ज्ञानं च केवलसिध्यभावप्रयुक्तपक्षतेत्यर्थः आदिपदं विशेषणाभावपरम् यत्र विषयविशेषे सिद्धि
कालप्रयुक्तपरामर्शोऽस्ति सिसाधयिषैवानुमितिर्न तत्र ज्ञानं च सिसाधयिषाविरहाभावप्रयुक्तपक्षता तस्याः सिसाधयिषारूपस्य
लौकिकप्रत्यक्षस्योपपत्तेरित्यर्थः तेनेति परामर्शतेनेत्यर्थः तदुभयेति पक्षतापरामर्शोभयेत्यर्थः एकावच्छेदे
नेति पक्षतायाः परामर्शस्य च कार्यतावच्छेदकैक्यम् विवक्षणीयमित्यर्थः तेन न हेतुताविवक्षाफलमाह तेनेति ।
ननु परामर्शस्य पक्षताप्रयोजनकत्वे कथमित्यत आह प्रतियोगिविषयकेति साध्यनिर्णयाभावरूपायास्तस्याः
प्रतियोगि साध्यनिर्णयः तद्विषयकेत्यर्थः ननु परामर्शस्य वह्निव्याप्यवह्निनिर्णयविषयकज्ञानत्वाभावात्कथं पक्षता
प्रत्यक्षे हेतुत्वमित्यत आह देवादिति वह्निव्याप्यधूमवान्पर्वतो वह्निनिर्णय इति समूहालम्बनस्थले इत्यर्थः ननु
नुमितित्वः भ्रमाभिन्नविषयकस्थले वलवत्तायाः परामर्शस्यैककथं पक्षताप्रत्यक्षत्वमित्यत आह बाधेति आदिपदं प्रत्य

उं॰ २९ तयत्वादिपरं तथा च तत्र प्रतिबंधकसत्त्वान्नानुमितिसामग्रीत्यर्थः तथा चोक्तसमूहालंबने परामर्शस्य वह्निनिर्णयरूपप्र
तियोगिज्ञानत्वेन पक्षताप्रयोजकत्वेऽपि परामर्शत्वेन तदभावान्नातिव्याप्तिरित्यर्थः नव्याभाववह्निलौकिकविषयता
संबंधेन प्रत्यक्षत्वविषयविषयाः कार्यतावच्छेदकं प्रतियोगिज्ञानस्य तु समवायेनाभाववह्निलौकिकविषयताक
प्रत्यक्षत्वमित्युभयत्र कार्यतावच्छेदकभेदादेकावच्छेदेनोभयजन्यत्वविवक्षणादेव नातिव्याप्तिशंकेति वाच्यं पक्षताज
न्यतावच्छेदकधर्मस्य परामर्शजन्यतावच्छेदकत्वमित्यस्य तदर्थत्वात् एकावच्छेदेनेत्यस्य फलमाह तदुभयेति पक्षता
परामर्शोभयविषयके वह्निव्याप्यधूमवत्पर्वतत्वेन ज्ञानवान् वह्निनिर्णयाभाववांश्चाहमित्याकारके इत्यर्थः न
नु परामर्शत्वेन जनकत्वं विवक्षितं तच्च कं स्वप्रत्यक्षे च परामर्शस्य विषयत्वेन हेतुत्वं न तु परामर्शत्वेनेति कथमतिव्या
प्तिशंकेति चेत्तत्त्वं परामर्शत्वे हेतुत्वमित्यभिप्रायेणाऽऽशंकाम्यानादिति चेत् अस्मत्परामर्शप्रत्यक्षस्य वह्निव्याप्यधूम
विशिष्टपर्वतस्य ज्ञानवैशिष्ट्यावगाहितया विशेषणतावच्छेदकप्रकारकनिश्चयरूपपरामर्शस्य तत्वेन जनक
तावच्छेदकोपपत्तिरित्याहुः ननु सामानाधिकरण्यमात्रेण सिद्ध्यभावरूपायाः पक्षतायाः सामानाधिकरण्यमात्राव
गाह्यनुमितित्वं कार्यतावच्छेदकं अवच्छेदकावच्छेदेन सिद्ध्यभावरूपायास्तत्तत्साध्यावच्छेदकावच्छेदेनानुमि
तित्वं परामर्शस्य तूभयसाधारणं पक्षविशेष्यकसाध्यप्रकारकानुमितित्वमेव तदुभयोः कार्यतावच्छेदकभेदादसंभ २९

वइति चेन्न पक्षतावच्छेदकावच्छेदेन सिद्धेरनुमितिमात्रविरोधितया तदभावरूपायाः पक्षतायाः पक्षविशेष्यकसा
ध्यप्रकारकानुमितित्वमेव कार्यतावच्छेदकमिति अवच्छेदकावच्छेदेन सिद्ध्यभावरूपपक्षताया एवात्र लक्षणे निवे
शात् ननु व्याप्तिपक्षतापरामर्शयोरनुगतत्वादेकत्र उपादानेऽपरत्र तज्जन्यानुमितावव्याप्तिरित्यत आह तद्धेतीति
पक्षताजन्यतावच्छेदकावच्छिन्नायाः परामर्शतावच्छिन्नकारणतानिरूपितकार्यतानातत्समानाधिकरणेनानुभवत्वव्या
प्यजातिमत्त्वेलक्षणे न दोष इति भावः तद्विशिष्टमिति तर्हि जन्तसिद्धौ आलोकलिङ्गकानुमित्या यो च सत्या धूमपरा
मर्षादनुमितेरनुत्पत्त्या धूमालिङ्गकानुमित्याविरहविशिष्टसिद्ध्यभावस्य धूमलिङ्गकपर्वतविशेष्यकवह्निप्रकारा
कानुमितित्वे कार्यतावच्छेदके परामर्षस्य तत्सामान्यतः पक्षविशेष्यकसाध्यप्रकारकानुमितित्वकधर्मावच्छेदेनाभ
यजन्यत्वसम्भवे न च धूमासामान्यमात्रलिङ्गकानुमितीच्छासामान्यतो धूमलिङ्गकानुमितौ प्रतिबन्धिका तेन पक्षता
याः कार्यतावच्छेदककोटौ धूमलिङ्गकत्वादेरप्रवेशान्न दोष इति वाच्यं प्रतिबन्धकतानतिरेकल्पनमपेक्ष्य पक्षताकारण
तायां धूमलिङ्गकत्वनिवेशस्य लघुत्वात् किञ्चालोकलिङ्गकानुमितौ व्यभिचारवारणाय धूमपरामर्षजन्यतावच्छेदके
धूमलिङ्गकपर्वतविशेष्यकवह्निप्रकारकानुमितित्वे पक्षतायास्तु पर्वतविशेष्यकवह्निप्रकारकानुमितित्वमेव
तिजन्यतावच्छेदकभेदस्य दुर्वारत्वात् इति चेत् अनेन विषयतया जन्यतावच्छेदकैक्याविवक्षायां नायं दोषः वह्निमत्त्वे

ॐ. २५

तस्यैव विषयतया भयतयोन्यतावच्छेदकत्वात् धूमलिंगकत्वादेरनुमित्यविषयत्वात् अतएव लक्षणे पक्षताजन्य
त्वनिवेशसार्थक्यं अन्यथा अभावजन्यत्वे सतीत्यनेनैव निर्वाहात् न च बाधाभावस्य विशिष्टवैशिष्ट्यबोधे पि हेतुत्वा
त्तादपि व्याप्तिरिति वाच्यं वह्निव्याप्यधूमवत्पर्वतवान्देश इति बोधे वह्निव्याप्यधूमवत्पर्वताभाववान्देश इति बाधाभावस्य
हेतुतायां देशविषयतस्याधिकस्य जन्यतावच्छेदकस्य पर्वतांकोटौ निवेशात् परामर्शजन्यतावच्छेदके च तदनिवेशा
त् अस्मदीत्या तु विषयतयाऽभावजन्यतावच्छेदकस्य पर्वतादेः विषयतया परामर्शजन्यतावच्छेदकत्वात् तत्रातिव्याप्ति
वारणाय पक्षतात्वेन निवेशस्य सार्थक्यात् अतः पक्षताया अनुमितिहेतुत्वानंगीकार एवात्रास्वरसबीजं इत्याहुः
तत्करणमिति व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकरणमित्यर्थः एवं चानुमानमितरेभ्यो भिद्यते व्याप्यादि
ज्ञानजन्यज्ञानकरणत्वादिति उक्तरभेदसाध्यके लक्षणालिंगकमनुमानेपर्यवसन्नं ० अत्र हेतौ वैयर्थ्यमाशंकते
न चेति व्याप्तिज्ञानादित्यैव हेतोः सम्भावात् न तु हेतुतावच्छेदकरूपेण हेतुज्ञानमनुमित्युपयोगि उक्तलक्षणे च
व्याप्तज्ञानत्वेन व्याप्तिज्ञानत्वेनोपस्थितमिति कथं तेनाधिकवैयर्थ्यमित्यत आह तादात्म्येनेति व्याप्तिज्ञानमेव तादा
त्म्येन हेतुः व्याप्तिज्ञानत्वं च हेतुतावच्छेदकमित्यर्थः नन्वनुमानत्वावच्छेदेन उक्तरभेदस्य साध्यतायां व्याप्तिज्ञाना
त्वादिके न हेतुः व्याप्तेरनुगमेन एकसाध्यघटितव्याप्तिप्रवेशेन साध्यकानुमाने हेतोरभावात् आंशिकसिद्धिप्रसंगादित्यत आ २५

हे व्याप्तिरिति अधिकस्येति वह्निव्याप्यवत्त्वेनतन्निश्चयजन्यधूमत्वानुभवत्वव्याप्यजातिमत्करणत्वस्येत्यर्थः भागासिद्धिरिति
पक्षैकदेशे हेत्वभावरूपेत्यर्थः तथा च व्यभिचारवारकताभान्नीलधूमादिवद्व्यर्थविशेषणत्वाडंबरमित्यर्थः व्यभिचार
वारकतान्नैवैयर्थ्यमित्याह फलेति अनुमितिरूपफलोपधायकमेवानुमानपदा: फलोपहितानुमानेन स्वरूपयोग्यानुमा
नेन च प्रतियोगिकभेदरूपसाध्यस्याभाववति स्वरूपयोग्यानुमानेपि व्याप्तिज्ञानत्वादेः सत्वाद्व्यभिचारः स्यात् तद्वारणायो
क्तं हेत्वनुसरणमिति भावः स्वरूपयोग्यस्य लक्षणेपि साध्यकोटौ यदि करणत्वनिवेशेति व्याप्तिज्ञानत्वस्याकरणज्ञानकरणा
त्वसामानाधिकरण्याभावात् करणत्वनिष्ठव्याप्तेर्व्याप्तिज्ञानत्वेनावच्छेदकं किंतु तादृशाकारणत्वत्वमेव अत एव धू
मप्रागभाववत्त्वस्य धूमाहृतित्वात्प्रागभावस्य नैवैयर्थ्यं प्रागभावनिष्ठव्याप्तेरधिकरणेन धूमत्वेनावच्छेदात् समानाधि
करणव्याप्यतावच्छेदकान्तराघटितस्य व्याप्यतावच्छेदकत्वात् नीलधूमादौ तु नीलधूमत्वधूमत्वयोः सामानाधिकरण्याभ
लाघवाद्धूमत्वमेव व्याप्यतावच्छेदकमिति नीलस्य वैयर्थ्यं तथा च यत्निष्ठामन्निरूपिता व्याप्तिर्येन विशेषणेन विना न सं
भवे तत्तत्साध्यकमिति न्यायान्नैवैयर्थ्यमिति भावः ननु लघुभूतव्याप्यतावच्छेदकघटितो गुरुधर्मो नावच्छेदकः सामानाधि
करण्यनिवेशे गौरवात् धूमप्रागभाववत्त्वमपि न व्याप्यतावच्छेदकं किंतु धूमत्वमेवेति मतेन वैयर्थ्यं स्यादित्यत आह व्यतिरे
केति लक्षणे हि केवलव्यतिरेकि लिंगं तत्र साध्याभावव्यापकत्वं हेत्वभावे ग्राह्यं ततो हेत्वभावस्य व्यापकत्वादस्यैवाभा

उ° वत्ताश्च नैवैयर्थ्यमित्यर्थः ननु तश्चेत्यादिमूलं प्रकृतानुपयुक्तत्वमनुपपन्नं स्यात् अतो लिंगपरामर्शस्यानुमानज्ञानाकरण
२९ कज्ञानत्वस्यानुभवत्वव्याप्यजातित्वमतस्य परस्य दे लक्षणस्यानुमितावव्याप्तिः स्यात्तद्वारणाय लिंगपरामर्शस्य करणत्वस्वी
29 कारे तेनानुमिते ज्ञानकरणत्वाद्दोक्ताव्याप्तिरित्यर्थः केचित्तु सर्वस्य प्रमाणस्य साक्षात्कारत्वरूपलक्षणांतरसंभवादि
ति केचित् मणिकृतात्तल्लक्षणस्यैव स्वीकारान्नेदं युक्तमित्यन्ये ज्ञानस्यैव लिंगत्वे अनुमितिविशेषे ज्ञानकरणकत्वा
नास्ति वस्तुतस्तु लिंगकरणत्ववादिभिरपि लिंगज्ञानकरणत्वस्वीकृतत्वस्य परे लक्षणस्वरूपाभ्यां अनुमाने निरू
प्यप्रमाणेन तन्निरूपणाय अथेत्यादिमूलमवतारयति अनुमानप्रामाण्यमिति ननु अनुमानत्वरूपपक्षतावच्छे
दकं चार्वाकानुपपन्नं तदसिद्धेरित्यत आह अनुमानत्वेनाभिमतमिति नैयायिकादीनामिति शेषः अनुमानत्वेनाभि
मतत्वमपि नैतेर्वाच्य अनुमानत्वाप्रसिद्धेरत आह धूमादिज्ञानमिति तन्मतानुसारेणाह असदिति अनुमानमेवा
पक्षत्वेन ग्राह्यं असत्त्वाद्व्यपनीतमिति तत्तस्याप्रसिद्धस्य कथं तेषां मानमिति शंकानिराकरणाय धूमज्ञानत्वेन धू
मज्ञानस्यापि ज्ञानमनुपपन्नं तेषां ज्ञानत्वस्याऽलौकिकत्वात् ज्ञानस्य वस्तुत्वात् सदसतोरसंबन्धायेत् तदर्थमसत्त्वा
त्यनुसारेण अनुमानमिति यथाश्रुतमेवास्त्विति भावः अत्रानुमानप्रमाणे इति साध्यव्यभिचारसंशयो हेतुरप
दसाहृन्निरिति चेन्न विषयतयात्तस्य पक्षत्वहनित्वात् नव्यभिचारसंशयविषयत्वेनाप्रामाण्यव्याप्यवत्त्वादप्रामा २९

एव स्यात्तेनापि स्वीकारात् तत्र व्यभिचारादिति वाच्यं संभावनारूपफलसाधकत्वस्य व्यभिचारिण्यपि संभवात् न
नु संवादो निर्विकल्पकविषयविषयकत्वे संभावनायां दुर्घटम् निर्विकल्पकस्य सन्मात्रावगाहित्वात् सविक-
ल्पकस्य तत्सदवगाहित्वात् इत्यत आह संवादाभिमानेनेति तदेव स्फुटयति संभावितस्येति संभावनाविषयस्ये-
त्यर्थः असत इति अलीकस्येत्यर्थः अनुगतस्येति गोत्वादिरूपस्येत्यर्थः अनुगतधर्मस्य निर्विकल्पग्राह्यत्वा-
भावमाह परमार्थेति वस्तुतः सत्त्वमेव लक्षणं व्यावर्तकं यस्य तत्स्वलक्षणे स्वतो व्यावृत्ते व्यक्तिमात्रे तन्मात्रग्रा-
हिणा तन्मात्रग्राहकेणेत्यर्थः अध्यक्षेणेति निर्विकल्पकेनेत्यर्थः तद्विषयकत्वं हि प्रमाणे गोत्वादेस्त्वलीकत्वा-
त्तद्विशिष्टव्यक्तेरप्यसत्त्वात्तद्विषयकस्य विशिष्टज्ञानस्याप्रामाण्यमिति भावः ननु विकल्पद्वयस्यापि संवादव्यव-
हारो दृश्यते इत्यत आह अध्यक्षेति विकल्पद्वयस्याप्यध्यक्षमूलकत्वात्तद्गृहीतार्थविषयकत्वेन संवादो न तु पर-
स्परगृहीतार्थविषयकत्वात् तद्रूपस्याप्रमाणत्वात् नन्वनुमानेन प्रमाणमिति प्रतिज्ञायां नाप्रमाणत्वं प्रमा-
णमित्युपसंहारोऽनुपपन्न इत्यत आह अनुमानप्रमाणेऽपि चेति अत्रैवानुमानाप्रामाण्योपसंहारः तेनैव शाब्दानु-
मानयोः प्रमाणसाधने उक्तविशेषाभावत्रयेण प्रत्यक्षातिरिक्तस्य प्रमाणाभावः साध्यः तस्य च नाप्रत्यक्षप्र-
माणमित्युपसंहार इति भावः केचित्तु प्रत्यक्षानुमानमिति श्रुत्यनुमानपदं द्वितयपरमेव वदन्तो बौद्धानां

ज्यो॰ दृष्टान्तोपनयात्मकत्र्यवयवन्यायस्वीकारात् प्रतिज्ञानिगमनरूपयोरनुपक्रमोपसंहारयोरभावादेव न विरोध इत्याहुः ननु
२८ प्रमाणसाधर्म्यं अप्रमाणरूपोऽनैयत्यादिरूपो धर्मो नाप्रामाण्यसाधकः वक्तुर्दोषाभिधानादित्यत आह प्रमाणेते
ति तत्प्रयोजकं च रूपं इन्द्रियत्वं न तच्चाभिनिश्चयतं व्याप्यग्रहादनुमानत्वे प्रमाणताप्रयोजकमिति न दोष इत्याशयः मूले दृ
ष्टसाधर्म्यस्येति दृष्टसाध्यसाधनत्वेन यानि श्रितं दृष्टान्त इति यावत् तस्य साधर्म्येण तद्धर्मवत्त्वस्य पक्षेऽनुमानहेतोरिति यावत्
तस्यानुमानत्वे लिङ्गकरणतापदेन ज्ञानेकारणमिति पदेनाह साधर्म्यदर्शनस्यैवेति प्रमाणताप्रयोजकरूपशून्य
त्वज्ञानस्येत्यर्थः अत्रानुमानेनैवानुमानप्रामाण्यसाधनेन व्याघातः परकीयसंदेहविपर्यासरूपविप्रतिपत्तिनिरासमु
दिश्य वाक्यप्रयोगस्योक्तविप्रतिपत्तिविषयमायेदातयातज्ज्ञानस्य वानुमानैकसाध्यतात्परज्ञानस्य परप्रत्ययोग्यत्वादिति
द्वितीयादोषो मूले उक्तः तत्रोत्तरमूलावतारणार्थमाद्यं निरस्यति अभिहितमेवेति तथा च प्रमाणताप्रयोजकरूप
शून्यत्वेन परस्याप्रामाण्यमिति नोत्पाद्यादीषेताकिंतप्रामाण्यसंभावनेनैवेति नोक्तदोष इत्यर्थः द्वितीयं निरस्यति
संभावनैव चेति तथा च परस्य संदेहादिसंभाव्यैव तन्निरासार्थं वाक्यप्रयोगोपपत्तेर्नोक्तदोष इत्यर्थः व्याघातश्चेति मू
लम् यदि तदुक्तः शब्दः प्रमाणम् तदा सिद्धं प्रसक्तभिन्नं प्रमाणम् अथाऽप्रमाणं तदानुमानाप्रामाण्यबोधकस्य
तस्यानुमानप्रामाण्यव्यतिरेकेतदप्रामाण्यरूपविषयबाधाभावात्सिद्धयेवानुमानप्रमाणमित्यर्थः अत्रापि प्रका॰ २८

रोत्तरेण साध्यं निर्दिशति नन्विति निरूप्यमाण इति साध्यमान इत्यर्थः आपातत इति तन्मते विशिष्टज्ञानमात्रस्यासत्
ख्यातिरूपत्वादततो भ्रमजनकत्वरूपमेवाप्रामाण्यमस्ति किं तु सत्ख्यातिव्यवस्थापनेनेदानीं प्रक्रान्तमिति भावः
स्वतः प्रामाण्यग्रहे बाधकमाह फलतत्त्वेशयेति नन्विति अनुगताकारेणागतादित्वदसंस्पर्शिनि तद्विषयके इ
त्यर्थः स्वलक्षणेत्यादिः तत्सादृशित्वाद्विषयके इत्यर्थः तदुपपन्नेयथार्थत्वादिति स्वलक्षणविशेषणं प्रामाण्या
स्यमद्विषयकत्वाप्राप्यत्वाविरत्यर्थः तत्प्रामाण्यस्य स्वतस्त्वं इत्याशयेनाह स्वेति स्वं व्यक्तिनिर्विकल्पात्मकं यत्संवेदन
ज्ञानं तेन संविदिते विषयीकृते प्रामाण्ये यस्य तादृशो इत्यर्थः न संदिह्यत इति तत्प्रामाण्यनिश्चयस्य प्रतिबंधकत्वा
त् घटज्ञाने प्रमात्वेत्यादौ विशिष्टज्ञानस्यैव संदेहविशेष्यत्वानुभवात् वस्तुतस्तु तन्मते विशिष्टज्ञानमात्रस्या
लीकत्वात् तदा प्रामाण्यनिश्चयस्य प्रतिबंधकत्वाद् प्रमाण्यसंशयेनापि विशिष्टज्ञानजनविशेष्यको न भवत्येवेत्य
र्थः निर्विकल्पकं सन्मात्रविषयकं प्रमाणत्वात् स्वविषयकं ज्ञानं तत्रैव विषयतेस्तत्ति विषयत्वात् स्वप्रामाण्यविषय
कं प्रामाण्यग्राहकान्तरं विना ग्राह्यप्रामाण्यकत्वादिति भावः सर्वमिदमिति अनुमानादिप्रामाण्यसाधकं च इ
त्यर्थः समारंभेति परिज्ञायाः भ्रान्तेः प्रतिपादनान्तस्य विशेषणं व्याप्तिस्वरूपज्ञानाभावेन तदूहोपायस्य प्रतिपा
दयितुमशक्यत्वात् व्याप्तिग्रहो यस्येव च प्रमाणान्तरप्रयोजकत्वरूपमुक्तहेतोः स्वरूपासिद्धौ अनुमानप्रमाण्यस

उं.
२८

पटमितिभावः ननोवद्दितिमूले अव्याप्तिवारितत्वेनव्याप्तिरितिप्रतिज्ञायां साध्यात्यंताभाववदवृत्तित्वं इत्यादि
विशेषाभावपर्वकहेतुः प्रत्येकविशेषाभावेचकेवलान्वयिन्यव्याप्तेरितिविवेकः साध्यात्यंताभाववदवृत्तित्वमि
तिमूले साध्यात्यंताभावोत्रसाध्यतावच्छेदकावच्छिन्नासाध्यतावच्छेदकसंबंधावच्छिन्नाप्रतियोगिताकस्तादृशो
ग्राह्यः तेनयत्किंचिद्वह्न्यभाववतिसमवायावच्छिन्नवह्नित्वावच्छिन्नवह्न्यभाववतिपर्वतेधूमस्यवृत्तित्वेपिना
व्याप्तिः नवमहानसीयवह्नित्वावच्छिन्नप्रतियोगिताकाभाववत्यपिसाध्यतावच्छेदकवह्नित्वावच्छिन्नप्रतियोगिता
कत्वादव्याप्तितामितिवाच्यं साध्यतावच्छेदकपर्याप्तप्रतियोगितावच्छेदकत्वस्यतदर्थत्वात् पर्याप्तस्यानंगीकारे
तुसाध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नप्रतियोगिताकेत्यर्थः प्रकृतेचवह्नित्वातिरिक्तेनमहानसीयत्वेनापिप्रति
योगितायाअवच्छिन्नत्वात् वृत्तित्वाभावेपिहेतुतावच्छेदकसंबंधावच्छिन्नयद्वृत्तित्वंतत्त्वावच्छिन्नप्रतियोगिताका
विवक्षितः तेनोक्तसाध्याभाववतिहृदादौकालिकेनधूमस्यवृत्तित्वेपिनाव्याप्तिः नन्वत्रसाध्याभाववत्त्वेनतावद्ये
नकेनविलसंबंधेनयास्ते कालिकेनपर्वतादेरपिवह्न्यभाववत्वात् नाद्यभावीयविशेषणताविशेषेण वह्न्यभावा
दौसाध्येहृदत्वादिसिद्धत्वाव्याप्तेः तत्रसाध्याभावस्यवह्न्यादिरूपतयाविशेषणताविशेषणतद्वतोऽप्रसिद्धेः समवाया
वच्छिन्नप्रतियोगिताकस्याकाशाभावस्यवह्न्यादिरूपतयाविशेषकालिकसंबंधावच्छिन्नप्रतियोगिताकेप्रभावेसा २८

ध्ये आकाशाभावाभाववानात्मत्वादित्वादिहेतावव्याप्तिश्च तत्राकाशाभावस्यैव साध्याभावत्वादिति आत्मनि हेतोरा-
त्मत्वस्य वृत्तेः मैवं साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभावस्य यत्संबंधावच्छिन्नप्रतियोगिताको-
भावः साध्यस्वरूपस्तेन संबंधेन साध्याभाववत्त्वस्य विवक्षितत्वात् भवति च संयोगावच्छिन्नप्रतियोगिताकवह्न्यभावस्य
विशेषणताविशेषावच्छिन्नप्रतियोगिताकोऽभावो वह्निस्वरूपः तत्र विशेषणतयैव तद्वत्त्वं वह्न्यभाववान् ह्रदत्वादिम-
त्त्वाभावीयविशेषणतासंबंधावच्छिन्नवह्न्यभावाभावस्य वह्निस्वरूपसाध्याभावस्य संयोगावच्छिन्नप्रतियोगिताका-
भावः साध्यस्वरूपस्तत्र संयोगेनैव साध्याभाववत्त्वे आकाशाभावाभावस्यात्मकस्य साध्यतावच्छेदकविशेषणतासं-
बंधावच्छिन्नाभाव आकाशाभावः साध्याभावस्तस्य च कालिकसंबंधावच्छिन्नप्रतियोगिताकोऽभावः साध्यस्वरू-
पः कालिकसंबंधेनाकाशाभाववांश्चनात्मा नित्यस्य कालोपाधित्वाभावात् किंतु जन्यो घटादिरेव तत्र चात्मत्व-
स्य हेतोरवृत्तित्वात् अन्यत्वस्याभावाभावोऽतिरिक्त एव अनेन वह्न्यादिरूपकल्पने गौरवात् अतः साध्याभावो येन सं-
बंधेन धर्मिणि गृह्यमाणः साध्यतावच्छेदकसंबंधेन साध्यवत्ताबुद्धिप्रतिबंधकः तेन संबंधेन साध्याभाववत्त्वं विव-
क्षितं भवति च विशेषणताविशेषसंसर्गकः संयोगावच्छिन्नवह्न्यभावग्रहः पर्वतादौ संयोगेन वह्निमत्ताग्रहविरो-
धी तत्र विशेषणतया साध्याभाववत्त्वे वह्न्यभावादेः साध्येतदभावस्य विशेषणतया पर्वतादौ ग्रहो विशेषणत-

ग्रं॰ २५

यावद्द्रव्याभाववत्ताग्रहविरोधीति विशेषणानैयेव तद्दलं आकाशाभावरूपस्य च साध्याभावस्य कालिकेन धर्मिणि गृह्यमा
णस्य कालिकसंबंधावच्छिन्नप्रतियोगिताकस्याकाशाभावाभावस्य विशेषणतानाविशेषसंबंधेन ग्रहं प्रति विरोधि-
त्वात् कालिकेन वाकाशाभावस्यात्मन्यवृत्तितया नाव्याप्तिः एवमन्यत्रापि योज्यं नन्वेवं साध्यतावच्छेदकावच्छिन्नसाध्य
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकसाध्याभाववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदकसंबंधा
वच्छिन्नप्रतियोगिताकसाध्याभाववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तितावच्छिन्नाभाववत्त्वं व्याप्तिरिति प
र्यवसन्ने तथा च सत्तावान् द्रव्यत्वादित्यादावव्याप्तिः समवायावच्छिन्नसत्तात्वावच्छिन्नप्रतियोगिताकात्यन्ताभावव
त्सामान्यादिनिरूपितस्य समवायसंबंधावच्छिन्नवृत्तित्वस्याप्रसिद्धेः सामान्यादौ समवायेन कस्यचिदप्यवृत्तिता
त् मैवं साध्याभाववन्निरूपितवृत्तितावच्छिन्नप्रतियोगिताको हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वीयस्वरूपसं
बंधावच्छिन्नप्रतियोगिताकश्च योऽभावस्तद्वत्त्वे तात्पर्यात् उक्तवृत्तित्वं च प्रमेयत्वादौ प्रसिद्धं तस्य चाधिकरणेनो
क्तसंबंधेनावच्छिन्नप्रतियोगिताकस्याभावस्य द्रव्यत्वादौ सुलभत्वात् एवं च संयोगेन वृत्त्यभाववति स्वावयवे समवा
येन धूमस्य वृत्तित्वेऽपि नाव्याप्तिः संयोगसंबंधावच्छिन्नवृत्तित्वीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकाभावस्य तत्र सत्त्वा
त् इति केचित् अन्ये तु एवमपि द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्राव्याप्तिः द्रव्यत्वावच्छिन्नाभाववद्गुणादिनिरूपितवृ २५

त्तित्वाभावस्य समवायसंबंधावच्छिन्नवृत्तितीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकस्य विशिष्टसत्ताया असत्त्वात् सत्ताया गुणादौ समवायेन वृत्तित्वसत्त्वात् विशिष्टसत्तायाश्च तदभिन्नत्वात् अतो यद्भावावच्छिन्ने हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणत्वसामान्ये विशेषणतया साध्याभाववद्वृत्तित्वं तद्धर्मवत्त्वं व्याप्तिरिति तात्पर्यं समवायसंबंधावच्छिन्नवविशिष्टसत्तात्वावच्छिन्नाधिकरणत्वे विशेषणतया द्रव्यत्वाभाववति गुणादावृत्तित्वसत्त्वमेव गुणादौ विशिष्टसत्तावच्छिन्नाधिकरणत्वानंगीकारात् वह्न्यधिकरणत्वविशेषस्य धूमाभाववद्वृत्तित्वात् धूमवान् वह्नेरित्यादावतिव्याप्तिवारणार्थं सामान्यपदकं तथा च सामान्यतो यत्किंचिदयोगोलकवृत्तिवह्न्यधिकरणत्वस्य धूमाभाववद्वृत्तित्वाभावान्न दोषः स्यात् अव्याप्यवृत्तिसाध्याभावसमानाधिकरणसाध्यकेकपिसंयोगी एतद्वृक्षत्वादित्यादौ संयोगाभाववत्येतद्वृक्षे हेतोर्वृत्तित्वादित्यर्थः सद्धेतावितिव्याप्त्यर्थं अव्याप्तिकथनादेव तल्लाभादिति केचित् अव्याप्यवृत्तित्वाभिहितकाधिकरणपदके सद्धेतुविशेषेत्यर्थः संयोगाभाववान् गुणत्वादित्यादौ गुणस्य संयोगरूपसाध्याभाववानधिकरणत्वादव्याप्त्यभावादित्यन्ये साध्यवद्भिन्नोयः साध्याभाववानित्यर्थे साध्याभाववदिति विवर्णं साध्यवद्भिन्नवृत्तित्वाभावस्यैव लक्षणत्वसंभवात् न च साध्यवद्भिन्नत्वस्य वृत्तित्वे नानन्वयात्रैवयर्थ्यं साध्यवद्भिन्नवृत्तित्वावच्छिन्नाभावमपेक्ष्य साध्यवद्भिन्नसाध्याभाववद्वृत्तित्वावच्छिन्नाभावस्यातिरिक्तत्वादिति वाच्यं साध्यवद्भिन्नसाध्याभाववृत्तित्वस्य गौरवेण प्रतियोगितानवच्छेदकतया तदवच्छि

ॐ ३०

न्नभावस्याप्रसिद्धेरित्यतो व्याचष्टे साध्यवद्भिन्नेत्यादिना तद्वृत्तिर्यः साध्याभाववदित्यर्थः तथा चैतद्वृत्तित्वसंयोगाभावःसा
ध्यवद्भिन्नवृत्तिर्न भवतीति नाव्याप्तिरित्यर्थः न च गुणादिवृत्तिसंयोगाभावस्य तद्वृत्तित्वसंयोगाभावस्यैक्यात् तद्वृत्तिर
पि संयोगाभावः साध्यवद्भिन्नवृत्तिर्भवत्येवेत्यव्याप्तिरिति वाच्यं तद्भेदस्वीकारेणैतल्लक्षणप्रवृत्तेः न च साध्यवद्वृत्त्र
वृत्तित्वविशिष्टो यः साध्याभावात्तद्वृत्तित्वमर्थोऽस्त्विति वाच्यं साध्यपदवैयर्थ्यात् पर्वतादिवृत्त्यभावमात्रस्यैकवि
शिष्टतासंभवेन व्यावर्त्याभावात् विपक्षे सत्त्वे तादृशाभाववद्वृत्तिनियमात्तत्र च हेतोरवृत्तित्वसत्त्वात् अत एवाऽधिकरण
भेदादभावभेदं दूषयति कर्मादाविति तथा च तद्वृत्तिरपि संयोगाभावो गुणादिवृत्तिसंयोगाभावाद्भिन्न एवेत्य
व्याप्तितादवस्थ्यमित्यर्थः साध्यवत्प्रतियोगिकान्योन्याभावमात्रनिवेशाभिप्रायेणाह साध्यवत्त्वभिन्नेति न चाऽ
संभव एवेति वाच्यं एकव्यक्तिमात्रवृत्तिकसाध्यके लक्षणासत्त्वात् न चोभयत्वावच्छिन्नभेदमादाय तत्रापि लक्ष
णासंभवतीति वाच्यं वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नायाः प्रतियोगितायाः निवेशात् साध्यवत्त्वावच्छिन्नप्रतियो
गितानिवेशाल्लब्धमेवमलक्षणस्यापि न न्यूनतापत्तेः साकल्यमिति सकलानि यानि साध्यानि तदभाववतो यत्सकलाभावनि
ष्ठाभावप्रतियोगित्वमित्यर्थः अत्र धूमवान् वह्नेरित्यत्र धूमाभाववति ह्रदे वह्नेर्वृत्तित्वाभावादतिव्याप्तिः तद्वारणाय साध्याभा
ववद्वृत्तिसाकल्यं देयं तेन सकलान्तर्गतेः योगोलके हेतोर्वृत्तित्वान्नातिव्याप्तिः तथा च पर्वतीयवह्न्यभाववत्सकलान्त ३०

30

गीते महानसादौ धूमस्य हेतितावद्वह्निमान् धूमादित्यादावव्याप्तिरिति तद्वारणाय साध्ये साकल्यदाने तेन सकलसाध्याभा
ववत्त्वाद्ध्रदादेरेव तत्तन्महानसादेः महानसीयवह्निरूपसाध्यस्य सकलान्तर्गतस्य तत्राभावाभावात् एवं चातिव्याप्तिवार
णार्थं साध्याभाववति साकल्यदाने सत्यव्याप्तिवारणार्थं साध्ये साकल्यदानमिति प्रथमे साध्याभाववतीत्यत्र यद्यपि
विपक्षस्यैकव्यक्तिकत्वे घटाहृत्तिधर्मावान्घटत्वादित्यादौ साध्याभाववति साकल्यमनपेक्ष्यापि साध्ये साकल्यस्या
प्यनावश्यकत्वाच्च साध्याभाववति साकल्यदाने युक्तातिव्याप्तिनिरासाच्च घटस्यापि सकलान्तर्गततया तन्निष्ठाभाव
प्रतियोगितत्वस्य घटत्वे नुपपत्तेः अतिव्याप्तिवारणस्यैवासाधारणप्रयोजनत्वात् न च साध्याभाव एव साकल्यं देयमिति
वाच्यं घटाहृदभाववहृदाहृदभावादीनामपि साध्याभाववत्तया तदेकाधिकरणाप्रसिद्धेः ननूभयाभावे विशिष्टाभावे
वाद्याऽसंभवः वह्निघटोभयाभावस्य महानसीयत्वविशिष्टवह्न्यभावस्य च पर्वतादावपि सत्त्वात्तत्र हेतोरवृत्तिताभावा
दित्यत आह साध्याभावो वेति तथा चोभयाद्यभावस्य साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वाभावान्न दोषः न चैवं
रूपधर्मेण साध्यतायामव्याप्तिः तस्यापि प्रतियोगितावच्छेदकत्वस्वीकारात् साध्याभाववति साकल्यं तद्देयमेवेति भा
वः अत एव तत्फलमाह तेन विवक्षितैकदेशेति यः कश्चित्साध्याभाववानित्यर्थः साध्ये साकल्यस्य साध्यतावच्छेद
कावच्छिन्नप्रतियोगिताकाभावस्य च विकल्पेऽविवादात्तत्फलमाह नवेति अव्याप्यवृत्तीति कपिसंयोगी एतत्त्वा

दित्यादौ व्यभिचारिणि चेति एतद्वृक्षत्ववान् कपिसंयोगादित्यादौ कपिसंयोगस्य कपावपि सत्त्वादेतद्वृक्षत्वस्य च तस्मिन्नभावात्
ओं. व्यभिचारित्वे ऽप्यभावत्वरूप इति साध्याभावे हेत्वभावे चेत्यर्थः तथा च कपिसंयोगाभाव एतद्वृक्षे न प्रतियोगिव्यधिकरणः प्रति-
३१ योगिनः कपिसंयोगस्य तत्र सत्त्वात् तेन कपिसंयोगानधिकरणवृत्तिकपिसंयोगाभाववानेतद्वृक्षत्वाभिन्न एव तद्विशिष्टा-
भावप्रतियोगित्वमेतद्वृक्षत्वेऽस्त्येवेति नाव्याप्तिः एतद्वृक्षत्वाभाववत्कपिनिष्ठसंयोगात्यन्ताभावस्यापि प्रतियोग्यनधिक-
रणवृत्तित्वाभावान्मूलदेशावच्छेदेनाभाव एव तत्प्रतियोगित्वं कपिसंयोगस्य नास्तीति नाव्याप्तिरपीत्यर्थः हेत्वभावेपीतित्र
पि वा साध्याभावसमन्वयः तत्प्रतियोगित्वे चेत्यत्रत्वच्छेदेन हेत्वभावपरामर्शलाघवार्थं तत्समानाद्युक्तिः पूर्वोक्तप्रति-
योगिव्यधिकरणत्वे प्रतियोगिपदं प्रतियोगितावच्छेदकावच्छिन्नपरमित्यर्थः हेत्वभावे तत्फलमाह तेन द्रव्यत्वादावि-
ति द्रव्यत्वविशिष्टसत्तादिमत्यादौ द्रव्यत्वाभाववद्गुणादिवृत्तिप्रतियोगिव्यधिकरणस्याभावो न विशिष्टसत्ताभावः तत्प्रति-
योगिन्यः सत्तायास्तत्र सत्त्वात् किन्तु यदा च भावः तत्प्रतियोगित्वे विशिष्टसत्तायां नास्तीत्यव्याप्तिः स्यात् उक्तविवक्षायां
च प्रतियोगितावच्छेदकीभूतविशिष्टसत्तात्वावच्छिन्नप्रतियोगिव्यधिकरणो गुणादिवृत्तिर्विशिष्टसत्ताभावस्तत्प्रतियोगि-
त्वं विशिष्टसत्तायामस्तीति न दोषः हेतुतावच्छेदकरूपेण तत्प्रतियोगित्वविवक्षाफलमाह नचेति द्रव्यं सत्त्वादित्या-
दौ द्रव्यत्वाभाववद्गुणादिवृत्तिप्रतियोगिव्यधिकरणस्वात्मकीभूता विशिष्टसत्तायास्त्वभावः तत्प्रतियोगित्वं सत्तायाम- ३१

लीनातिव्याप्तिः स्यात् उक्तविवक्षायां तु हेतुतावच्छेदकसम्बन्धत्वरूपेण नोक्ताभावप्रतियोगित्वं किन्तु विशिष्टसम्बन्धत्वरू-
पेणेति न दोषः इत्यर्थः साध्याभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यधिकरणत्वविवक्षायाः फलं तु विशिष्टस-
म्बन्धात् जातेरतिव्याप्तिवारणं बोध्यं गुणादौ विशिष्टसत्ताभावेन प्रतियोग्यधिकरणः प्रतियोगिन्याः सत्तायास्त-
त्र सत्त्वात् किन्तु सामान्यादौ वर्त्तमानन्निष्ठाभावप्रतियोगित्वं जातेरव्याप्तिः स्यात् विवक्षायां तु प्रतियोगितावच्छे-
दकविशिष्टसत्तावच्छिन्नाधिकरणताघटितत्वविशिष्टसत्ताभावे गुणेऽपि तन्निष्ठाभावप्रतियोगित्वं जातेर्नाव्याप्-
तिरिति न दोषः इदं तु बोध्यं उभयत्रापि प्रतियोग्यधिकरणत्वघटके प्रतियोग्यधिकरणत्वे साध्यतावच्छेदकहेतुतावच्छे-
दकसम्बन्धाभ्यां बोध्यं तेन समवायेन वह्नौ साध्ये धूमेनातिव्याप्तिः अन्यथा पर्वते संयोगेन वह्न्यधिकरणत्वात् हेतोः
समवायावच्छिन्नवह्न्यभावस्य प्रतियोग्यधिकरणताभावात् प्रतियोग्यधिकरणसाध्याभाववान् हृदादिरेव तन्नि-
ष्ठाभावप्रतियोगित्वं धूमस्यास्तीत्यतिव्याप्तिः विवक्षायां तु समवायेन वह्न्यधिकरणं वह्न्यवयव एव तद्भिन्नः पर्वतस्तद्वृत्तिर-
प्यभावः प्रतियोग्यधिकरणतद्वान्पर्वतस्तन्निष्ठाभावप्रतियोगित्वं धूमेनास्तीति न दोषः एवं हेत्वभावस्य प्रतियो-
ग्यधिकरणत्वघटकप्रतियोग्यधिकरणत्वमपि हेतुतावच्छेदकसम्बन्धेन बोध्यं अन्यथा संयोगेन वह्निसाध्यके सं-
योगेन हेतौ धूमेऽव्याप्तिः इदं त्वापि कालिकेन धूमाधिकरणतया तद्वृत्तिधूमाभावस्य प्रतियोग्यधिकरणत्वानापत्तेः

विवादितेन तत्संयोगेन धूमाधिकरणे पर्वतादौ तद्भिन्नहृदत्ववृत्तित्वात् धूमाभावस्य प्रतियोग्यधिकरणत्वसंपत्तेः नच प्र
उ॰ तियोगितावच्छेदकसंबंधेन प्रतियोग्यधिकरणत्वमेवोभयत्रापि निवेश्यमिति वाच्यं समवायावच्छिन्नप्रतियो
३२ गिताकवह्न्यभावस्य पर्वताद्यधिकरणनिष्ठस्य प्रतियोगितावच्छेदकसमवायेन वह्निरूपप्रतियोग्यधिकरणे वह्न्य
वयवे सत्त्वात् तद्भिन्नपर्वतवृत्तित्वेन प्रतियोग्यधिकरणत्वसंपत्त्या तत्सकलान्तर्गतपर्वतवृत्तिसंयोगावच्छिन्नधूमाभाव
32 स्याप्रसिद्धेस्तादृशाव्याप्यभावप्रतियोगितस्य धूमादावसत्त्वाद्वह्निमान्धूमादित्यादावव्याप्तिः साध्यतावच्छेदक
संबंधावच्छिन्नप्रतियोगिताकत्वेनापि साध्याभावविशेषणे च गौरवात् एवं च साध्यतावच्छेदकसंबंधेन साध्याधिकरणे य
त्तद्भिन्नवृत्तिर्यः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकः साध्याभावस्तत्सकलवृत्तिः हेतुतावच्छेदकसंबंधेन हेत्वधिक
रणे यत्तद्भिन्नवृत्तिः हेतुतावच्छेदकावच्छिन्नप्रतियोगिताकोयोऽभावस्तत्प्रतियोगितावच्छेदकधर्मवत्त्वमिति फलितार्थः
नन्वत्राप्यव्याप्यवृत्तिसाध्यकसद्धेतावव्याप्तिः गुणादौ प्रतियोग्यधिकरणस्यैवाभावस्य तद्वृत्तित्वादौ सत्त्वादिति चेत्
मैवं उक्तप्रतियोग्यनधिकरणवृत्तित्वविशिष्टसाध्याभावत्वसकलनिष्ठो य उक्तप्रतियोग्यनधिकरणवृत्तित्वविशि
ष्टोऽभावस्तत्प्रतियोगित्वस्य विवादितत्वात् उक्तविशिष्टस्यैतद्वृत्तिवृत्तिरभावस्य दोषात् यत्रैकव्यक्तिकमिति इत्यपि
दीतत्वात् घटत्वादित्यादौ साध्ये साकल्याभावात् सकलपदस्याऽनेकाशेषपरत्वादव्याप्तिरित्यर्थः ननु साध्यताव ३२

च्छेदकावच्छिन्नप्रतियोगिताकाभावस्य निवेशान्नायं दोष इत्यत आह विपक्षो वितिपक्षव्यक्तिक इति लिंगविपरिणामेना-
न्वयः आकाशाभिन्नं तदन्यतप्रकारकप्रमाविशेष्यत्वादित्यादौ आकाशभेदरूपसाध्यस्याऽभाववान् विपक्ष आकाशः
तस्याकल्प्याऽप्रसिद्धेरव्याप्तिरित्यर्थः ननु साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभावव्यापकाभावप्रति-
योगित्वस्य विवक्षितत्वान्नायं दोष इत्यत आह निर्धूमत्वव्याप्येति निर्धूमत्वस्य धूमसामान्याभावरूपस्य साध्यत्वे य-
त्रैकव्यक्तिके साध्यमित्यत्रैव पर्यवसानात् सद्व्याप्यस्य साध्यत्वाभिधाने तस्यापि ह्रदादौ शैवालवत्त्वादिप्रत्येकरूपेण सा-
ध्यतायामसङ्गतत्वे ह्रदत्वाद्यभाववति वह्निसामान्याभावस्य सत्त्वादतउक्तं तत्त्वेनेति निर्धूमत्वव्याप्यत्वेनेत्यर्थः तथा
च धूमसामान्याभावव्याप्यवान् वह्निसामान्याभावादित्यत्राव्याप्तिरिति भावः तामेवोपपादयति तत्र हेत्वभावस्येति
वह्निसामान्याभावस्य त्वभावः प्रत्येकवह्निस्वरूपः साध्याभाववत्सकलान्तर्गते च पर्वतादौ महानसीयवह्न्यादेरवृत्ति-
त्वात् कस्यापि वह्नेः व्यापकत्वाभावात् अव्याप्तिरित्यर्थः अन्ये तु पक्षधर्मावच्छिन्नाभावत्वेन साध्याभावव्यापकत्वे तद्धर्म-
वत्त्वविवक्षायां नायं दोषः वह्निसामान्याभाववत्तावच्छिन्नाभाववत्त्वस्य वह्निमात्रे सत्त्वात् एवं च लाघवादेवोत्तरलक्षणम-
वतारणीयमित्याहुः नन्विदं पञ्चमलक्षणं तृतीयलक्षणेन तुल्यार्थं तदुक्तदूषणग्रस्तं चेत्यत आह अत्रेति सा-
ध्यवदन्यावृत्तित्वमित्यत्रेत्यर्थः अन्योन्याभावस्येति अन्यपदार्थैकदेशस्येत्यर्थः साध्यवत्त्वेनेति प्रतियोगितामात्रेण

उं. २२
33

साध्यवतोन्योन्याभावान्वये साध्यवत्त्वाभिन्नदृष्टान्तवृत्तितादवस्थ्यं स्यात् साध्यवत्त्वावच्छिन्नप्रतियोगिताकत्वसं
बंधेनान्वये तु वह्नित्वावच्छिन्नप्रतियोगितावच्छेदकताकवह्न्यवच्छिन्नप्रतियोगिताकभेदस्य महानसादौ वह्निमता
हृद्वह्निमद्भेदोऽरूदादिरेव तद्वृत्तित्वं च धूमस्यास्त्येवेति भावः महानसं वह्निमद्भिन्नमिति प्रतीतेः अत्र हि वह्नि
मान्प्रतियोगी वह्निप्रतियोगितावच्छेदकः वह्नित्वं च प्रतियोगितावच्छेदकतावच्छेदकं तथा च प्रतियोगितावच्छेद
कस्य वह्नित्वावच्छिन्नवह्नेर्महानसादावपि सत्त्वात् तद्धर्मवत्त्वं च तद्धर्मावच्छिन्नप्रतियोगिताकभेदस्याऽवृत्तित्वात्
अन्यथा घटो न घटः इत्यादिप्रत्ययप्रसंगात् ननु साध्यवतो नामार्थस्य भेदसंबंधेन कथं नामार्थेन्योन्याभावेन्वयः
नामार्थयोरभेदसंबंधेनैवान्वयस्य साकांक्षत्वात् एवं पदार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबोधे वि
शेष्यतासंबंधेन पदजन्यपदार्थोपस्थितिर्हेतुः घटं पश्यतीत्यादौ पदार्थैकदेशस्य घटत्वादेः कर्मत्वान्वयाभावात् तत्क
थमन्यपदार्थैकदेशेऽन्योन्याभावे साध्यवतोन्वयबोधः अन्यपदजन्योपस्थितेर्विशेष्यतासंबंधेनान्योन्याभाववत्वेप्य
सत्त्वादित्यत आह श्रुयतीति आकांक्षावलभ्यमित्यर्थः तथा चानुभवबलादाकांक्षावैचित्र्यकल्पना चोक्तोप
पत्तिद्वयमित्यर्थः एतादृशाकांक्षायां प्रमाणमाह नहीति अन्यथा यत्किंचिद्घटप्रतियोगिकभेदस्य नीलघटेपि
सत्त्वात्तथान्वयबोधः स्यात् घटत्वावच्छिन्नप्रतियोगिताकोन्योन्याभावबोधे तु तादृशान्योन्याभावस्य नीलघटे बाधित रा

तान्नतथात्वधीरितिभावः नचनीलपदस्यार्थघटेनघटइतिशाब्दबोधस्याप्यभावात्तद्इतिवाच्यं प्रतियोगितावच्छेदका
वच्छेदेनभेदबोधइतिव्युत्पत्तेरेवगतार्थत्वप्रसंगात् घटत्वावच्छेदेनयत्किंचिद्घटभेदस्याभावात् नीलघटत्वावच्छेदेनतत्सं
भवाद्व्युत्पत्त्यंतरकल्पनस्यावैफल्यकत्वात् केचित्तु साध्यवत्पदस्यसाध्यवत्तावच्छिन्नप्रतियोगिताकेलक्षणे तस्याभेदेना
न्योन्याभावेनान्वयइत्याहुः तन्मतेएकदेशान्वयोपिनांगीकरणीयः साध्यवत्तावच्छिन्नप्रतियोगिताकत्वानवलक्षणः तस्या
मपदार्थेनसममभेदान्वयः साध्यवत्तावच्छिन्नप्रतियोगिताकवदभिन्नोन्याभाववानितिधीः प्रतियोगिताकांतेना
न्योन्याभावस्याभेदबुद्धिस्तुप्रश्नादिसाहुः ननुसाध्यासामानाधिकरण्यानधिकरणत्वेव्यभिचारिण्यपीत्यतआह
साध्यमिति नन्वसमानाधिकरणपदस्यानधिकरणाधिकरणार्थत्वेयदनधिकरणाधिकरणंसाध्यंतत्तानधिकर
णेसाध्यंतत्वानधिकरणत्वेतस्यलक्षणत्वेइदंवत्वादित्यादावव्याप्तिर्घटत्वानधिकरणपटवृत्तित्वरूपस्यसाध्यासामा
नाधिकरण्यस्यद्रव्यत्वेसत्वात्त्वानधिकरणवृत्तिसाध्यकत्वरूपसाध्यासामानाधिकरण्यानधिकरणत्वस्यघटत्वेऽल
भत्वात् इत्यतआह यदधिकरणेति यदधिकरणमनधिकरणंयस्येतिसमासः साध्येसाध्यसामानाधिकरण्यमित्यर्थः तेनध्व
मादधिकरणपर्वतादेर्यत्किंचिद्वह्न्यनधिकरणत्वेपिनाव्याप्तिः एवंचसाधिकरणवृत्तिसाध्यकत्वरूपसाध्यासामा
नाधिकरण्यानधिकरणत्वेघटत्वेप्यस्तीतिनाव्याप्तिरितिभावः तत्वमिति साध्यासमानाधिकरणत्वमित्यर्थः न

उ॰
३४

मत्र यत्पदधिकरणं हेतुनिष्ठाभावीयं तत्तत्त्वानधिकरणं वाच्यम् अन्यथा ह्रदत्वाधिकरणानधिकरणतद्रूपसाध्यासामा
नाधिकरण्यस्य ह्रदत्वेपि सत्त्वेपि समानाधिकरणत्वस्य धूमेसत्त्वात् धूमवान्वह्नेरित्यादावतिव्याप्तेः इदं सत्त्वादित्यादौ
सत्ताधिकरणगुणादिहेत्वभावानधिकरणत्वस्य सत्तायामसत्त्वादतिव्याप्तिरिति तत्राह अत्र द्रव्यं सत्त्वादित्यादावतिव्याप्तिः सत्ता
रूपहेत्वधिकरणगुणसमवेतत्वाभावरूपसाध्यासामानाधिकरण्यानधिकरणत्वस्य सत्तायां सत्त्वादतआह साध्य
निष्ठाधेयतेति साध्येति साध्यनिष्ठस्य पदाधेयत्वतदनिरूपकं यदधिकरणं तस्य सत्तायां सत्त्वादतिव्याप्तिर्विहिते सा
ध्यासामानाधिकरण्यपदेन विवक्षितमित्यर्थः तथाधिकरणत्वमेवाधेयत्वानिरूपकं तत्तदधिकरणं इति पर्वतादेरपि व
ह्न्यादिनिष्ठाधेयत्वानिरूपकत्वात्तद्धेतुमतिवति धूमादावव्याप्तिरिति वाच्यम् साध्यनिष्ठाधेयत्वानिरूपकाधिकरणत्वाप्र
मत्तस्यैव विवक्षितत्वात् तथाच नोक्तातिव्याप्तिरित्याह साध्यवद्भिन्नस्येति तथाच द्रव्यत्वनिष्ठाधेयत्वानिरूपकमधिक
रणं गुणः तद्वृत्तित्वानधिकरणत्वस्य सत्तायामसत्त्वान्नातिव्याप्तिरित्यर्थः अथाधेयत्वे साध्यतावच्छेदकसंबंधावच्छिन्नत्वाद्य
ऽन्यथा समवायावच्छिन्नयद्वह्निनिष्ठाधेयत्वं तदनिरूपकमधिकरणं पर्वतादि तद्वृत्तित्वानधिकरणत्वस्य धूमे सत्त्वादव्या
प्तेः हेतुत्वमपि हेतुतावच्छेदकसंबंधावच्छिन्नम् तेन संयोगसंबंधावच्छिन्नवह्निनिष्ठाधेयत्वानिरूपकमधिकरणं धूमा
मावयवः समवायावच्छिन्नयत्तद्वृत्तित्वे तदनधिकरणत्वस्य धूमे सत्त्वादव्याप्तेः नन्वेवं समवायाद्द्रव्यत्वादित्यादावव्याप्तिः सत्ता ३४

निष्ठाधेयतानिरूपकमधिकरणं सामान्यादि तत्र समवायेन हनित्वाप्रसिद्धेरुक्तं आह साध्यनिष्ठेत्यादि साध्यनिष्ठाधे
यतानिरूपकाधिकरणत्वव्यापकस्याभावस्य प्रतियोगिभिन्नं यदधिकरणतासामान्यं यस्य तत्त्वमित्यर्थः तथा च यत्र सा
ध्यनिष्ठाधेयतानिरूपकाधिकरणत्वं तत्र यदधिकरणतासामान्याभाववत्त्वमिति फलितेनाव्याप्तिरित्याह तेने·
ति अस्ति हि सामान्यादावुक्ताधिकरणत्वे समवायावच्छिन्नेयत्तद्व्यक्तिनिष्ठं हृतित्वं तन्निरूपिताधिकरणतासामा
न्याभावस्तत्र सत्त्वात् उक्ताधिकरणतायाः व्यधिप्रसिद्धेः अत्र व्यापकस्याने समानाधिकरणेति निवेशे धूमनि
ष्ठाधेयतानिरूपकाधिकरणत्ववति कदाचिद्वह्न्यधिकरणतासामान्याभावसत्त्वात् धूमवान्वह्नेरित्यादावतिव्याप्तिः
व्यापकत्वनिवेशे तु धूमनिष्ठाधेयतानिरूपकाधिकरणत्ववत्ययःपिण्डे वह्न्यधिकरणतासामान्याभावविरहान्न
दोषः ननु महानसीयवह्न्यधिकरणताभावस्य वह्न्यधिकरणत्ववतो मण्याभावस्य च साध्यनिष्ठाधेयतानिरूपका
धिकरणत्वव्यापकत्वादतिव्याप्तिरित्यादवस्थ्यमिति चेन्न यद्धर्मावच्छिन्नाधिकरणतात्वावच्छिन्नाभावत्वे साध्यनिष्ठाधे
यतानिरूपकाधिकरणत्वव्यापकतावच्छेदकं तद्धर्मवत्त्वमित्यर्थात् एतल्लाभायैव सामान्येत्युक्तं अत्र साध्यनिष्ठा
धेयतानिरूपकाधिकरणत्वव्यापकाभावप्रतियोगितावच्छेदकेत्युक्ते कपिसंयोगादित्यादावतिव्याप्तिः कपिसंयो
गाभावस्य केवलान्वयित्वेनोक्ताधिकरणत्वव्यापकत्वात् न च कपिसंयोगाभावस्य केवलान्वयित्वे कपिसंयोगाधि·

करणतायाश्चाभावस्यापि तथात्वादतिव्याप्तितादवस्थ्यमिति वाच्यं अधिकरणत्वाभावस्य तत्त्वानभ्युपगमात् तथा च हेतुता
निष्ठाधेयतानिरूपमधिकरणे कपिः तत्र कपिसंयोगाधिकरणतायाश्चाभावो नास्तीति न दोषः पौनरुक्त्यपरिहाराय सा
ध्यवैयधिकरण्यमन्योन्याभाववृत्तित्वेन तथा योजयति साध्येति तथा च साध्याधिकरणाभिन्नाधिकरणतानधिकरणत्वे
व्याप्तिरित्यर्थः चरमेति यद्यपि अतिव्याप्तिवारणाय सर्वांशकविवक्षायां तदा च घटकत्वे तथापि यथाश्रुताभिप्रायेणेदं
अन्तनीति साध्यासामानाधिकरण्याभावापेक्षया साध्यासामानाधिकरण्याधिकरणाधिकरणत्वाभावस्याभिन्नत्वा
दवच्छेदाभावघटकतया वैयर्थ्याभावेऽपि स्वरूपाभावविवक्षायां प्रयोजनाभावादित्यर्थः साध्यस्येति साध्याधिकरणाभि
न्नहेतुमत्ताभावो व्याप्तिर्न तु हेतुमत्ताधिकरणत्वाभावो गौरवादित्यर्थः नानाव्यक्तीति वह्निमान् धूमादित्यादौ इदमुपल
क्षणं इदं पृथिवीत्वादित्यादावेकव्यक्तिकसाध्यकेऽव्याप्तेः घटहेतुत्वविशिष्टद्रव्यत्वनिष्ठाधेयतानिरूपके घटादौ पृ·
थिवीत्वस्य सत्त्वे: इदं च सर्वं साध्यतावच्छेदकावच्छिन्ननिष्ठाधेयत्वादेरविवक्षायां एतेन कविद्व्यभिचारिण्यपि व्याप्त्या
ने गुणकर्मान्यत्वविशिष्टसत्त्वाभावान्नानेत्यादौ सत्तानिष्ठाधेयतानिरूपकसामान्यादावेव तद्धेतुमत्ताभावस्य ज्ञानोत्स·
त्वात् इत्यर्थः द्वितीयेति लक्षणे इत्यर्थः साध्यवैयधिकरण्यपद इति साध्यवदन्यवृत्तित्वस्य साध्यवैयधिकरण्यपदार्थ
त्वादित्यर्थः केवलान्वयिनीति तत्र प्रमेयत्वावच्छिन्नप्रतियोगिताकभेदस्याप्रसिद्धेः नानाधिकरणेति इदं पृथिवी ३५

35

त्वादित्यादावेकव्यक्तिकसाध्यकेऽव्याप्तेः घटवृत्तित्वविशिष्टद्रव्यत्वनिष्ठाधेयतानिरूपके पटादौ पृथिवीत्वसत्त्वेन इदं च
सर्वसाध्यतावच्छेदकावच्छिन्ननिष्ठाधेयतादेर्विवक्षायां एतेन कविद्व्यभिचारिणीत्यपि व्याख्यातं गुणान्यत्वविशिष्टस
त्तावान्ज्ञातेरित्यादौ सत्तानिष्ठाधेयतानिरूपकसामान्यात्यादावेव वृत्तिताभावस्य जातौ सत्त्वात् इत्यर्थः द्वितीये इति
लक्षणे इत्यर्थः साध्यवैयधिकरण्ये इति साध्यवद्भिन्नवृत्तित्वस्य साध्यवैयधिकरण्यपदार्थत्वादित्यर्थः केवलान्वयि-
नीति तत्र प्रमेयत्वाद्यवच्छिन्नप्रतियोगिताकभेदस्याप्रसिद्धेः नानाधिकरणेति इदं पृथिवीत्वादित्यादौ द्रव्यत्ववद्घटभे
दस्य घटे सत्त्वात् स च वह्निमानित्यादावपीत्यर्थः सार्वभौमव्याख्यानमाह केचित्त्विति हेत्वधिकरण इति तदवच्छेदेने
त्यर्थः इदं वाभावान्वितम् अवच्छेदकत्वं च स्वरूपसंबंधविशेषाय यथा गुणत्वावयोहेतुत्वकपीसंयोगीत्यादौ शब्दत्वादेः ते
नैवेति हेतुतावच्छेदकसंबंधस्य येनैवेत्यर्थः इदं च वृत्तिताविते तथा च हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे यत् तद
वच्छिन्नहेतुतावच्छेदकसंबंधेन यत्साध्यवृत्तित्वे तदभावः साध्यसामानाधिकरण्यपदार्थः तदनधिकरणे व्याप्तिल
क्षणमित्यर्थः व्याप्यस्य हेतुतावच्छेदकसंबंधेनेत्यस्य फलमाह तेन धूमस्येति संयोगेनेति वह्न्यावयवे न महानसि
त्यन्वयः समवायेन धूमाधिकरणे धूमावयवे तदवच्छेदेन वह्निमत्संयुक्तताभावसत्त्वादव्याप्तिः स्यात् विवक्षायां तु
संयोगेन धूमाधिकरणपर्वतावच्छेदेन वह्निमत्संयुक्तताभावानधिकरणतान्नाव्याप्तिरित्यर्थः साध्यवृत्तित्वे हेतुता

उ॰
३९
36

वच्छेदकसंबंधावच्छिन्नत्वविवक्षायाः फलमाह वह्निमतिचेति अत्यन्ताभावभिन्नत्वमितिशेषान्वयः संयोगेन धूमवत्पर्वतत्वावच्छेदेन व
ह्निमत्पर्वतसमवेतत्वाभावस्य सत्वादसंभवः स्यात् विवक्षायां तु पर्वतत्वावच्छेदेन वह्निमत्संयुक्तत्वाभावस्य धूमे अभावात् नासंभव इत्य
र्थः ननु संयोगेन व्याप्यत्वाधिकरणावच्छेदेन वह्निमत्संयुक्तत्वाभावः कुत्र प्रसिद्धः न तावत् ह्रदादौ तत्र संयोगेन वह्निमद्वृत्तित्वसे
वसत्वात् नाप्याकाशादौ तत्र संयोगेन वह्निमद्वृत्तित्वाभावस्य हेत्वधिकरणानवच्छिन्नत्वात् इत्यत आह तादृशाभावस्येति
संबंधान्तरेणेति हेतुतावच्छेदकसंयोगादिसंबंधातिरिक्तेन समवायादिसंबंधेन वह्निमान् ह्रदादावित्यर्थः॥ पर्वते रूपे वह्निमत्सं
युक्तत्वं नास्तीति प्रतीतिः पर्वतत्वावच्छेदेन रूपे वह्निमत्संयुक्तत्वाभावसिद्धेः ननु रूपे वह्निमत्संयुक्तत्वाभावोपि न हेत्वधिकरण
वच्छिन्नः यदि हि रूपे वह्निमत्संयुक्तत्वस्य समानतदाभावयोरेकत्रवृत्तौ विरोधपरिहाराय अवच्छेदकभेदकल्पनास्यात् अतो रू
पनिष्ठो वह्निमत्संयुक्तत्वाभावो न पर्वतत्वावच्छिन्न इति यथोक्ताभावप्रसिद्धिः दुर्लभेति चेन्न संयोगस्यापि प्रतीतिबलादे
वावच्छेदकभेदकल्पनात् इत्थं प्रयुक्तप्रतीत्यात तत्र बाधकाभावात् यद्वा यत्र साध्यवद्वृत्तित्वाभावे हेत्वधिकरणानवच्छि
न्नत्वविशेषणं यदधिकरणावच्छिन्नत्वे तदभावे हेत्वधिकरणानवच्छिन्नत्वं तदधिकरणावच्छिन्नत्वे वा तदुभयाभावो वासप्तवा
त्र साध्यसामानाधिकरण्यपदस्यार्थः तादृशश्च साध्यवद्वृत्तित्वाभाव आकाशएव प्रसिद्धः तत्र हेत्वधिकरणानवच्छिन्न
त्वस्यैवाधिकरणावच्छिन्नत्वस्याप्यसत्वात् उभयाभावोपपत्तेः रूपाद्यवच्छिन्ने वह्निमत्संयुक्तत्वाभावे हेत्वधिकरणानवच्छिन्न ३९

ताभावप्रयुक्तस्यैवोभयाभावस्य सत्त्वात् व्यभिचारसङ्ग्रह इति व्यभिचारिण्यस्ति तद्द्वयोः सत्त्वादित्याद्य इत्यर्थः व्यभिचारनिरूप
केति यत्राधिकरणे हेतौ साध्यव्यभिचारस्तत्रेत्यर्थः तादृशीति हेतुतावच्छेदकसंबंधेन हेत्वधिकरण इत्यर्थः तथा च तत्र स-
मवायेन समानाधिकरणे गुणे: तदवच्छेदेनैव द्रव्यत्ववत्समवेतत्वाभावो हेतावस्तीति न व्यभिचार इत्यर्थः ननु द्रव्यत्वसत्तयोर्द्वयो
सामानाधिकरण्यसत्त्वात्कथं गुणावच्छेदेन द्रव्यत्वसामानाधिकरण्याभावः सामानाधिकरण्यस्याव्याप्यवृत्तित्वादित्यत आह समा
यामिति तथा च गुणावच्छिन्नो द्रव्यत्वसामानाधिकरण्याभाव समानाधिकरणेत्येतदनुभवबलात् सामानाधिकरण्यमव्याप्यवृ
त्तीति भावः नैवमिति इत्थं विशिष्टसत्त्वादिमत्त्वविशिष्टस्यानतिरिक्तत्वात्समानाधिकरणगुणावच्छिन्नस्य द्रव्यत्ववत्समवेत
त्वाभावस्य विशिष्टसत्तेऽपि सत्त्वादिति भावः विशिष्टस्येति सार्वभौममते विशिष्टसत्तायाः शुद्धसत्तायाः च भेदस्वीकारादि
त्यर्थः नन्विदं गुरुत्वाभाववत् जलान्यत्वपृथिवीत्वसत्त्वोभयस्यादिमत्त्वजलान्यत्वरूपहेत्वधिकरणे पृथिवीतदवच्छिन्नस्य गुण
उत्वाभाववद्वृत्तित्वाभावस्य जलान्यत्वे सत्त्वादव्याप्तिः तद्धारणाय हेतुतावच्छेदकावच्छिन्नहेत्वधिकरणावच्छिन्नत्वं साध्यवद्वृत्ति
त्वाभावे विवक्षणीयं तथोभयत्वावच्छिन्नाधिकरणे तेजआदितदवच्छिन्नस्य साध्यवद्वृत्तित्वाभावे हेतौ सत्त्वान्नात्र दोषः ए
वं च विशिष्टसत्त्वात्मकरूपहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणं द्रव्यमेव तदवच्छिन्नस्य द्रव्यत्ववद्वृत्तित्वाभावस्य हेतौ सत्त्वाद
व्यभिचारेणा किं विशिष्टस्यातिरिक्तत्वानुधावनेनेति चेन्मते समाधानान्तरत्वात् किं च कालिकेन पर्वतीयधूमाधिकरणम

ओं॰ ३८ 37

हानस्यावच्छिन्नस्य वह्निमत्त्वे गुरुत्वाभावस्य पर्वतीयधूमे सत्त्वादव्याप्तिवारणाय हेतुतावच्छेदकसंबंधेन पक्षेतद्धर्माधिकरणे साध्य
वह्निमत्ताभाववत्त्वदनधिकरणत्वे व्याप्तिरिति वाच्ये उक्तस्थले संयोगेन पर्वतीयधूमवदधिकरणं पर्वतएव नतु महानसे पर्वता
वच्छिन्नस्य वह्निमत्त्वे गुरुत्वाभावस्य पर्वतीयधूमे सत्त्वान्नदोषः जलात्मत्वादिहेतौ वपर्याप्तिसंबंधेन हेत्वधिकरणत्वे तज्जलादि
तद्वच्छिन्नस्य साध्यवह्निमत्ताभावस्य हेतावसत्त्वान्नदोषः इति हेतुतावच्छेदकावच्छिन्नेति विवक्षाया अनावश्यकत्वात् विशि
ष्टस्यातिरिक्तत्वादित्यस्यापपत्तेः विशिष्टस्य शुद्धानतिरिक्तत्वपक्षेप्याह अनतिरिक्तत्वेपीति विशेषणेति गुणान्यत्वे विशेष
णत्वाविशेष्यसमवायोभय घटितसामानाधिकरण्येन सत्त्वे विशेषणं भवति च विशेषणतावच्छेदकविशेषणगुणान्यत्वादिद्र
व्ये समवायेन सत्त्वे तथाच विशिष्टसत्त्वे न हेतुः किन्तु गुणान्यत्वसत्त्वयोः सामानाधिकरण्यमेव नतु सामानाधिकरण्यस्य द्रव्यत्व
सत्त्वोभयव्यक्तितया पदार्थत्वेनास्तीत्यत आह परंपरयेति घटकत्वसंबंधेन तस्य द्रव्यसत्त्वात् गुणकर्मणोर्विशेषणाभावे
न सामान्यादेश्च विशेष्याभावेन तदुभयसामानाधिकरण्य घटकत्वाभावात् तथाच घटकत्वसंबंधेन सामानाधिकरण्यस्यैव
हेतुत्वात् नाव्याप्तिरित्यर्थः ननु घटः प्रमेयं द्रव्यत्वात् इत्यादि केवलान्वयिस्थलेपि समवायेन द्रव्यत्वाधिकरणपदार्थावच्छेदेन
प्रमेयत्ववत्त्वमत्वेन तत्ताभावस्य च घटादौ प्रसिद्धस्यानधिकरणत्वे द्रव्यत्वावदावस्तीति लक्षणसमन्वयात्तत्राव्याप्त्यभिधानम
लक्षणानुपपन्नेत्यादिमत आह केवलेति द्वितीयेति तत्र साध्यवत्ताविच्छिन्नप्रतियोगिताकभेदवह्निष्ठाभावस्याप्रसिद्धत्वात्

३८

प्रमेयत्वावच्छिन्नप्रतियोगिताकभेदस्याप्रसिद्धेरितिभावः इदंसमवायादिनावृत्तिमान्निर्वव्याप्यवृत्तित्वे सामानाधिकरण्ये
स्याव्याप्यवृत्तित्वं विवक्षयति समवायेनेति अवच्छेदकत्वस्याभावे गुणत्वमाह तदन्वयः अवच्छेदकत्वमत्र घटकत्वम् सामा
नाधिकरण्ये स्वव्याप्यवृत्तित्वे तदवच्छेदकस्याप्रसिद्धेः ननु द्रव्यत्वे गुणेन पृथिवीत्वसामानाधिकरण्यमित्यत्र गुणत्वावच्छेदेनत
दुभयसामानाधिकरण्याभावस्यैव विषयत्वमितिवाच्यं द्रव्यत्वपृथिवीत्वोभयनिष्ठस्य गुणस्य तदवच्छेदकत्वानुपपत्तेरितिभावः
ननु समवायेन गुणे न द्रव्यत्वसामानाधिकरण्यमितिबुद्धौ अवच्छेदकत्वं प्रतियोगितया न भासते किंतु सामानाधिकरण्यमेव
तत्कथमवच्छेदकत्वाभावविषयकत्वेन अवच्छेद्यत्वमित्यत आह परम्परेति घटकत्वसंबन्धेनेत्यर्थः ननु द्रव्यत्वे गुणस्य द्रव्य
त्वाभाववत्त्वावच्छेदेन सामानाधिकरण्याभावविषयकत्वमास्तु अत्र तद्बाधकेनास्तीत्यत आह समानेति नन्विषयतानीतिः
प्रत्यक्षात्मिका शाब्दी वा नाद्यः द्रव्यत्वहीनताभावाभावस्य द्रव्यहीनत्वरूपस्य तत्त्वेऽपि लौकिकादिरोधाभावात् नान्त्यः पाक
रक्तेन श्याम इतिवत्त्वैधर्म्यपरत्वेनोपपत्तेः इत्यत आह द्रव्यत्वहीनताभाव इति न समवायहानेरिति समवायहीनतावच्छिन्नप्रतियोगि
ताकभेदवानित्यर्थः तेन भेदस्याव्याप्यवृत्तितया द्रव्यत्वहीनताभावे समवायहानित्वमनुपपन्नमिति भावः नन्वेवं मूलहृदेनक पि
संयोग इति प्रतीतेरपि मूलावच्छेदेन संयोगाभावविषयकत्वमास्तु मूलहीनसंयोगाभावपरत्वेनैवोपपत्तेः अत आह बा
धकाभावादिति संयोगाभावो न हदाहत्ववान् इति प्रत्ययाभावात् ननु कर्माणि संयोगाभावः प्रतियोगसमाना

धिकरणाऽवृत्तित्वसिद्धांतलक्षणस्य मूलस्वारस्यात्सामानाधिकरण्यमव्याप्यवृत्तीतिपदमाश्रित्यैतल्लक्षणव्याख्यानेऽपक्रमे
ॐ. वैयर्थमत आह अतीन्द्रियेति परमाणुत्वद्रव्यत्वादिसाध्यावतीन्द्रियसाध्यके पृथिवीत्वपरमाणुत्वादिसाध्यावतीन्द्रियलिंग
२८ केचेत्यर्थः अत्र समवायेन हेत्वधिकरणे घटादिनद्वयेऽदेन परमाणुत्ववत्समवेतत्वाभावो महत्त्वेऽप्यस्त्यतस्तदनधिकर
णत्वेन द्रव्यत्वस्य हेतोरित्यतिव्याप्तिः द्वितीये च हेत्वधिकरणे जलादिपरमाणौ च वृक्षादेन पृथिवीत्ववत्समवेतत्वाभावाज
लीयरूपादौ तदनधिकरणत्वं च मा परमाणुत्वस्यात्यातिव्याप्तिरिति भावः एवं गुरुत्ववदाकाशाभावात् इत्यादावुभया
तीन्द्रियत्वस्थलेऽपि इष्टे द्रव्यत्वघटेन परमाणुत्वसामानाधिकरण्यमिति प्रत्यक्षासंभवेन तत्र हेतौ साध्यवद्वृत्तित्वाभाव
स्य दुर्वचत्वात् तत्रेति द्रव्यत्वपरमाणुत्वादिसामानाधिकरण्यस्यातीन्द्रियत्वात्तदभावप्रत्यक्षासंभवादित्यर्थः अत्र
मानमाशंकते नचेति द्रव्यत्वे परमाणुत्वसामानाधिकरण्याभावात् परमाणुत्वाभाववद्वृत्तित्वान्महत्त्ववदित्यर्थः
दूषयति तद्वृत्तिभिन्नत्वस्येति द्रव्यत्वे परमाणुत्वसामानाधिकरण्यवत् परमाणुत्ववद्वृत्तिभिन्नत्वाभावात् सत्त्वावदिति
उपाध्यभावेन साध्याभावानुमानात्संभवतीति परत्वमित्यर्थः उपाधेर्व्यभिचारोन्नायकत्वपक्षेऽत्र परमाणुत्वाभाववद्वृ
त्तित्वे परमाणुत्वसामानाधिकरण्याभावव्यभिचारि परमाणुत्ववद्वृत्तिभिन्नत्वव्यभिचारित्वात्सत्त्वावदिति हेतौ साध्यव्यभि
चारानुमानमितिबोध्यं नच हेतौ परमाणुत्ववद्वृत्तिभिन्नत्वसमानाधिकरणव्यापकत्वमितिवाच्यं भेदस्याव्याप्यवृत्तित्वात् प २८

रमाणुत्वाभाववद्वृत्तेः परमाणुत्ववृत्तितावच्छिन्नप्रतियोगिताकभेदवत्त्वानुपपत्तेः न चोपाधिव्यभिचारेण हेतोः
साध्यव्यभिचारित्वमुक्तं साध्यव्याप्यहेतुव्यापकत्वेनोपाधेः साध्याव्यापकत्वे वाऽननुमेयमिति तल्लक्षयोगात्सोऽयमुपाधिः
पक्षत्वाद्यन्यतमत्वलक्षणोऽनवकाशादिति वाच्यं तथापि सन्दिग्धोपाधित्वानपायात् नन्वेवमतीन्द्रियः संयोगो व्याप्यवृत्तिर्न
स्यात् प्रत्यक्षस्याऽवच्छेदकभेदात् अनुमानस्य चोक्तरीत्याऽनवकाशादित्यत आह किंचेति इदमिदानीमिति एतादृशप्रती
तिनियामकेन कालिकसंबंधेनेत्यर्थः तथा च कालोऽत्र घटादिरित्यादौ व्याप्तिः कालिकेन घटाधिकरणे कालः तदवच्छे
देन कालिकसंबंधेन सर्वेषां वृत्तिमत्त्वादित्यर्थः न चाकाशादेः कालिकसंबंधेन कालवृत्तित्वानभ्युपगमात्तत्रैव तादृशा
भावप्रसिद्धिरिति वाच्यं तत्र तादृशाभावस्य हेत्वधिकरणावच्छिन्नत्वाभावात् कालस्याकाशसंबंधस्यान्यत्वात् अव
च्छेद्याधिकरणसंबद्धस्यावच्छेदकत्वानभ्युपगमात् कालिकसंबंधावच्छिन्नवृत्तित्वपदेन तदभावस्यैव लाभात्
यत्तु महाकालस्य तादात्म्येन स्वसंबंधित्वात् हेत्वधिकरणत्वात्कालिकेन कालवृत्तित्वाभावाच्च तदवच्छेदेन च कालि
कसंबंधावच्छिन्नवृत्तित्वस्याभावो महाकाले प्रसिद्ध इति तन्न वृत्तिनियामकसंबंधेन स्वसंबंधिन एव स्ववृत्त्यभा
वावच्छेदकत्वात् महाकालस्य च तादात्म्येन स्वसंबंधित्वेपि वृत्तिनियामकसंबंधेन तदभावात् ननु अतीतघट
विषयकज्ञानादावेव तत्प्रसिद्धिः अतीतघटस्य विषयतासंबंधेन ज्ञानाधिकरणतया ज्ञाननिष्ठकालिकसंबं

ङों·
३९
39

ध्यावच्छिन्नेकालत्ववद्वृत्तित्वाभावे प्रत्यवच्छेदकत्वोपपत्तेः हेतुतावच्छेदकेन कालिकसंबंधेन घटात्मकहेत्वधिकरणत्वात्र मै
वं विषयतया अपि वृत्तिनियामकत्वानभ्युपगमात् किंच कालोऽयं यावत्प्रमेयादित्यादौ महाकालमात्रवृत्तिहेतावव्याप्तिः
तत्रातीतघटस्य हेत्वधिकरणत्वाभावात् यावत्प्रमेयस्य खण्डकालवृत्तित्वाभावात् विद्यमानमात्रस्य कालोपाधित्वात् न
च महाकालविषयकज्ञानेन तत्प्रसिद्धिः महाकालावच्छेदेन साध्यवद्वृत्तित्वस्यैव सत्त्वात् ननु स्वनिष्ठो यः साध्यवद्वृत्ति
त्वाभाववत्त्वं तदनवच्छेदके हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे यस्य तत्त्वमेव साध्यसामानाधिकरण्यपदार्थः इति चेन्न
पृथिवीपरमाणुत्वाभाववान् परमाणुत्वाभावादित्यादौ परमाणुत्वाभावनिष्ठस्य पृथिवीपरमाणुत्वाभाववद्वृत्तित्वाभा
वस्याप्रसिद्धेः ऽऽ एवं आत्मभिन्ने आत्मत्वाभावादित्यादौ आत्मत्वाभावनिष्ठस्य आत्मभेदवद्वृत्तित्वाभावस्याप्रसिद्धेरव्याप्तेः
अथ स्वनिष्ठं यत्साध्यवद्वृत्तित्वं तदभावानवच्छेदके हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे यस्य तत्त्वमेवार्थोऽस्त्विति चे
न्न वह्निमान् धूमादित्यादावव्याप्तेः धूमनिष्ठे यद्वह्निमत्संयुक्तत्वपर्वतवृत्तित्वं तदभावं प्रति हेतुतावच्छेदकसंबंधेन
हेत्वधिकरणस्य पर्वतादेरवच्छेदकत्वात् अन्यतीश्वरसमवेतनित्यत्वविशिष्टघटादित्यत्र विषयतासंबंधेन हेतावव्या
प्तेः नित्यत्वसामानाधिकरण्येन घटे विशेषणे विषयतया घटवतीश्वरज्ञानादौ नित्यत्वसत्त्वात् तत्त्वविषयतया घटा
स्य जन्यज्ञानेऽपि सत्त्वाद्व्यभिचारवारणार्थं अत्र हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे ईश्वरज्ञानादिकमेव साध्यव ३९

हृत्तित्वपदेन हेतुतावच्छेदकसंबंधेन साध्यवन्निरूपितवृत्तित्वलाभायामपि हेत्वधिकरणावच्छेदेन साध्यवन्निरूपितत्वाभावस्याऽ
प्रसिद्धेः पदार्थमात्रस्यैव विषयतया ईश्वरज्ञानादिसंबंधित्वादित्याहुः अत्र सार्वभौमानुयायिनः हेतुतावच्छेदकसंबंधा
वच्छिन्नसाध्यवद्वृत्तित्वाभावे तेन संबंधेन हेत्वधिकरणं यत्तदवच्छिन्नत्वहेतुवृत्तित्वोभयाभावः पक्षसाध्यवद्वृत्तित्वे उक्तहेत्व
धिकरणावच्छिन्नहेतुनिष्ठाभावस्य प्रतियोगित्वाभावः यद्वा हेतुनिष्ठाभाववत्तावच्छेदेन उक्तहेत्वधिकरणावच्छिन्नत्वसा
ध्यवद्वृत्तित्वप्रतियोगिकत्वे हेतुवृत्तित्वेनेति त्रितयाभावो व्याप्तिरित्यत्र तात्पर्यमित्याहुः अन्ये तु आकाशस्यैव यथोक्ताभा
वप्रसिद्धिः तादृशहेत्वधिकरणानवच्छिन्नत्वावच्छिन्नत्वोभयाभावस्य हेत्वधिकरणावच्छेदेनैवात्र विवादितत्वात् हेत्वधि
करणावच्छिन्नेऽभावे हेत्वधिकरणात्रावच्छिन्नत्वाभावेन हेत्वधिकरणात्रावच्छिन्नत्वाभावेऽप्यवच्छिन्नत्वाभावेनोभयाभा
वसत्त्वादित्याहुः ननु अस्मात्पदादयमर्थो बोध्य इतीश्वरेच्छात्मकस्य वाच्यत्वस्य समवायित्वावश्यकत्वात् समवायितः
यावाच्यत्वाभावो घटपदप्रसिद्ध इति मूलमनुपपन्नं वाच्यतानिष्ठया वाच्यत्वाभावीयप्रतियोगितात तद्व्यधिकरणधर्मत्वाभा
वात् समवायितत्स्येति कथं समवायितावच्छिन्नप्रतियोगिताकवाच्यत्वाभावः प्रसिद्धिरत आह वाच्यत्वेनयत्वेति नेश्वरे
च्छामात्रं वाच्यत्वं सर्वस्य सर्वपदवाच्यतापत्तेः तस्मादीश्वरेच्छीयघटपदबोध्यत्वप्रकारतानिरूपितघटनिष्ठविशेष्य
त्वादिकमेव तदिति भावः ननु प्रमेये साध्ये उक्ताभावमादायन निर्वाहः समवायिनो घटत्वोदरपितत्रप्रतियोगितया

जो॰
४०
40

समवायित्वावच्छिन्नप्रतियोगिताकस्य प्रमेयसामान्याभावस्याऽप्रसिद्धेरित्यत आहऽ प्रमेयेति भावत्वेनेति भावाभावभेदे
न प्रमेयस्य द्वैविध्याद्भावत्वावच्छिन्नप्रतियोगिताको भावानां अभावत्वावच्छिन्नप्रतियोगिताकश्चाभावानां चाभावः सुलभ इ
त्यर्थः ननु यत्समानाधिकरणात्यन्ताभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वघटितेन वाच्यत्वाभावमादाय समन्वया
द्द्वितीयस्य च साध्यऽऽव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वघटितेन वाच्यत्वाभावमादाय समन्वयात्तन्नो
क्ताभावद्वयस्योपयोगः नापि साध्याभावकूटगर्भसार्वभौमलक्षणे साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वाभावा
त् साध्यतावच्छेदके हि प्रमेयत्वाभावेऽपि तदभावत्वेनाभावाभावप्रतियोगिताया अभावनिष्ठाया अभावात् एवं अभाव
त्वेन भावाभावेऽपि योज्यमित्यत आह वह्नित्वेनेति वह्नित्वेन प्रमेयसामान्याभावो वह्निमति नास्ति वह्निरूपप्रमेयस्य
वह्नित्वेन तत्र सत्त्वादत आह निर्वह्नाविति ननु वह्नित्वेन प्रमेयाभावो वह्निप्रतियोगिक एव न तु प्रमेयान्तरप्रति॰
योगिकः प्रमाणाभावात् अन्यथा वह्नित्वेन प्रमेयसामान्यस्य निर्वह्नावेव वह्न्यभावत्वेन च प्रमेयसामान्याभाव॰
स्य वह्निमत्येव वृत्तेः साध्याभावकूटाधिकरणाप्रसिद्धेः विशेषणान्तरदाने च गौरवादिति नास्य कूटगर्भलक्षणे
पयोगादित्यत आह अवृत्तिमात्रेति तथा च गगनत्वेन प्रमेयसामान्याभावः सकलप्रमेयवृत्तिप्रतियोगिताकः विति
गमनाविरहेण गगनत्वेन प्रमेयान्तरेऽपि तत्प्रतियोगिताया दुर्वारत्वात् अत एवाऽवृत्तिमात्रेत्युक्तं गगनवृत्ति गगन ४०

तेन प्रमेयाभावो नास्तीति शंकावारणार्थं गगनवतोः प्रसिद्धेरिति भावः केचित्तु प्रमेयवान् वह्नेरित्यादौ वह्नित्वेन प्रमे-
याभावो न स्तीयं वह्नितीयलक्षणघटकः हेतुसमानाधिकरणत्वादत आह अवृत्तिमात्रेत्याहुः ननु गगनत्वेन प्रमेया-
भावप्रतियोगितापि गगनमात्रनिष्ठैवेत्यत आह विरुद्धेति घटत्वपटत्वोभयस्य समवायेन कुत्रापि प्रमेये हस्माभावादि-
ति भावः अन्ये तु गगनत्वादिनेत्यनेन स्वगगनादिनेति विशेषः तथा च गगनत्वावच्छिन्नप्रतियोगितावच्छेदकताको गगनत्वा-
वच्छिन्नप्रतियोगिताकस्य प्रमेयसामान्याभावस्यार्थः अवृत्तीत्यादि केन प्रतियोगितावच्छेदकत्वेऽन्यूनानतिरिक्तत्व-
त्वादेव स्वीक्रियत इत्येतल्लाभार्थं निरवच्छिन्नप्रतियोगिताकमभावं दर्शयति विरुद्धेतीत्याहुः अत्र व्यधिकरणध-
र्मावच्छिन्नाभावाभ्युपगमे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकात्यन्ताभावत्वं तिलरूपव्यभिचारस्य प्रसक्तावपि
व्यभिचाराभावरूपायाव्याप्तेरप्रसिद्धेरिति मूलकृतोक्तं तावतैव व्यधिकरणधर्मावच्छिन्नाभावदूषणे सिद्धे प्रतियो-
ग्यवृत्तित्वेनादेरवतारणार्थं अन्याहुः प्रामव्यभिचारितं दर्शयति नन्विति पारिभाषिकमिति अर्थविशेषसंकेतिता-
मित्यर्थः तमेवार्थमाह यत्समानाधिकरणाइति वह्निमानद्दित्यादौ घटत्वेन वह्न्यभावमादाय लक्षणसमन्वयः
भवति हि सद्धेतु समानाधिकरणः साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकस्य यत्र वह्नित्वाव-
च्छिन्नो वह्निस्तत्र घटत्वेन वह्न्यभावप्रतियोगिनो वह्नेः सत्वात् एवं प्रतियोगिसमानाधिकरणोऽपि वह्निमत्यपि घट-

ऊं. ४२

तेन वह्न्यभाववत्त्वात् धूमवान्वह्नेरित्यादौ नतु वृत्तेन धूमाभावस्य तादृशत्वेऽपि धूमत्वेन धूमाभावस्य यावदन्तर्गतस्य प्रति
योगिसामानाधिकरण्याभावान्नातिव्याप्तिः एवं धूमप्रकारकप्रमाविशेष्यत्वत्वावच्छिन्नप्रतियोगिताके धूमप्रकारक
प्रमाविशेष्यत्वाभावे अयोगोलकभेदत्वावच्छिन्नप्रतियोगिताके अयोगिताके अयोगोलकभेदाभावे च यावदन्तर्गत
यादायोक्तातिव्याप्तिवारणाय बोध्यं एवमत्र हेतुतावच्छेदकावच्छिन्नहेतुपरं तेनायमात्माष्टद्रव्यभिन्नद्रव्यत्वादित्या
दौ द्रव्यत्वसमानाधिकरणस्यात्मत्वत्वावच्छिन्नप्रतियोगिताकस्यात्मत्वाभावस्य यावदन्तर्गतस्य प्रतियोगिसामा-
नाधिकरण्याभावेऽपि नाव्याप्तिः हेतुतावच्छेदकमष्टद्रव्यभिन्नद्रव्यत्वत्वं तदवच्छिन्नाधिकरणमात्मैव न पृथिव्यादि नहि त-
स्यात्मत्वेनात्मत्वाभावो नास्तीति तस्य यावदन्तर्गतत्वाभावात् किन्तु घटत्वादिनात्मत्वाभाव एव तस्य प्रतियोगिसमा
नाधिकरणत्वात् नन्वेवं साध्यसामानाधिकरण्यमेव विवक्ष्यतां उक्तस्थले दोषवारणस्यैतेनापि संभवात् अथैका
लेगोमानोत्वादित्यत्रातिव्याप्तिवारणाय तद्विशिष्टपदाधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यस्यावश्यस्या-
वश्यविवक्षणीयत्वाद्धूमवान्वह्नेरित्यत्रातिव्याप्तिर्वह्निहेतुनिष्ठत्वानुपपत्तिरिति दृष्यं वारणीये मैवं कपिसंयोगा
भाववान् जातित्वात् इत्यात्मत्वादिसाध्याव्याप्तेः कपिसंयोगाभावत्वेन कपिसंयोगाभावाभावः द्रव्यत्वेन न द्रव्यत्वाभाव
स्य साध्यसमानाधिकरणत्वाद्यावदन्तर्गतः स्यात् द्रव्यत्वाभावस्य जन्यपृथिव्यादौ कालिकेन सत्वात् अभावस्य हि ति ४२

याम्येकेन येन केनचित्संबंधेन वृत्तिमत्त्वमात्रस्य विवक्षितत्वात् विशेषविवक्षायां प्रयोजनाभावात् नहि विशिष्टं च हेत्व
धिकरणमप्रसिद्धं जात्यादौ कपिसंयोगस्याऽहेतोः आत्मनि वृद्धत्वाभावस्य कालिकसंबंधेनाप्यभावात् तथाच
स्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावाद्व्याप्तिः हेतुसमानाधिकरणइत्युक्तेन उ
क्ताभावो न यावदेतद्गतो इति त्वधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वयात् व्याप्तिः अथ यावत्त्वमदस्मत
एव पदांतराणां कृत्यं सम्यग्लग्नमिति प्रथमं यावत्त्वमदत्तमाह सर्वैवेति वृत्तिमत्त्वमात्रेत्यर्थः अह तिहेतुवेच्छहति
साध्यके च व्यभिचारिणि हेत्वधिकरणे प्रतियोग्यधिकरणयोरप्रसिद्ध्याऽतिव्याप्त्यभावात् धूमवान्वह्नेरित्यादाव-
पि घटत्वेन वा व्यत्वाद्यभावमादायातिव्याप्तिः स्यात् अस्ति चायं हेतुसमानाधिकरणः केवलान्वयित्वात् एवं
साध्यव्यापकतावच्छेदकप्रतियोगितावकोऽपि यत्र धूमत्वत्वघटत्वेन वाच्यताभावप्रतियोगितावाच्यत्वस्य सत्त्वा
त् यावत्त्वेऽयुक्ते तु धूमत्वेन धूमाभावस्यापि यावदेतद्गतत्वान्नस्य च प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्ति
रित्यर्थः एवमुदासीनवृत्तिप्रतियोगिताकमभावमादायातिव्याप्तिप्रसंगनिराकरणाय यावत्त्वोपादानमित्युक्ते
स्वप्रतिसाध्यवृत्तिप्रतियोगिताकाभावोपादानप्रयुक्तातिव्याप्तिवारणमपि तत्प्रयोजनमित्याह अतएवेति अत्र
स्वत्वेन वृत्तिमत्त्वमिति न तत्तत्त्वेनाभयेनात्मीयमसिद्धेस्तत्त्वं अत्रोभयत्वावच्छिन्नाभावो मनसि मूर्त्तत्वेन वह्निरूपहेतुसमाना

उ॰ धिकरणः साध्यव्यापकतावच्छेदकप्रतियोगिताकस्य यत्र साध्यतावच्छेदकोभयत्वावच्छिन्नं भूतत्वमूर्त्तत्वोभयं पृथिव्यादौ तत्र उ
भयाभावप्रतियोगिनो भूतत्वमूर्त्तत्वोभयस्य सत्त्वात् एवं प्रतियोगिसमानाधिकरणेपि तदुभयत्वावच्छिन्नाभाववति आ
४२ काशे मनसि च तत्प्रतियोगिनो भूतत्वमूर्त्तत्वयोः क्रमेण सत्त्वात् इत्यतिव्याप्तिः यावत्त्वोपादानेन तु तद्वारणमित्याह भू
तत्वेति भूतत्वाभावस्य मनोन्यत्वाभावस्य चेत्यर्थः अन्यथात्वादिति प्रतियोग्यसमानाधिकरणत्वादित्यर्थः भूत
त्वेन भूतत्वाभावो हि मनसि मूर्त्तत्वात्मकहेतुसमानाधिकरणः साध्यव्यापकतावच्छेदकप्रतियोगिताकश्चेति याव
दंतर्गतः तस्य च स्वविशिष्टहेत्वधिकरणीभूतमनोवच्छेदेन प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरित्यर्थः
एवं मनोन्यत्वाभावेपि योज्यं अन्यत्रापि व्यभिचारनिरूपके यदधिकरणे तदन्यत्वाभावे यावदंतर्गतमादायाऽतिव्या
प्तिरुद्धरणीयेति भावः केचित्तु साध्यतावच्छेदकव्यापकप्रतियोगिताकयावत्तोऽभावाऽप्रसिद्धास्तु किं साध्यव्या
पकतावच्छेदकत्वनिवेशेन यत्र वह्नित्वेन तत्र घटत्वेन वह्न्यभावीयप्रतियोगितात्वादिक्रमेण तत्संग्रहसिद्धेः घटत्वे
न वाच्यत्वाभावमादायातिव्याप्तिवारणाच्च यत्र धूमत्वेन तद्बोधकाभावप्रतियोगिताया अभावात् तस्यावाच्यत्वनिष्ठत्वादि
ति तस्य यावदन्तर्गतत्वादित्यत आह अत एवेति तयोर्भूतत्वाद्यभावो न यावदन्तर्गतः स्यात् उभयत्वाधिकरणे उ
भयस्मिन् उभयाभावीयप्रतियोगितायाः प्रत्येकानिष्ठाया अभावात् साध्यव्यापकतावच्छेदकप्रतियोगिताकत्व ८२

निवेशे तद्व्यक्तित्वाभावमादाय तद्वारणादिनाहुः अन्ये तु स्वव्यापकसाध्यतावच्छेदकप्रतियोगिताकः कश्चिदभावो यद्धर्मवि
शिष्टाधिकरणावच्छेदेन प्रतियोगिसमानाधिकरण इत्येवास्तु कृतं यत्समानाधिकरणत्वयावत्त्वाभ्यां यदभावीयप्रतियो
गिता या व्यापकं साध्यतावच्छेदकं साध्यतावच्छेदकव्याप्यप्रतियोगिताक इति यावत् व्याप्तिनिवेशे आत्माश्रयप्रसंगा
त्तेन तथोक्तं नन्वेवं वह्निधूमाभयवान् धूमादित्यादौ तादृशप्रतियोगिताया अप्रसिद्धेः तत्प्रतियोगितयोरुभयहेत्वोः सा
ध्यतावच्छेदकोभयत्वव्याप्यत्वाभावात् मैवं तत्तत्त्वेनोभयाभावमादायातिव्याप्तिशंकानवकाशश्च तत्प्रतियोगिताया
या व्यापकतावच्छेदकप्रतियोगिताको ऽद्यत्वेन व्यक्तित्वाभावो पि यावदन्तर्गतः स च हेत्वधिकरणावच्छेदेन प्रतियोगि
समानाधिकरणो नेति दोषाभावात् न च साध्यव्यापकप्रतियोगिक इत्येवास्तु किं व्यापकतावच्छेदकत्वेनेति वाच्यं
गोत्वादेरपि वह्निमन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकेन प्रमेयत्वादिना वह्निव्यापकत्वात्त्वाभावसंग्रहापत्तेः गोत्वत्वे
न व्यापकतावच्छेदकमित्यदोषात् न च साध्यतावच्छेदकावच्छिन्नसाध्यवन्निष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वेन
कापि प्रतियोगितायामित्यप्रसिद्धिः वह्निनिष्ठप्रतियोगितावच्छिन्नप्रतियोगिताकस्य घटाभावस्य वह्निमत्यपि वृत्तेः घ
टत्वेन वह्न्यभावीयस्य वह्निनिष्ठप्रतियोगितास्यापि वह्निमन्निष्ठाभावप्रतियोगिताया वह्निनिष्ठप्रतियोगितेन घटाभावत्वत्प्रतियोगिता
वच्छेदकत्वात् न च साध्यवन्निष्ठाभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वेन तदर्थः घटाभावीयप्रति

योगितायां तद्वह्निनिष्ठप्रतियोगितेत्यधिकरणे मेवावच्छेदकमितिन दोष इति वाच्यं वह्निनिष्ठप्रतियोगितेन वह्निघटोभया
उ॰ भावस्यापि वह्निमति सत्वात् न च साध्यवन्निष्ठाभावीयप्रतियोगितापाश्रयस्यानहत्तितेसत्यनवच्छेदकत्वेन तदर्थः उभयाभाव
६२ स्थले च वह्निनिष्ठप्रतियोगितास्य न हेतिमत्त्वमेव घटनिष्ठप्रतियोगितायां वह्निनिष्ठप्रतियोगितत्वस्यैवाधिकरणेपना॰
63 वच्छेदकत्वादिति वाच्यं वह्निनिष्ठप्रतियोगितेन महानसीयवह्न्यभावस्यापि पर्वतादिहत्तित्वात् न चानतिरिक्तहत्ति
त्वमपि देयं उक्तस्थले च महानसीयवह्निभिन्नेपि वह्नौ वह्निनिष्ठप्रतियोगितासत्त्वान्न दोष इति वाच्यं वह्निनिष्ठप्र
तियोगितेन पर्वतीयापर्वतीयवह्न्यभावस्यापि वह्निमद्वत्तितया तत्प्रतियोगितावच्छेदकत्वादप्रसिद्धेरिति वीरत्ता अत्रा
हुः यत्प्रतियोगितावच्छेदकावच्छिन्नानधिकरणं साध्याधिकरणं तत्प्रतियोगितानवच्छेदकत्वमेव प्रतियोगितायां
व्यापकतावच्छेदकत्वं वह्निनिष्ठप्रतियोगितावच्छिन्नघटनिष्ठप्रतियोगिताया अश्रयत्वदेनयारणं न संभवत्येव तस्याहि
प्रतियोगितावच्छेदके वह्निनिष्ठप्रतियोगितात्वं तदवच्छिन्नो वह्निरेव तदनधिकरणं च वह्न्यधिकरणं न भवत्येव अतो घट
त्वावच्छिन्नप्रतियोगितेव वक्तव्या तदनवच्छेदकत्वे वह्निनिष्ठप्रतियोगितेत्त्वलक्षणमेव यद्वा यादृशप्रतियोगिताश्र॰
यानधिकरणं साध्याधिकरणं तादृशप्रतियोगिताभिन्नप्रतियोगिताकात्वं इति साध्यत्वादिप्रतियोगिताकोतस्या
र्थः संयोगावच्छिन्नस्य वह्निनिष्ठप्रतियोगितस्याश्रयो वह्निः तदनधिकरणं वह्न्यधिकरणं न भवतीत्यस्य स्थान ६३

पिकरणवृत्तित्वानुपपत्तेः अतो घटनिष्ठप्रतियोगितापादेशपदेन धर्मेण वा तदाश्रयघटानधिकरणे भवति वह्न्यधि-
करणे तत्प्रतियोगिताभिन्नत्वेन वह्निनिष्ठप्रतियोगितायां सुलभं ननु वह्निसंयोगावच्छिन्नप्रतियोगिताकद्रव्यत्वाभावीया-
द्रव्यत्वनिष्ठापि प्रतियोगिताव्यापकतावच्छेदिका स्यात् प्रादेशपदेनास्याधारणे हि संयोगसंबंधेन द्रव्यत्वाधिकरण-
मप्रसिद्धमिति निरुक्तरीत्या तद्भिन्नत्वमप्रसिद्धं किं तु घटाभावीयप्रतियोगितापादेशेन तत्त्वधर्मेण वा तद्भिन्नप्रतियोगिताक-
त्वे द्रव्यत्वाभावे सतीति तस्य पादेतर्गतत्वेन प्रतियोगितावच्छेदकसंयोगसंबंधेन प्रतियोग्यधिकरणाप्रसिद्ध्या तद्वृत्ति-
त्वस्य द्रव्यत्वाभावे अलभ्यत्वादव्याप्तिरिति चेन्नैवं स्वावच्छेदकसंबंधेन वृत्तिमान् यस्तद्वृत्तित्वेनापि प्रतियोगिताया
विशेषणीयत्वात् द्रव्यत्वाभावीयप्रतियोगिताया द्रव्यत्ववृत्तित्वात् द्रव्यत्वस्य च संयोगसंबंधेन वृत्तिमत्त्वाभावात् ननु अ-
वच्छेदकप्रतियोगिकस्य वृत्तितापर्यवच्छिन्नभेदस्य तत्रापि सत्त्वादवच्छेदकतावच्छिन्नप्रतियोगिताकस्यापि अवच्छेद-
कत्वेन घटादिभेदस्य सत्तान्याप्यप्रसिद्धिरेवेति चेन्न अवच्छेदकतावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्य वा-
च्यत्वात् अवच्छेदकत्वेनावच्छेदकभेदस्यावच्छेदकेऽपि विरहेण कूटवैकल्यात् केचित्तु अवच्छेदकतावच्छिन्ना-
वच्छेदकत्वहानिप्रतियोगिताकात्यन्ताभाववत्त्वमत्रावच्छेदकत्वे अत्राङ्गः इति संक्षेपः ननु यत्समानाधिकरणा इति
तत्त्वावद्वह्निमान् धूमादित्यादावव्याप्तिवारणार्थं वह्नित्वेन वह्न्यभावस्य यावदन्तर्गतत्वेनापि तस्य कालिकसंबंधेन प्रति-

योगिसामानाधिकरण्यसत्त्वाद्व्याप्त्यभावात् एवं वह्निप्रकारकप्रमाविशेष्यत्वेन वह्निप्रकारकप्रमाविशेष्यत्वेन व-
ह्निप्रकारकप्रमाविशेष्यत्वाभावादावपि योज्यं नच गगनाभावाभावमादायाव्याप्तिवारणार्थं दीधितिकृता तदस्वीकारा-
त् वृत्तिमत्त्वमात्रेण तद्वारणसंभवाच्च नापि महाप्रलयान्यत्वाभावमादायाऽव्याप्तिवारणार्थं तत् तच्च महाप्रलया-
न्यत्वात् तच्च महाप्रलयान्यत्वाभावविशिष्टधूमाधिकरणाप्रसिद्धेरिति वाच्यं महाकालस्य संयोगेनापि धूमवत्त्वे बा-
धकाभावात् संयोगेन धूमाधिकरणे महाकाले महाप्रलयत्वरूपस्य तस्य सत्त्वाद्व्याप्त्यभावात् नापि चरमक्रियाभावाभा-
वमादायाव्याप्तिवारणार्थं तस्यापि उक्तरीत्या महाकाले प्रतियोगिसमानाधिकरणत्वात् इत्यत आह येन संबंधेनेति न
च्यावहेत्वधिकरणे संबंधविशेषाविवक्षायां यत्राव्याप्तिः तत्रैव यत्समानाधिकरणत्वानुपादानेऽपीत्येकं एवमपि प्र-
योजनं दर्शितमिति भावः समवायेनेत्यर्थः एवमपि विषयत्वेन ज्ञानस्यासङ्ग्रहत्वमेवेत्यत आह ज्ञाने हेतौ संयोगसंबंधे-
नात्मत्वस्य साध्यतायामसङ्ग्रहत्वमेवेत्यत उक्तं आत्मत्वे साध्ये इति समवायेनेत्यर्थः एवमपि विषयत्वेन स्यासङ्ग्रहत्वमे-
वेत्यत आह समवायेनेति तथा च यत्समानाधिकरणत्वानुपादाने आत्मत्वे नात्मत्वाभाववत्साध्यवदन्तर्गतस्य प्रतियोगि-
तावच्छेदकसमवायसंबंधेनात्मत्ववत्यात्मनि कालिकेनापि हेतुमत्ताभावात् प्रतियोगिसमानाधिकरणत्वेना-
व्याप्तिः तदुपादानेऽपि संबंधविशेषाविवक्षायां विषयतया ज्ञानाधिकरणे घटादौ आत्मत्वे नात्मत्वाभावस्य सत्त्वात् साध्यवदन्त- ४४

गतत्वेऽर्वाग्भिन्नत्रुटीत्वप्रतियोगिसमानाधिकरणत्वेनास्तीत्यव्याप्तितादवस्थ्यं ततो हेतुतावच्छेदकसंबंधेन यद्धेत्वधि
करणं तद्वृत्तित्वे हेतुसमानाधिकरण्यमनेन विवक्षणीयं एवं च घटत्वेनात्मत्वाभावपक्षे यावदन्तर्गतो नात्मत्वत्वेनात्म-
त्वाभावः तस्य समवायेन ज्ञानाधिकरणे आत्मन्यवृत्तित्वात् घटत्वेनात्मत्वाभावस्य प्रतियोगिसमानाधिकरण्यम-
वश्यं वैतन्नाव्याप्तिरिति भावः ननु आत्मभिन्ने आत्मनस्तत्तादात्म्येन हेतौ आत्मत्वाभाव उपाधिः स च हेतावु-
पाधिरिति तान्त्रिकव्यवहारात् अव्यापकत्वसंबंधेनात्मन्यप्यस्त्येव एवं स्वाश्रयज्ञानादिमत्त्वसंबंधेनापि भवति
स्यात्मत्वाभावस्याश्रये ज्ञाने तस्य समवायेनात्मनीति प्रतियोगिसामानाधिकरण्यं भविष्यतीति अव्याप्त्यभावाय समा-
नाधिकरण्यमित्यर्थमिति वाच्यं तदुक्तसंबंधानां वृत्तिनियामकत्वाभावात् अव्यापकत्वादिसंबंधानामुपाधिवादे
परकीयमतत्वेनैव तथात्वस्योक्तत्वात् हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे केनचिद्वृत्तिनियामकसंबंधेन हेत्वधि
करणे केनचिद्वृत्तिनियामकसंबंधेन वृत्तित्वमभावस्य प्रतियोगिसमानाधिकरण्यमनेन विवक्षितत्वात् नन्वेवमपि पृ-
थिवीजन्यत्वादिसाध्यकव्याप्तिः पृथिवीत्वेन पृथिवीत्वाभावो हि जलादौ हेतुसमानाधिकरणः साध्यव्यापकता-
वच्छेदकप्रतियोगिताकश्च एवं प्रतियोगिसमानाधिकरणोऽपि तत्कालिके न पृथिवीत्वाधिकरणे जलादौ पृथिवी-
त्वाभावस्य समवायावच्छिन्नप्रतियोगिताकस्य सत्त्वादत आह एवं दलोत्तरेऽपीति व्यापकतादले प्रतियोग्यधिकर

णात्वदलेचेत्यर्थः संबंधभेदेति एकसंबंधेनव्यापकतासंबंधांतरेणमंतरेणप्रतियोग्यधिकरणत्वमित्येतन्निवेशनात्॰
उँ॰ व्याप्तिरूपोदोषइत्यर्थः संबंधैक्येति येनसंबंधेनव्यापकतातेनैवप्रतियोग्यधिकरणत्वमितिविवक्षयेत्यर्थः तथा
४५ चपृथिवीत्वत्वावच्छिन्नपृथिवीत्वाभावप्रतियोगिपृथिवीत्वसमवायेनपृथिवीत्वरूपसाध्यव्यापकं जलादिकंतद्व्याप
कतावच्छेदकसमवायसंबंधेनपृथिवीत्वाधिकरणंनभवतिकिंतुकालिकेनैव सचनव्यापकतावच्छेदकः नहियत्र॰
15 समवायेनपृथिवीत्वंतत्रकालिकेनपृथिवीत्वमितिनियमः नित्यपृथिव्यांव्यभिचारात् जन्यस्यैवकालोपाधित्वात्
नित्येकालिकेनकस्याप्यवृत्तेः एवंचयावदंतर्गतस्यपृथिवीत्वत्वेनपृथिवीत्वाभावस्यव्यापकतावच्छेदकेसमवाय
संबंधेनयत्पृथिवीत्वाधिकरणंतदवृत्तित्वान्नातिव्याप्तिरितिभावः अत्रैवमपि नित्यज्ञानत्वात् नित्यत्वविषयकत्वात्पृ
थिवीत्ववान्मूर्त्तत्वात् स्पंदत्ववान्कालत्वादित्यादावतिव्याप्तिः विषयतादैशिकविशेषणताकालिकविशेषणता
चेति संबंधत्रयस्यापिसमवायवदत्रव्यापकतावच्छेदकसंबंधत्वात् समवायेननित्यज्ञानत्ववतिनित्यज्ञानेविषयता
ननित्यज्ञानत्वसत्त्वात् एवमन्यत्रयोज्यं एवंचव्यभिचारनिरूपकाधिकरणेईश्वरेच्छाप्रयत्नरूपेसमवायावच्छिन्न
नित्यज्ञानत्वत्वावच्छिन्नप्रतियोगिताकस्यनित्यज्ञानत्वाभावस्यविषयतासंबंधेनप्रतियोगिसामानाधिकरण्यसत्त्व
त्वात् ईश्वरेच्छाप्रयत्नयोरपिसर्वविषयकत्वात् एवंपृथिवीत्वत्वेनपृथिवीत्वाभावस्यस्पंदत्वत्वेनस्पंदत्वाभावस्य॰ ६५

व्यभिचारस्थाने जलादौ काले वै दैशिककालिकविशेषणताभ्यां प्रतियोगिसामानाधिकरण्यं परत्वनियाप्तिरिति
चेन्नैवं येनयेन संबंधेन साध्यव्यापकत्वं तेन तेन यत्प्रतियोग्यधिकरणं तद्वृत्तित्वस्य विवादितत्वात् उक्तस्थले च सम
वायेन नित्यज्ञानत्वाधिकरणे नित्यज्ञाने तत्तावच्छिन्नाभावस्य वृत्तित्वान्नातिव्याप्तिः एवमन्यत्रापि योज्यं अन्ये तु
प्रतियोग्यधिकरणत्वं प्रतिप्रतियोगितावच्छेदकसंबंधेन विवक्षणीयमित्यर्थः प्रकृते च समवायः तेन च नित्यज्ञा
नत्वादिरूपप्रतियोगिनोधिकरणं नित्यज्ञानमेव न तु द्रव्यादि नित्यज्ञानादौ चोक्तनित्यज्ञानत्वाभावो नास्तीति प्रति
योगिसामानाधिकरण्येन नास्तीति नातिव्याप्तिरित्याहुः केचित्तु साध्यतावच्छेदकसंबंधेन साध्यव्यापकत्वं प्रतियो
ग्यधिकरणत्वं च विवक्षणीयमित्यर्थः अतो नोक्तस्थले दोषः पृथिवीजन्यत्वादिमत्त्व पृथिवीत्वेन पृथिवी
त्वाभावस्य यावद्द्रव्यं तद्गतस्य समवायेन यत्प्रतियोग्यधिकरणं तद्वृत्तित्वाभावात् जलादेः कालिकेनैव पृथिवीत्वाधि
करणत्वादित्याहुः तच्चिंत्यं भ्रमवान्वह्नेरित्यादौ वाच्यत्वाभावमादाय यातिव्याप्तिशंकानुत्थानात् संयोगेन वाच्यत्वाधिकर
णाप्रसिद्धेः एवंभूतन मूर्त्तत्वोभयवान्संयोगित्वादित्यादौ मूर्त्तत्वाभावमादाय तत्समाधानस्याप्यसंगतत्वापत्तेः समवा
येन मूर्त्तत्वाधिकरणाप्रसिद्धेः किंच एतद्रूपात्मकविशिष्टसत्तावान् गुणत्वादित्यादौ वातिव्याप्तिः एतद्रूपात्मक
विशिष्टसमानेन एतद्रूपात्मकविशिष्टसत्ताभावे यावद्द्रव्यं तद्गतमादायैव तत्रातिव्याप्तेर्वारणीयत्वात् तद्दोषाच

उ॰ ४८

तत्प्रतियोगिनस्तद्रूपान्यतमसमवायेन साध्यव्यापकत्वानुपपत्त्या यावदेतद्गतत्वाभावात् अपरे तु विशेषणताविशेषे
ण प्रतियोगिनिष्ठसाध्यव्यापकत्वे तेनैव प्रतियोग्यधिकरणत्वं च विवक्षणीयमित्यर्थः सर्वेऽत्र विशेषणतया हेतु
मान्यः पदार्थस्तद्वृत्तिप्रतियोगिताकं घटत्वावच्छिन्नप्रतियोगिताकमाकाशाभावाभावादिकमादायैव लक्षणस
मन्वयः असंदिग्धेनैव व्यभिचारनिरूपकाधिकरणत्वत्वाभावमादायैवातिव्याप्तिवारणमित्याहुः तदपि वितथम्
भूतत्वाभावमादाय कृतस्य व्यभिचारणस्यासंगतत्वापत्तेः अत्रापि हेत्वधिकरणावच्छेदेनेति विवक्षायाः कालो गो
मानोत्वात् इत्यादौ गवाद्यभावमादाय व्यभिचारवारणाय वक्ष्यमाणया अनुपपत्तेश्चेतिदिक् ननु यावत्त्वानुपा
दाने भूतत्वमूर्तत्वोभयवान्मूर्तत्वादित्यत्रातिव्याप्तिरित्युक्तं रूपसामान्याभाववान्पृथिवीत्वादित्यत्र तदनुद्भावने किं
बीजं न च तत्र साध्याभावस्य समानाधिकरण्यधर्मावच्छिन्नप्रतियोगिताकस्य प्रतियोगिसामानाधिकरण्येनास्तीति वा
च्यं रूपसामान्याभावो हि रूपात्मकः तस्य प्रतियोगिनो रूपध्वंसप्रागभावावपि रूपस्य रूपध्वंसात्यन्ताभावात्म
कत्वात् प्रतियोगितद्ध्वंसप्रागभावानामेकस्यैवात्यन्ताभावस्य लाघवेन स्वीकारात् ध्वंसप्रागभावात्मकप्रतियो
गिसामानाधिकरण्यस्य रूपसामान्याभावाभावात्मके रूपे सत्त्वात् यावत्त्वोपादाने तु तदंतर्गतस्य पृथिवी
त्वाभावस्य प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति साशंकायां सिद्धांतलोकितेन समाधानमाह रू ४८

पादिसामान्याभावेऽइति सदैवेति वक्ष्यमाणनीत्येतिभावः तथाच यावत्पदोपादाने पिपृथिवीत्वसत्वाभावो न या-
वदेतदीतः साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात् रूपसामान्याभावो घटोत्पत्तिकालावच्छेदेन पृथिव्यां
तत्र पृथिवीत्वसत्वरूपसत्वप्रतियोगिनोः सत्वादितिभावः तदेवाह प्रलयेति न च प्रलये परमाणौ रूपसामान्याभा
वसत्वेमानाभावः तदानीं तत्र रूपसामान्यं नास्तीति प्रतीतेरेव बाधकं विना प्रमाणत्वात् अन्यथा गगनाद्यभावासि
द्धेः परमाणाविति पार्थिवपरमाणावित्यर्थः प्रकृष्टे प्रलयोद्ध्वंसोऽयं तत्र तस्मिन् प्रलये रूपध्वंसोत्पत्तिकालेऽइ
ति केचित् एवंपि पीठरपाकमतेऽवयविन्यपीति बोध्यं उत्पत्तिकालेऽइति निर्गुणमेवद्रव्यमुत्पद्यतऽइति सिद्धान्तादित्यर्थः त
त्सत्वादिति रूपादिसामान्याभावसत्वादित्यर्थः ननु रूपसामान्याभावस्य रूपतद्ध्वंसप्रागभावत्रयप्रतियोगिकत्वाद्रूप
वतीव तद्ध्वंसप्रागभाववत्यपि न रूपसामान्याभावसंभवः प्रतियोगिमत्यभावस्यानुपपन्नत्वात् अतस्तत्राह नचेति माना-
भावादिति रूपसामान्याभावस्य त्रितयप्रतियोगिकत्वप्रमाणाभावात् तद्भेदेनात्यन्ताभावत्रयस्यैव स्वीकारात् अतएवेति
अन्यथा तत्र रूपध्वंसप्रागभावयोः सत्वाद्रूपात्यन्ताभावप्रत्ययो न स्यात् नचैवमिति तथाच रूपात्यन्ताभावस्यैकाविषयता
त् प्राचीनमते लाघवमप्याहतमिति भावः पूर्वापरेति रूपध्वंसप्रागभावयोर्मध्यवर्तिक्षणेपि समवाद्देके रूपं नास्तीतिधीः
स्यादित्यर्थः तथाचात्यन्ताभावेऽकालावच्छेदमप्रयोजकं अन्यथा भावमात्रस्यैकापत्तिरितिभावः ननु गुणत्वजात्यादयः गु

सिगुणिलिंगास्तत्तद्गतीत्वनुगमनात् गुणमात्रपरस्यस्कन्धाहृस्यकथंनञ्ंसमकत्वमितिचेन्नैवं तद्गतीत्वस्यविशेषण
उं. तापन्नास्तविशेषलिंगाइत्यर्थात् रूपविशेषणत्वेननञ्ंसमकत्वस्यनिर्बाधत्वात् अतएवयदग्रेगाहितेरूपेइत्यादयःप्रान
४७ प्रयोगः तत्सामानाधिकरण्यंचेति प्रतियोगिसामानाधिकरण्येइत्यर्थः स्वविशिष्टहेत्विति यावदंतर्गताभावविशिष्टे
त्यर्थः हेत्वधिकरणेति हेतुतावच्छेदकसंबंधेनहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणेएतदवच्छेदेनेत्यर्थः अवच्छे-
47 दकत्वेव्यापकत्वं स्वरूपसंबंधरूपेतस्मिन्नत्रमानाभावात् इत्थंविशिष्टसत्त्वादित्यत्रघटत्वेनद्रव्यत्वाभावस्यसत्त्वाधि-
करणगुणावच्छेदेनप्रतियोग्यधिकरणवृत्तित्वाद्व्याप्तिवारणाय हेतुतावच्छेदकावच्छिन्नेति तादृशहेत्वधिकर
णावद्रव्यमेवेतिनदोषः वह्निमान्धूमादित्यत्रधूमत्वावच्छिन्नधूमाधिकरणेधूमावयवेतदवच्छेदेनघटत्वेनवह्न्यभाव
स्यप्रतियोगिसमानाधिकरणत्वादव्याप्तिवारणाय हेतुतावच्छेदकसंबंधेनेति संयोगेनधूमाधिकरणेपर्वतादि
स्तदवच्छेदेनप्रतियोगिसामानाधिकरण्यान्नदोषः हेत्वधिकरणावच्छेदेनेतिविवक्षायाःफलमाह येनेति गोत्वे
त्यादिकंवक्ष्यमाणानुमानद्वयेऽतिव्याप्तिसंपादकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावव्यापकघटनार्थं
पक्षगोत्वमिति अनेनकालिकसंबंधेनसाध्यताहेतुतावेत्युक्तं तथाचकालोगोमान्गोत्वादित्यत्रकालिकसंबंधे
नगोत्वेनगवाभावोयावदंतर्गतः हेतुतावच्छेदककालिकसंबंधेनगोत्वाधिकरणेकालेवर्त्तमानत्वात् साध्यव्यापकता ४७

वच्छेदकप्रतियोगिताकत्वाच्च तच्च प्रतियोगिसामानाधिकरण्येऽपि कालिकेन गोमति काले सत्त्वादित्यतिव्या
प्तिः हेत्वधिकरणावच्छेदेनेति विवक्षायां तु कालिकेन गोत्वाधिकरणप्रलयकालावच्छेदेन प्रतियोगिसामा
नाधिकरण्याभावान्न दोषः ननु केवलान्वयिभिन्नस्य देशावच्छेदेनैव कालिकेन काले वृत्तिः अतएव गगना
देर्वृत्तित्वनिर्वाहः प्रलये च गोत्वस्य देशाभावात्तदानीं गोत्वस्यापि न वृत्तिः एवं च सृष्टिकाल एव हेत्वधिकर
णेतदवच्छेदेन प्रतियोगिसामानाधिकरण्यात् सद्धेतुरेवायमत आह यत्कालत्वमिति तच्च जन्यद्रव्यमिति
जन्यस्य ध्वंसस्यानित्यद्रव्यस्य च तदा सत्त्वात्सद्धेतुत्वमेव स्यादतो विशिष्टस्योपादानम् तथा च जन्यद्रव्यवान्कालत्वादि
त्यत्र जन्यद्रव्यत्वेन जन्यद्रव्याभावस्य यावदंतर्गतस्य सृष्टिकाले प्रतियोगिसामानाधिकरण्यसत्त्वात्तिव्याप्तिः
उक्तविवक्षायां तु कालत्वाधिकरणप्रलयावच्छेदेन तदभावान्न दोष इत्यर्थः नन्वयमपि सद्धेतुरेव महाप्रल
येऽयुगपत्सर्वध्वंसोऽपि प्रलये च मानाभावात् प्रलयकालेऽपि ध्वंसोऽस्त्येव जन्यद्रव्यसत्त्वादित्यत आह प्रलयावृत्तित्वे
ति तथा च प्रलयावृत्तिमत्कालत्वादित्यत्र प्रलयावृत्तित्वेन प्रलयावृत्त्यभावस्य सृष्टिकाले प्रतियोगिसमाना
धिकरणत्वादतिव्याप्तिः स्यात् उक्तविवक्षायां तु हेत्वधिकरणप्रलयावच्छेदेन तदभावान्न दोषः प्रलयावृत्तिप
दार्थस्य प्रलये सत्त्वादिति भावः एवं प्रलयकालावृत्तिमान्कालत्वादित्यादावपि बोध्यं दैशिकविशेषणत

उ०. ९८ तथाप्युक्ताभावस्य हेतुमति विवक्षायां दोषतादवस्थ्यमित्यभिप्रायेण दैशिकविशेषणतयाऽभावस्य कालहेतुमति प्रतियोगिमद्भिन्नदे
शस्यावच्छेदकत्वमिति बोधयितुं गवाद्यनधिकरणेत्युक्तं इदानीं गोहेतोर्न वाजिशालायामिति प्रतीतेः कालस्य गवाद्यधिकरण
तायां गोहेतुस्य गोहेतुमत्तावच्छेदकतायां वाजिशालायाश्च गवाभाववहेतुमत्तावच्छेदकताया प्रत्यक्षविषयत्वात् ननु कालो गोमान्का
लत्वादित्यादौ महाप्रलयावृत्त्यभावस्य यावदंतर्गतस्य प्रतियोगिसामानाधिकरण्यं नास्ति खंडकाले महाप्रलये वेत्यत आ
ह महाकाले वेति तत्र कालिके न चरमध्वंसत्वरूपमहाप्रलयत्वस्यापि सत्त्वाद्भावदिशि संबंधविशेषस्याविवक्षितत्वादिति
भावः तदेव स्फुटयति हेतुमतीति प्रतियोगिसामानाधिकरण्याभावादित्यर्थः ननु यत्राऽभावस्य हेतुमति दैशिकविशेषण
तयैव विवक्षितो तथा च महाप्रलयावृत्त्यभावस्य महाकाले तेन संबंधेनाहेतुमत्तान्निव्याप्तिरिति चेन्न गुणवान्द्रव्यत्वात्
वह्निमान्धूमादित्यादौ समवायेन संयोगेन वहेत्वधिकरणे कालिकसंबंधेन वर्तमानस्य साध्याभावस्य यावदंतर्गतस्य प्र
तियोग्यधिकरणे दैशिकविशेषणतयाऽहेतुमत्त्वाभावाद्व्याप्तेः हेत्वधिकरणेऽपि दैशिकविशेषणतयाऽभावस्य हेतुमति विव
क्षायां तु घटत्वाभाववान्मेयत्वादित्यादावतिव्याप्तेः घटत्वरूपसाध्याभावमादाय यद्यपि तदुद्धारः स चेदानीं न यावदंतर्गतः घ
टत्वस्य दैशिकविशेषणतया हेतुमत्ताभावात् एवं हेत्वधिकरणावच्छेदेन तत्स्य प्रयोजनमुक्त्वा तदधीनानवेशस्य स्वविशि
ष्टत्वस्य प्रयोजनमाह स्वविशिष्टेति संयोगसामान्याभावस्य द्रव्ये प्राचीनैरनभ्युपगमात्तन्मत साधारण्येन संदेहात्तस्या ९८

भार्येकपीत्युक्ते अत्र मेयत्वाधिकरणे गुणेऽपि तत्र कपिसंयोगाद्रूपस्य साध्याभावस्य कपिसंयोगाभावात्मकप्रतियोगिसा
मानाधिकरण्येनास्ति गुणादौ संयोगाभावादिव्याप्तिः स्यात् स्वविशिष्टेत्युपादाने तु कपिसंयोगरूपो यः साध्याभाव
स्तद्विशिष्टमेयत्वाधिकरणे द्रव्यमेव तत्र प्रतियोगिसामानाधिकरण्यसत्वान्न दोष इत्यर्थः ननु कपिसंयोगाभावाभावो न
कपिसंयोगाभावरूपसाध्यव्यापकः कपिसंयोगाभाववन्निष्ठो यः कपिसंयोगरूपोऽत्यन्ताभावस्तत्प्रतियोगित्वात् संयो
गवत्यपि संयोगाभावस्वीकारात् अतोऽयं यावदन्तर्गतत्वेन न भवतीति चेन्न प्रतियोगिवैयधिकरण्यघटितव्यापकता
यास्तत्र सत्त्वात् कपिसंयोगाभाववद्वृत्तिर्हि कपिसंयोगाभावाभावो न प्रतियोगिवैयधिकरणः किंतु घटाभावादिः तदप्र
तियोगितत्स्य कपिसंयोगाभावे सत्त्वात् व्यापकतायाः प्रतियोगिवैयधिकरण्याघटितत्वे तु तस्य लोतरेऽव्याप्तिरित्याह अ
दौ इति द्रव्ये गुणादित्वादौ इत्यर्थः आकाशादिहत्नित्वविशिष्टवात्यन्ताभावस्य कालिकेन हेतुसमानाधिकरणस्य इत्यन्ते
न इत्यन्ताभावस्य च यावदन्तर्गतस्य हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावात् आकाशादेरपि हेत्वधि
करणत्वात्तत्र चाकाशादिहत्नित्वविशिष्टवात्यन्ताभावस्यासत्त्वात् स्वविशिष्टेत्युक्तौ तु आकाशादिहत्नित्वविशिष्टवात्यन्ता
भावविशिष्टहेत्वधिकरणे आकाशादिभिन्नमेव तदवच्छेदेन तत्सत्त्वान्न दोष इत्याह ननु धूमाभावे जलादिहत्नित्व
विशिष्टगोत्वाभावो नास्तीति प्रतीतेरभावाधिकरणकाभावस्य चाधिकरणस्वरूपत्वाद्धूमाभावो जलादिहत्नित्वविशि

अं. ४९

ष्टगोत्वाभावो नास्तीति प्रतीतेरभावाधिकरणकाभावस्याधिकरणस्वरूपत्वाद्धूमाभावो जलादिवृत्तित्वविशिष्टगोत्वाभा
वाभावश्चैकएव अतो धूमाभावस्य धूमत्वं जलादिवृत्तित्वविशिष्टगोत्वाभावोपि प्रतियोगी तेन सह धूमाभावस्य प्रतियोगि
तावच्छेदकविशेषणतासंबन्धेन हेत्वधिकरणावच्छेदेन सामानाधिकरण्यमस्तीति धूमवान्वह्नेरित्यादावतिव्याप्तिः
एवमयोगोलकान्यत्वाभाववृत्तिरपि जलादिवृत्तित्वविशिष्टगोत्वाभावाभावोधिकरणस्वरूपएवेत्ययोगोलकान्यत्वाभाव
स्य यथोक्तगोत्वाभावोपि प्रतियोगी सचायोगोलकेप्यस्तीति अयोगोलकान्यत्वाभावस्यापि प्रतियोगिसामानाधिकरण्या
न्नायोगोलकान्यत्वाभावमादायाव्याप्तिर्व्याप्युद्धारस्तत आह जलादीति अभावप्रतियोगिकस्याप्यभावस्याधिकरणस्व
रूपत्वानभ्युपगमादित्यर्थः जलाद्यभावइति तत्समनियतत्वादित्यर्थः तस्य धूमाभावस्वरूपत्वे बाधकमाह जलादावपी
ति जले धूमाभावसत्वात् जलवृत्तित्वविशिष्टगोत्वाभावो नास्तीत्यपि प्रतीतिः स्यादित्यर्थः ननु जलादिवृत्तित्वविशिष्टगोत्वा
भावे धूमाभावस्यतादात्म्यसंबन्धेन वर्त्तनेन तत्तादात्म्येनेति नोक्तप्रतीतिप्रसंगइति चेन्नैवं अनेनतत्तदभावस्वरूपत्वकल्पन
मपेक्ष्य लाघवात्क्लृप्तजलत्वाद्यभावस्वरूपत्वकल्पनायाएव युक्तत्वादिति भावः ननु तथापि उक्तातिव्याप्तिर्दुर्वारा धूमव
द्वृत्तित्वविशिष्टगोत्वाभावाभावस्य धूमाभावस्वरूपतया धूमवद्वृत्तित्वविशिष्टगोत्वाभावरूपप्रतियोगिनः प्रतियोगि
नः प्रतियोगितावच्छेदकेन विशेषणतासंबन्धेनाधिकरणे ऽयोगोलके धूमाभावस्य सत्वात्प्रतियोगिसामानाधिक ४९

रणपसंपत्तेः एवं समनियताभावैक्यपक्षे धूमाभावस्य वह्निधूमोभयाभावस्य चैक्याद्धूमाभावस्य वह्निरपि प्रतियोगीति तत्सामा-
नाधिकरण्यस्य धूमाभावेपि स्वविशिष्टहेत्वधिकरणावच्छेदेन सत्त्वात् उभयत्वावच्छिन्नाभावानभ्युपगमे भूतत्वेन सत्त्वेनोभय-
त्वानित्यादावतिव्याप्तिशंकाविरोधात् समनियताभावैक्यानभ्युपगमेव जलत्वाद्यभावएवेतिग्रंथविरोधात् सत्यम् एतदस्व-
रसादेव लक्षणांतरस्य वक्ष्यमाणत्वादिति केचित् अन्येतु साध्यव्यापकतावच्छेदकयद्धर्मप्रतियोगिताकाभावास्त्वेनत्प्रति-
योगिताश्रयसामानाधिकरण्यं विवक्षणीयं अभावैक्येपि प्रतियोगितानाभेदात् धूमाभावीयाधूमत्वनिष्ठाया प्रतियोगि-
तातदाश्रयधूमसामानाधिकरण्यविरहान्नातिव्याप्तिरित्याहुः यत्समानाधिकरणानामिति वह्निमान्धूमादित्यादौ इं-
धनत्वेन वह्न्यभावमादाय लक्षणसमन्वयः इंधनत्वस्य वह्निव्यापकतावच्छेदकत्वात् धूमवान्वह्नेरित्यादौ धूमत्वरूपा-
साध्यव्यापकतावच्छेदकधर्मावच्छिन्नप्रतियोगिताकधूमाभावस्य यावदंतर्गतस्य धूमसामानाधिकरण्याभावान्नातिव्याप्तिः
वह्नित्वेन ह्रदाभावस्य धूमाधिकरणे प्रतियोगिसामानाधिकरण्याभावादसंभववारणाय प्रतियोगितावच्छेदकावच्छिन्ने-
ति तादृशश्च वह्निरेवेति भावः साध्यव्यापकतावच्छेदकप्रतियोगिताकनिवेशेन ह्रदत्वादिना वह्न्यभावस्य प्रतियोगिताव-
च्छेदकह्रदत्वाद्यवच्छिन्नसामानाधिकरण्याभावादव्याप्तिवारणाय व्यापकतावच्छेदकप्रतियोगिताकत्वं विहाय व्यापकता-
वच्छेदकरूपावच्छिन्नप्रतियोगिताकेति वह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभाववारणाय यत्समानाधिकरणानामि

ॐ· ५० 50

ति केवलान्वयिन्युपयुक्तमभावमाह ज्ञेयत्वादिनेति यद्यप्यत्र ज्ञेयत्वादिना घटाद्यभावोऽपि सुलभः तथापि पूर्वलक्षणयोगिनोऽप्र
भावस्य लाभाय वाच्यत्वस्य प्रतियोगितया निर्देशः ज्ञेयत्वेन वाच्यत्वाभावस्य साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वे साध्यव्यापकता
वच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वे वास्तीति पक्षभेदेनोभयदर्शनस्य लघुत्वात् शेषमिति व्यभिचारिण्यपि सद्वैत्र ज्ञेयत्वेन वा
च्यत्वाभावस्य प्रतियोगितावच्छेदकावच्छिन्नज्ञेयत्वसामानाधिकरण्यसत्त्वादिति व्यभिचारिण्यव्याप्तेरुपादाने हेतुतावच्छेदकसं
बंधेन हेत्वधिकरणे घटादौ वर्तमानस्यात्मत्वेनात्मत्वाभावस्य प्रतियोगितावच्छेदकात्मत्वावच्छिन्नात्मत्वसामानाधिकरण्याभा
वेऽपि नाव्याप्तिः समवायेन हेत्वधिकरणे आत्मनि तदभावस्याहम्यापावदन्तर्गतत्वाभावात् कालोगोमानोत्वादित्यादौऽव्याप्तिवा
रणाय हेत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्ये कपिसंयोगाभाववान् एतत्त्वादित्यादावव्याप्तिः
वारणाय च स्वविशिष्टहेत्वधिकरणावच्छेदेनेति बोध्यमित्यर्थः अत्र प्रतियोगितावच्छेदकसंबंधेन यत्प्रतियोगितावच्छेदकाव
च्छिन्नाधिकरणे न तद्वृत्तित्वे प्रतियोगितावच्छेदकावच्छिन्नाधिकरणे न तद्वृत्तित्वे प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं बो
ध्यं तेन पृथिवीजन्यत्वादित्यादौ नातिव्याप्तिः यद्वा साध्यतावच्छेदकसंबंधेन व्यापकत्वे तेनैव यत्प्रतियोगितावच्छेदकावच्छिन्ना
धिकरणे न तद्वृत्तित्वं बोध्यं एतद्रूपान्यत्वविशिष्टसत्त्ववान् सत्त्वादित्यत्र एतद्रूपान्यत्वविशिष्टसत्त्वाभावस्य यावदन्तर्गतत्वेऽपि प्रतियो
गितावच्छेदकीभूतोक्तविशिष्टसत्त्वत्वावच्छिन्नोक्तविशिष्टसत्त्वसामानाधिकरण्याभावान्नातिव्याप्तिः पूर्वलक्षणे प्रतियोगि ५०

सामानाधिकरण्यस्योक्ततयापन्नरूपान्यतमाभावस्य यावदेतद्भीवं विनाऽतिव्याप्तिवारणस्यानुपपत्तिरिति साध्यतावच्छेदकसं
बन्धेन व्यापकत्वमिति पक्षपरित्यागादिति वैषम्यं ननु प्रतियोगितावच्छेदकावच्छिन्नेति व्यर्थं न वह्नित्वेन रूपाद्यभावस्य धू
माधिकरणे प्रतियोगिसामानाधिकरण्याभावादसंभव इति वाच्यं रूपत्वेन वह्न्यभावस्य तस्यैकाद्वह्निरूपप्रतियोगिसा
मानाधिकरण्यसत्त्वात् सत्तावाञ्जातेरित्यादावव्याप्तिवारणार्थं व्यापकतावच्छेदकरूपावच्छिन्नेति ग्रन्थस्याविशिष्टस
न्नाभावस्येहत्वधिकरणावच्छेदेन प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभावात् न च साध्यतावच्छेदकावच्छि
न्नप्रतियोगिताकत्वमेव सम्यगिति वाच्यं गुरुधर्मेण साध्यतायामव्याप्तेः तस्यापि प्रतियोगितावच्छेदकत्वस्वीकारे तत्र व्या
प्तिविशेषेऽपि दोषाभावात् ननु धूमवान् वह्नेरित्यादावतिव्याप्तिः तथाहि धूमत्वेन धूमाभावस्य वह्नित्वावच्छिन्नप्रतियोगि-
ताकधूमवद्वृत्तिप्रतियोगिकाभावस्वरूपतया वह्नित्वमपि तत्प्रतियोगितावच्छेदकं तदवच्छिन्नसामानाधिकरण्यस्य धूमा-
भावे सत्त्वात् अयोगोलकान्यतमाभावे यावदेतद्गतमादायापि न तदुद्धारः तस्याप्ययोगोलकान्यतमीयस्वरूपसंबन्धेन भेद
त्वेन भेदाभावस्वरूपतया भेदत्वरूपप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यात् यत्किंचिद्भेदस्यायोगोलकेऽपि सत्त्वात्
एवं भावत्वेनायोगोलकवृत्तिभावान्यप्रमेयाभावेन अभावत्वेनायोगोलकवृत्त्यभावातिरिक्तप्रमेयाभावेन च सह तद्दे
कमादाय योज्यं अत्राहुः दण्डेन पुरुषो नास्तीत्यत्र दण्डविशिष्टपुरुषत्वमिव वह्नित्वेन धूमवद्वृत्तिर्नास्तीति बुद्धौ वह्नित्वविशि

रूपधूमवद्वृत्तित्वे प्रतियोगितावच्छेदकतयाभासते न तु शुद्धवह्नित्व एवमग्रेऽप्यापीति न दोषः केचित्तु यावत्त्वमर्थेनः प्रतियोगिता
विशेषणं तेन साध्यव्यापकतावच्छेदकरूपावच्छिन्नाया यावत्यः प्रतियोगितास्तन्निरूपकाभावानां तत्तदवच्छेदकावच्छिन्नसा
मानाधिकरण्ये निवेशे एवं च धूमत्वावच्छिन्नाया धूमनिष्ठप्रतियोगिताया अपि निरूपको योऽभावस्तस्य धूममात्रनिष्ठप्रतियो
गितायामवच्छेदके धूमत्वे तदवच्छिन्नसामानाधिकरण्याभावान्नातिव्याप्तिरित्याहुः अन्ये तु साध्यव्यापकतावच्छेदकरूपा
वच्छिन्नप्रतियोगितानिरूपिताया यावत्यः प्रतियोगितास्तत्त्वं तासामेव निरूपकप्रतियोगितावच्छेदकावच्छिन्नसमानाधिकरण
वृत्तित्वे विवक्षणीये तथा च धूमत्वावच्छिन्नप्रतियोगितानिरूपितो योऽभावनिष्ठप्रतियोगिताविशेषस्तस्मिन्स्वनिरूपकप्र
तियोगितानिरूपितो यो यदवच्छेदकधूमत्वावच्छिन्नसमानाधिकरणवृत्तित्वस्याभावान्नातिव्याप्तिः धूमत्वावच्छिन्नाभावस्य धूम
वत्यसत्त्वादित्याहुः वक्ष्यमाणलक्षणमाह केचित्त्विति अनवच्छेदकमित्युभयस्य साध्यतावच्छेदकमित्यनेनान्वयः तथा
च व्याप्यवृत्तेर्हेतुसमानाधिकरणस्य साध्याभावस्य प्रतियोगिताया अनवच्छेदके यत्साध्यतावच्छेदके तदवच्छिन्नसाध्यसा
मानाधिकरण्यं व्याप्तिरिति केवललक्षणं हेतुसमानाधिकरणस्य व्याप्यवृत्तेरभावस्य प्रतियोगितायाः सामानाधिकरण्ये
नानवच्छेदके यत्साध्यतावच्छेदके तदवच्छिन्नसाध्यसामानाधिकरण्यं इति द्वितीये इहैव व्याप्यवृत्तित्वस्यानेन प्रतियोगिव्य॰
धिकरणे स्यात्तदभिधानेन तृतीये कपिसंयोगी एतद्वृक्षत्वादित्यादौ हेतुसामानाधिकरण्यस्य कपिसंयोगाभावरूपसाध्या॰ ५१

भावस्य प्रतियोगितायाश्चावच्छेदकमेव साध्यतावच्छेदकमित्यव्याप्तिवारणायाव्याप्यवृत्तेरिति कपिसंयोगाभावस्तु मू-
लावच्छिन्नवृत्तिकतामतयेति नाव्याप्तिः वह्निमान्धूमादित्यादौ वह्नित्वेन घटाभावप्रतियोगितावच्छेदकमेव वह्नित्वमतः
साध्याभावेति घटाभावस्तु न साध्यत्वप्रतियोगिताक इति नाव्याप्तिः ह्रदादिवृत्तिवह्न्यभावप्रतियोगितावच्छेदकता
ह्नित्वस्याव्याप्तिवारणाय हेतुसामानाधिकरण्येति वह्नित्वावच्छिन्नवह्न्यभावस्य धूमसामानाधिकरण्याभावान्न
दोषः समवायावच्छिन्नवह्न्यभावस्य प्रतियोगितावच्छेदकतावह्नित्वस्याव्याप्तिवारणाय साध्यतावच्छेदकसंबंधावच्छिन्न-
त्वमपि प्रतियोगितायां देयं प्रतीतिबलाद्व्याधिकरणधर्मावच्छिन्नाभावीयप्रतियोगिताया अपि संबंधावच्छिन्नत्वस्वीकारात्
केचित्तु साध्यतावच्छेदकसंबंधातिरिक्तसंबंधानवच्छिन्नत्वं प्रतियोगिताविशेषणमित्याहुः तत्र वह्नित्वस्य धूमवत्त्विहे
वह्निभेदप्रतियोगितावच्छेदकत्वादव्याप्तिः न च संयोगातिरिक्तेन तादात्म्यसंबंधेन तत्प्रतियोगिताया अवच्छिन्नत्वान्न दोष
इति वाच्यं भेदप्रतियोगितायास्तादात्म्यावच्छिन्नत्वे प्रमाणाभावात् नन्वेवमेतल्लक्षणवत्प्रतियोगिव्यधिकरणत्वमपि
कुतो नोक्तमिति चेत् इदं वाच्यं ज्ञेयत्वादित्यादौ प्रतियोगिव्यधिकरणत्वमपि कुतो नोक्तमिति चेत् इदं वाच्यं ज्ञेयत्वादित्यादौ
प्रतियोगिव्यधिकरणसाध्याभावाप्रसिद्धेरिति केचित् स्वमते तु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यं तत्रा-
प्यप्रसिद्धं घटत्वेन वाच्यत्वाभावस्य प्रतियोगितावच्छेदकं घटत्वं तदवच्छिन्नो घटस्तदनधिकरणं पटादि प्रसिद्धं तद्वृत्तित्व॰

उ·
५२
५४

सोक्ताभावेसत्त्वात् किंतुप्रमेयत्वान्वाद्यत्वादित्यत्र घटत्वपटत्वाभ्यां समवायेनावच्छिन्नप्रतियोगिताकस्य प्रमेयाभावस्य प्रति
योगितावच्छेदकावच्छिन्नवैयधिकरण्यमप्रसिद्धम् घटत्वपटत्वोभयस्य समवायेन क्वाप्यवृत्तत्वात् उभयावच्छिन्नत्वस्यैकैर
प्रसिद्धेरित्याहुः नन्वत्र किंव्याप्यवृत्तित्वेन न क्षते कपिसंयोगाभावस्यापि गुणादौ निरवच्छिन्नवृत्तित्वात् तस्यैव वृत्तेऽपि हे·
तोः अधिकरणभेदेनाभावभेदानभ्युपगमात् मैवं निरवच्छिन्नविशेषणतया हेत्वधिकरणवृत्तित्वस्य तदर्थत्वात्
गुणादेश्च हेत्वनधिकरणत्वात् यत्र हेतावेव निरवच्छिन्नविशेषणतया तस्या वृत्तिमत्तदा रणोपपत्तेः यद्वा हेत्वधिकरणी
भूत यत्किंचिद्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकतद्व्यक्तित्वकत्वमेवात्र व्याप्यवृत्तित्वं
गुणे कपिसंयोगाभावस्य व्याप्यवृत्तित्वरक्षार्थं हेत्वधिकरणीभूतेति कपिसंयोगीसत्त्वादित्यादौ तद्दोषार्थं यत्किंचिद्व्या
दिति कपिसंयोगाभावव्यक्तित्वस्य द्रव्यरूपहेत्वधिकरणनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकत्वेपि गुणादिरूपहे·
त्वधिकरणनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्व्याप्यवृत्तित्वोपपत्तिः कपिसंयोगाभावत्वेन घटाभावस्य गुण
दावपि सत्त्वात्सामानाधिकरण्येनेति कपिसंयोगाभावत्वावच्छिन्नप्रतियोगिताकस्य कपिसंयोगाभावाभावस्य द्रव्य
एव वृत्तित्वात् एवं च कपिसंयोगी द्रव्यत्वादित्यादौ नातिव्याप्तिः तत्र संयोगाभावस्याव्याप्यवृत्तितया संयोगत्वस्य त
त्प्रतियोगितावच्छेदकत्वात् नन्वह्नित्वेन घटाभावस्य घटत्वेन वह्न्यभावरूपत्वात्तत्प्रतियोगितावच्छेदकमेव वह्नि ५२

तमित्यव्याप्तिः नचसाध्यनिष्ठायाः प्रतियोगितायाअनवच्छेदकमितिवाच्यं वह्नित्वेनपर्वतत्वेनोभयाभावीयप्रतियोगितायाव
च्छ्रावपिसत्वान्नदोषतादवस्थ्यात् एवंवह्नित्वेनवह्निघटोभयाभावीयप्रतियोगितामादाययोज्यमेवम् स्वव्यापकेसाः
ध्यतावच्छेदकंयस्यास्तत्प्रतियोगितानवच्छेदकत्वस्यविवक्षितत्वात् स्वपदेप्रतियोगितापरे उक्ताभावप्रतियोगितायाश्च
साध्यतावच्छेदकव्याप्यताभावात् तत्प्रतियोगिताश्रयेघटादौवह्नित्वस्याहेतेः अतोलाघवाल्लक्षणान्तरमाह हेतुसा
मानाधिकरण्यस्येत्यादि व्याप्यवृत्तित्वादिकंपूर्ववद्व्याख्येयं अत्राभावांशेसाध्यस्यानिवेशाद्वह्नित्वेनघटाभावप्रतियो
गितावच्छेदकत्वाद्वह्नित्वस्यवह्निमान्धूमादित्यादावव्याप्तिःस्यादतः सामानाधिकरण्येनेत्युक्तेउक्ताभावेनवह्नित्वमधिकर
णीभूयैवप्रतियोगितावच्छेदकमितिनाव्याप्तिः नचवह्नित्वेनवह्निघटोभयाभावीयप्रतियोगितायाः सामानाधिकर
ण्येनावच्छेदकेवह्नित्वमित्यव्याप्तितादवस्थ्यं व्यापकीभूयावच्छेदकंयत् तद्भिन्नत्वस्यविवक्षितत्वात् तत्रप्रतियोगिता
व्यापकेयत्स्वच्छेदकेनदन्यत्वस्यानवच्छेदकार्थत्वात्लाघवेपूर्वेचस्वव्यापकसाध्यतावच्छेदककप्रतियोगितानवच्छेदक
त्वस्यसाध्यतावच्छेदकघटितत्वेनगुरुत्वात् ननुवह्नित्वेनमहानसीयवह्नेःतार्णवह्नेश्चाभावीयप्रतियोगितायाव्याप
कीभूयैवावच्छेदकेवह्नित्वमित्यव्याप्तितादवस्थ्यमितिचेन्नैवं तत्रमहानसीयत्वमयत्वयोरेवप्रतियोगितावच्छेदक
त्वात् नचापिवह्नित्वस्यप्रतियोगितावच्छेदकत्वेत्वाह प्रतियोग्यधिकरणस्येति केचित्तुव्याप्यवृत्तित्वे यत्किंचित

ॐ

५२

वृत्तित्वादेननुगतेगुरुत्वसंयोगविशेषणत्वादिभेदेनभावाभावसाधारण्यंवैनैकमनुगमाह प्रतियोगिव्यधिकरणस्येतीमाद्यः अ
भेदेनावच्छिन्नवृत्तिकत्वरूपेव्याप्यवृत्तित्वसंयोगभिन्नेभेयत्वादित्यादावतिव्याप्तिः साध्याभावस्यसंयोगस्याव्याप्यवृत्तित्वात्तथाह
प्रतियोगिव्यधिकरणस्येतीमाद्यः नन्वत्र किं प्रतियोगिव्यधिकरणत्वं नतावत्प्रतियोगिसमानाधिकरणभिन्नत्वं सर्वा
साध्याभावस्यतत्तत्क्षणवृत्तित्वविशिष्टस्वाभावात्मकप्रतियोगिसमानाधिकरणत्वात् संयोगीसत्त्वादित्यादावतिव्याप्तेः
संयोगाभावस्यसंयोगरूपप्रतियोग्यधिकरणवृत्तितयातद्भिन्नत्वाभावात् नापिप्रतियोगितावच्छेदकावच्छिन्नानधिकरण
हेत्वधिकरणवृत्तित्वे वह्नित्वेनघटाभावस्यानेनैववारणेनतदर्थस्यसामानाधिकरण्यपनेतत्पस्यैवयर्थ्यापत्तेः अत्रवदंति यत्प्र
तियोगितावच्छेदकधर्मावच्छिन्नप्रतियोगितावच्छेदकताकोयत्प्रतियोगिताश्रयावच्छिन्नप्रतियोगिताकस्वभेदोहेत्वधिकर
णावृत्ते तत्प्रतियोगितास्वसमानाधिकरणभिन्नवृत्तित्वेप्रतियोगिव्यधिकरणत्वं नसाध्यवत्प्रतियोगितायाःसमानाधिक
रणवृत्तित्वेनानवच्छेदकत्वसामानाधिकरण्यपेनानवच्छेदकाभित्यस्यार्थः वह्नित्वेनघटाभावीयाप्रतियोगिताहिवह्नित्वाव
च्छिन्नाघटनिष्ठावभवतिचवह्नित्वावच्छिन्नप्रतियोगितावच्छेदकताकोघटावच्छिन्नप्रतियोगिताकस्वभेदोऽस्माधिकरणवृ
त्तिः वह्नित्वेनघटोनास्तीतिप्रतीतेः उक्तभेदस्यैवात्रविषयत्वात् संयोगत्वेनसंयोगाभावीयासंयोगनिष्ठाप्रतियोगितावेन
नातिरिक्तापि पत्तद्गुरुत्वसंयोगत्वेनसंयोगोनास्तीत्यप्रतीतेः एतादृशस्वप्रतियोगितायाः सामानाधिकरण्येनावच्छेदका ५३

प्रसिद्ध्यानभेदोऽप्रसिद्ध इति सामानाधिकरण्यघटितत्वेन रूपेणावच्छेदकभेद उक्तः ननु अत्र भेदे वह्निविशिष्टघटः प्रतियोगिता-
वच्छेदकः शुद्धघटो वा नाद्यः अप्रसिद्धेः नान्त्यः तद्घटितभेदानवबोधात् मैवं शुद्धघटे प्रतियोगितावच्छेदकतायां वह्नित्वव-
तदवच्छेदकतायाः स्वीकारात् प्रतियोगितावच्छेदकत्वतदवच्छेदकत्वस्यापि स्वरूपसंबंधविशेषत्वात् लक्षणान्तरेष्वप्या-
स्यैव लक्षणमाह एवं चेति यत्समानाधिकरणेत्यादौ त्वन्तस्यापारिभाषिकमात्रत्वादिति भावः हेतावितिसाध्याभावेत्य-
त्रसाध्यपदस्य घटार्थे ननु वह्नित्वेन घटाभाववारणार्थं दृष्टान्तस्य सिद्धान्तरीत्योक्तत्वात् तत्र व्यधिकरणधर्मावच्छिन्ना-
भावानभ्युपगमात् ननु महानसीयवह्न्यभावीयप्रतियोगितायाः सामानाधिकरण्येनैव वह्नित्वमवच्छेदकमिति यथा-
श्रुताशंकायामाह अवच्छेदकत्वेचेति अनवच्छेदकत्वे अवच्छेदकतापर्याप्त्याश्रयभिन्नत्वे प्रतियोगितावच्छेदकता-
याः तत्र महानसीयत्ववह्नित्वोभयत्रव्यासज्यवृत्तित्वात् तत्पर्याप्त्यनाश्रयत्वं वह्नित्वस्य सुस्पष्टमिति भावः तदेवाह तेनेति
विशिष्टेति महानसीयत्वादिविशिष्टेत्यर्थः ननु वह्नित्वनिष्ठप्रतियोगितावच्छेदकतायाः सामानाधिकरण्येन महा-
नसीयत्वमवच्छेदकं अतो निरवच्छिन्नावच्छेदकताश्रयत्वस्वरूपमनवच्छेदकत्वमत्र वाच्यमिति किमर्थमवच्छेदकताया व्या-
सज्यवृत्तित्वस्वीकारास्तत आह हृदत्ववह्नित्वेति अत्र हृदत्वस्य वह्नित्वसामानाधिकरण्याभावात् पूर्वोक्तरीतेरसंभवादिति
भावः ननु व्याप्यवृत्तित्वघटितलक्षणे हृदयव्याप्यवृत्तित्वात्साध्यके व्यभिचारिण्यतिव्याप्त्यभिप्रायेत आह सत्त्ववतीति एतत्त्वस्या

ॐ गेवव्याप्यत्वे न त्वप्रमेयत्वसत्वादिगुरुधर्मेण साध्यतायामतिव्याप्तिः तस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदक
त्वादित्यत आह वक्ष्यमाणं चेति प्रतियोगितावच्छेदकतानतिरिक्तवृत्तित्वमात्रनिवेशे सत्तावान्द्रव्यत्वादित्यादावव्याप्तिः हेत्वधि
५४ करणगुणनिष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वानतिरिक्तवृत्तित्वात्सत्तात्वस्य तन्मते वक्ष्यमाणं तूक्तं तथा च हेतु-
समानाधिकरणाभावीयप्रतियोगितायाः सामानाधिकरण्येनावच्छेदकं यद्विशिष्टसंबन्धिनिष्ठाभावप्रतियोगितानवच्छे
दकत्वे तत्त्वं प्रतियोगितावच्छेदकत्वमित्यर्थः भवति च वह्निसमानाधिकरणाभावीयप्रतियोगितायाः समानाधिकरण्येनाभा
वीयप्रतियोगितायामवच्छेदकं धूमत्वं प्रमेयधूमत्वविशिष्टस्य धूमस्य संबन्धीयः पर्वतादिस्तन्निष्ठाभावप्रतियोगितानवच्छे
दकमित्येतादृशं प्रतियोगितावच्छेदकत्वं प्रमेयधूमत्वेपि सत्वमिति भावः एवं च संयोगी सत्वादित्यादौ संयोगाभा
वस्य व्याप्यवृत्तित्वरक्षार्थं हेत्वधिकरणयत्किंचिद्व्यक्तिवृत्त्यभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकत्वस्य
क्तित्वकत्वरूपं पूर्वोक्तं तन्निर्वाच्यं गुरुत्वात् किं त्ववच्छिन्नवृत्तिकामत्वमेव तेनैवं संयोगाभावस्याव्याप्यवृत्तित्वे व्याप्यवृत्तित्वे
ऽप्यभावप्रतियोगितानवच्छेदकमेव साध्यतावच्छेदमित्यतिव्याप्तिरिति वाच्यं पारिभाषिकावच्छेदकत्वस्य संयोगत्वे सत्वा
दित्यमाह भवति चेति गुणादौ सत्वसमानाधिकरणेऽव्याप्यवृत्तिस्संयोगगुणाभावस्तत्प्रतियोगितायाः सामानाधिकरण्ये
नावच्छेदकं गुणत्वं संयोगत्वविशिष्टसंबन्धिनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकं संयोगवृत्तिगुणात्यन्ताभावस्य स- ५८

त्वात् उक्तावच्छेदकत्वस्य संयोगत्वे सत्त्वादिति भावः ननु गुणाभावोपि न व्याप्यवृत्तिः उत्पत्तिकालावच्छेदेन जन्यद्रव्ये वर्त्तमा
नत्वादधिकरणभेदेनाभावभेदाभावादिति कथमुक्तरीत्यातिव्याप्त्युद्धार इत्यत आह गुणवृत्तित्वेति तथा च गुणवृत्ति
पदार्थस्य द्रव्यत्वादेरभावोऽनवच्छिन्नवृत्तिक एव गुणादौ सर्वदा तत्सत्त्वात् द्रव्ये तु कदाचिदप्यसत्त्वात् तेन गुणे हेतुसमा
नाधिकरणे व्याप्यवृत्तिर्यो गुणवृत्त्यभावस्तत्प्रतियोगितावच्छेदकं गुणवृत्तित्वं संयोगत्वविशिष्टसंबंधेन निष्ठाभावप्र
तियोगितानवच्छेदकं द्रव्ये गुणवृत्तिप्रतियोगिकाभावासत्त्वादिति भावः नन्वेवमपि संयोगी गुणान्यत्वादित्यादावति
व्याप्तिः गुणवृत्त्यभावस्य हेतुसमानाधिकरणत्वात् अतः संयोगसाध्यकव्यभिचारिमात्रेतिव्याप्त्युद्धारप्रकारमाह द्रव्यमा
त्रेति द्रव्यान्यासमवेतत्वमित्यर्थः तथा च द्रव्यान्यासमवेतस्य समवायसंबंधावच्छिन्नप्रतियोगिताकस्य तन्मते तु समाना
धिकरणस्य द्रव्यान्यासमवेतप्रतियोगिकस्याभावस्य प्रतियोगितावच्छेदकं द्रव्यान्यासमवेतत्वं संयोगत्वविशिष्टसंबंधेनि
ष्ठाभावप्रतियोगितानवच्छेदकं द्रव्यान्यासमवेताभावस्य द्रव्येनुपपत्तेरिति भावः अङ्कुरितत्वस्य तद्बीजेत्वसामानाधि
करण्येनेति न देयं किंतु प्रतियोगितावच्छेदकावच्छिन्नानधिकरणहेत्वधिकरणनिष्ठाभावप्रतियोगिताया अनवच्छेदक
मित्याद्येव वह्नित्वेन घटाभावस्य वह्नित्वावच्छिन्नानधिकरणधूमाधिकरणेऽप्रसिद्धेर्वारितत्वात् न चैवं प्रतियोग्यप्रवृत्तिभि
न्नत्वादेराभासत्वानुपपत्तिः अनवच्छेदकमित्यनेन अवच्छेदकावच्छिन्नसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकभेद

वत्त्वस्य अवच्छेदकतावच्छिन्नप्रतियोगिताकभेदकूटवत्त्वस्य व्याप्तिविषयत्वात् अवच्छेदकत्वेन घटादिभेदस्यावच्छेदकेपि सत्त्वात्
ॐ द्वारणार्थत्वात् एतावतैव व्यधिकरणधर्मावच्छिन्नाभावलाभादिकेचित् अमेयसाध्यके सर्वेषामेवाभावस्य साध्याभाववत्त्वादा
५५ घलक्षणे साध्येति व्यर्थं द्वितीये च सामानाधिकरण्येनेत्यस्य प्रागल्भीयं लक्षणद्वयमाह साध्येति साध्यतावच्छेदकाव
च्छिन्नसाध्यसामानाधिकरण्यावच्छेदकं यत्समानाधिकरणसाध्याभाववत्त्वं यस्य तत्त्वमिति समासः अवच्छेदकत्वं व्यापक
त्वे यत्समानाधिकरणसाध्याभाववत्त्वं तत्साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यमिति तदर्थः अस्ति च वह्नित्वेन
घटाभावे धूमसमानाधिकरणसाध्याभाववत्त्वे वह्निसामानाधिकरण्ये चेति लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ तु वह्निस
मानाधिकरणसाध्याभाववत्त्वे धूमत्वेन धूमाभावे व्याप्तिः न तु धूमसामानाधिकरण्यमिति नातिव्याप्तिः विशिष्टसत्तावान् जा
तेरित्यादावव्याप्तिः तत्र जातिसमानाधिकरणसाध्याभाववत्त्वे विशिष्टसत्तात्वेन विशिष्टसत्ताभावे तत्र सत्त्वसामानाधिक
रण्यसत्त्वात् अतः साध्यतावच्छेदकावच्छिन्नेति साध्यपदेन साध्यतावच्छेदकसंबंधेन साध्याधिकरणं यत्र ह्निमित रूप
सामानाधिकरण्यलाभार्थं अन्यथा ऽघटत्वेनवान् इत्यत्रादित्वज्ञानत्वेन ज्ञानाभावस्य दत्वत समानाधिकरणस्यावि
षयतया ज्ञानाधिकरणे घटादौ वृत्तित्वादतिव्याप्तिः साध्याभावोत्र साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपाव
च्छिन्नप्रतियोगिताकः न तु साध्यवृत्तिप्रतियोगिताकः उभयत्वाद्यवच्छिन्नाभावमादाय लक्षणे प्रयत्नो प्रकृताभास ५५

तविरोधात् यत्तन्निवेशे संयोगी सत्त्वादित्यादावतिव्याप्तिः हेतुसामानाधिकरण्यस्य संयोगत्वेन संयोगाभावस्य साध्यसा
मानाधिकरण्यनियमात् एवमाकाशाभावाभाववान्नित्यत्वादित्यादौ आकाशाभावस्य कालिकसंबंधावच्छिन्नप्रतियो
गिताकाभावे साध्ये आकाशाभाव एव साध्याभावः कालिकसंबंधेन आकाशाभावाभावो नास्तीति बुद्धौ तत्संबंधविषयत्वा
त् तत्रोक्ताकाशाभावाभावरूपे साध्ये नित्यमात्रवृत्ति जन्येषु कालिकसंबंधेन आकाशाभावस्यैव सत्त्वात् अतो मेयत्व
समानाधिकरण्यस्याकाशाभावात्मकस्य साध्यसामानाधिकरण्यनियमादतिव्याप्तिः द्वितीयलक्षणोक्तरीत्या साध्या
भावनिवेशात् अपि द्रव्यत्वेन द्रव्यत्वाभावमादाय द्वितीये च नित्यत्वेन नित्यत्वाभावमादाय तदुद्धारः अस्ति हि तत्र हेतु
समानाधिकरणसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकसाध्याभाववत्त्वे द्रव्यत्वस्यैव संयोगव्यापकतावच्छे
दकत्वात् नित्यत्वस्यैवोक्ताकाशाभावाभावव्यापकतावच्छेदकत्वात् उक्तसाध्यसामानाधिकरण्येव नास्ति संयोगवति
द्रव्यत्वेन द्रव्यत्वाभावस्य उक्ताकाशाभावाभाववति च नित्यत्वेन नित्यत्वाभावस्यासत्त्वात् साध्यवृत्तिप्रतियोगि
ताकाभावनिवेशेन उक्ताभावयोस्त्यागादतिव्याप्तिः स्यादिति तत्र तत्रापि द्रव्यान्यासमवेताभावे विशेषणेन तयोर्नि
त्यवृत्त्यभावे वादाय क्रमेण तदुद्धारात् तयोः साध्यवृत्तिप्रतियोगिताकत्वात् स्वपदे हेतुतावच्छेदकावच्छिन्नेहेतुपरे
अन्यथा द्रव्ये विशिष्टसत्त्वादित्यत्र शुद्धसत्त्वसमानाधिकरण्यस्य द्रव्यत्वेन द्रव्यत्वाभावस्य साध्यसामानाधिकरण्याभा

वादव्याप्तेः विवक्षायां तत्तत्सत्त्वविशिष्टसत्त्वासामानाधिकरण्याभावात् इत्थं तत्त्वेन घटाभाव एव हेतुतावच्छेदकावच्छिन्नसमा
उ॰ नाधिकरणसाध्याभावः तस्य च साध्यसामानाधिकरण्यसत्त्वान्नाव्याप्तिः एवं हेत्वधिकरणे हेतुतावच्छेदकसंबन्धेन ग्राह्यम् ते
५९ नात्मत्वानादिमत्त्वविषयत्वयोर्ज्ञानाधिकरणे घटादौ वर्तमानस्यात्मत्वेनात्मत्वाभावस्य साध्यसामानाधिकरण्याभावे
56 ऽपि नाव्याप्तिः समवायेन हेत्वधिकरणे आत्मभिन्नस्याऽहर्त्तित्वात् आत्मत्वेन घटाभावस्यैव हेतुसमानाधिकरणसाध्या
भावत्वात् तस्य च साध्यसामानाधिकरण्यसत्त्वात् द्वितीयलक्षणमाह यत्समानाधिकरणेति साध्याभावविशेष
णे चेदं पूर्ववदर्थः प्रमायामिति प्रमासामान्येऽन्यथा विरोधित्वाभावस्य प्रमात्वावच्छेदेनान्वयात् धूमसमानाधिकरण
साध्याभावो घटत्वेन वह्न्यभावस्तत्प्रमायाः पर्वतो वह्निमानिति ज्ञानप्रतिबन्धकत्वाभावाल्लक्षणसमन्वयः धूमवान्वह्नेरित्या
दौ तु वह्निसमानाधिकरणस्य घटत्वेन धूमाभावस्य प्रमायां धूमवत्ताज्ञानविरोधित्वाभावेऽपि धूमत्वेन धूमाभावस्यापि वह्निस
मानाधिकरणत्वात्तत्प्रमायामेव धूमवत्ताज्ञानप्रतिबन्धकत्वान्नातिव्याप्तिः एवमग्रे योज्यम् साध्यवत्ताग्रहस्य साध्यतावच्छे
दकावच्छिन्नप्रकारताको बोध्यः तेन तत्तद्वह्न्यभावप्रमायास्तत्तद्वह्निमत्ताज्ञानविरोधित्वेऽपि नाव्याप्तिः न वा संबन्धान्तरेण धूम
समानाधिकरणवह्न्यभावप्रमायाः संबन्धान्तरेण वह्निमत्ताग्रहविरोधित्वेऽप्यव्याप्तिः घटत्वेन वह्न्यभावे वह्नितावच्छिन्नप्रतियो
गिताकत्वसंबन्धेन वह्निभ्रमदशायां तस्य वह्निमत्ताज्ञानविरोधित्वादत उक्तं प्रमायामिति तच्च सर्वांशे बोध्यं तेन भ्रमसा ५९

शतः प्रामाण्येपि न दोषः न च कपिसंयोगी एतत्त्वादित्यत्र हेतुसमानाधिकरणकपिसंयोगाभावस्य प्रमायाः गुणादौ
साध्यवत्ताग्रहविरोधित्वात् अव्याप्तिरिति वाच्यं निरवच्छिन्नविशेषणतया हेत्वधिकरणवृत्तित्वस्य यत्समानाधि
करणेत्यनेन न विवक्षितत्वात् तस्य च हेत्वधिकरणेऽवच्छिन्नवृत्तिमत्त्वात् गुणादेश्च हेत्वधिकरणत्वात् अस्तु वा य
त्समानाधिकरणेति प्रमाया एव विशेषणं न च पर्वतो वह्निमान् ह्रदो वन्ह्यभाववानिति प्रमाया विशेष्यतासंबंधेन प
र्वतेपि सत्त्वादव्याप्तिः हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे साध्याभावनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन
प्रमाया वृत्तित्वेन तदात्मकस्य हेतुसामानाधिकरण्यस्य विवक्षणीयत्वात् तादृशसंबंधेन पर्वंधेन पर्वते उक्तस
मूहालंबनप्रमाया अवृत्तेः सर्वत्रेति उक्तलक्षणद्वयेपीत्यर्थः साध्याभावपदेति प्रथमे यत्र साध्यसामानाधिक
रण्यं तत्र हेतुसामानाधिकरण्यं इत्येवं सामर्थ्यात् हेतुसामानाधिकरण्यतावच्छेदकतानामपि साध्यसामाना
धिकरण्यनियमात् द्वितीये च यत्समानाधिकरणप्रमात्वावच्छेदेन साध्यवत्ताग्रहविरोधिताभाववृत्तित्वस्य
वानिर्दुष्टत्वात् हेतुसमानाधिकरणवृत्तित्वेन प्रमाया अपि साध्यवत्ताग्रहं प्रतिविरोधित्वात् केचित्तु हेतुसा
मानाधिकरणे साध्यप्रमायाः सिद्धिविधयानुमितिरूपसाध्यवत्ताग्रहविरोधित्वादसंभववारणाय साध्याभा
वपदमित्याहुः तत्र साध्यवत्ताज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताभावस्योक्तत्वात् सिद्धेस्तत्र

मितित्वावच्छिन्नप्रतिविरोधित्वात् तदीयमेव लक्षणं तत्रमाह यत्तित्यत्रेष्टसाध्याभाववद्वृत्तित्वावच्छेदेन प्रकृतानु-
उ॰ ५८ मितिविरोधिज्ञानविषयत्वाभावस्तत्वेव्याप्तिरित्यर्थः साध्याभाववद्वृत्तित्वस्य स्वरूपसतो विरोधित्वाभावात् न च सा-
ध्याभाववद्देवमर्थं पर्वतीयधूमाभाववद्वृत्तित्वज्ञानस्याविरोधितया धूमवान्वह्नेरित्यादावतिव्याप्तिः न च येन निरुक्तवृत्ति-
त्वावच्छेदेनैतत्तनयवत्तद्वारणमितिवाच्यं घटत्वेन वह्न्यभाववद्वृत्तितावच्छिन्नप्रतियोगिताकत्वभ्रमेण पत्रवह्न्यभाववद्वृत्ति-
त्वे धूमे गृहीते तत्र धूमनिष्ठवृत्तित्वस्यापि प्रतिबंधकज्ञानकविषयत्वावच्छेदकत्वादव्याप्तेः प्रतिबंधकतापर्याप्त्यधिक-
रणत्वस्य वक्तव्ये हेतुनिष्ठवृत्तित्वेप्यभावादतिव्याप्तेः प्रतिबंधकतापर्याप्त्यधिकरणत्वस्य वक्तव्ये हेतुनिष्ठवृत्तित्वेप्यभा-
वादतिव्याप्तेः साध्याभावपदोपादानेन हेतुनिष्ठसाध्याभाववद्वृत्तित्वावच्छेदेन विरोधित्वाभावलाभे धूमे वह्न्यभा-
ववद्वृत्तित्वाभावासत्वात् घटत्वेन वह्न्यभाववद्वृत्तित्वस्य प्रतिबंधकतापर्याप्त्यनधिकरणत्वाद्दोषः व्यभिचारिणि त-
दधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य प्रकृतानुमित्यविरोधित्वेपि समानाधिकरणधर्मावच्छिन्नसाध्याभाव-
वद्वृत्तित्वमप्रसिद्धमेव प्रकृतपदं च साध्यतावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नानुमितिपरं अतः समवा-
यावच्छिन्नवह्न्यभाववद्वृत्तित्वस्य समवायेन वह्न्यनुमितिविरोधित्वे तत्तद्वह्न्यभाववद्वृत्तित्वस्य तत्तद्वह्न्यनुमितिवि-
रोधित्वेवानाव्याप्तिः अनुमित्यविरोधित्वेति उक्तानुमितिविरोधित्वाभावपर्याप्तव्याप्तिः तज्ज्ञानविघटकं चानुमि ५८

तिविरोधितज्ज्ञानमेवेति साध्याभाववद्वृत्तित्वज्ञानस्योक्तव्याप्तिज्ञाने प्रत्यविशेषितात् व्यभिचारिण्यतिव्याप्तिरिति
भ्रमः केचित्तु अत्र मितिपदं तत्कारणज्ञानपरं तथा च साध्याभाववद्वृत्तिर्यद्धूमो हेतुसमानाधिकरणात्यन्ताभावा
प्रतियोगि साध्यमित्येतादृशज्ञानविरोधिताभावश्चत्वर्थो निर्दुष्ट इत्याहुः मिश्रसंमतलक्षणान्याह केचित्विति
धूमत्वेन योगाभावस्तदधिकरणवृत्तित्वस्य घटत्वेनाभावे सजातीयमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरतो या
वत्त्वेति यावदेतद्गतो धूमत्वेन धूमाभावो यस्तदधिकरणवृत्तित्वप्रतियोगिकस्य तादृशवृत्तित्वत्वेनाभावस्य वह्नौ प्र
सत्वान्न दोषः एवमपि वह्नित्वेन तादृशवृत्तित्वाभावस्य धूमेपि सत्वादतिव्याप्तिः रतउक्तं सजातीय इति तस्य व्यधिकरणध
र्मावच्छिन्नप्रतियोगिकस्य धूमत्वेन धूमाभावसजातीयत्वाभावान्न दोषः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य
समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य च साध्याभावद्वयस्य साजात्येनकृत्वापि वृत्तित्वाभावेऽतः प्रत्येकमि
ति तत्रादितिचोक्तं तथा च व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकस्य साध्याभावस्य तादृशवृत्तित्वाभावः समाना
धिकरणधर्मावच्छिन्नप्रतियोगिताकस्य च साध्याभावस्य तादृशवृत्तित्वाभावः सजातीयद्वयत्वर्थः प्रत्येकपदेन
साजात्यानुयोगितो वृत्तित्वाभावस्य तत्पदेन च तत्प्रतियोगिनः साध्याभावस्य शाब्दिकरूपेण धरणं कृतं व्याप्ति
तिपर्यवसन्ने एतदर्थमेव तत्तदधिकरणेत्यत्र तत्तदित्युक्तं अत एव रूपाभाववान्वायुत्वादित्यादौ नाव्याप्तिः तदधि

करणत्वञ्चेद्धि तत्पदेन सर्वेषां साध्याभावानां परामर्शे रूपसामान्याभावानां सर्वेषां रूपाणामेकाधिकरणमप्रसिद्धं इति स्याद्व्या
उं० प्तिः तत्तदित्यञ्चेत्तु प्रत्येकरूपात्मकसाध्याभावस्य परामर्शात् तत्तद्रूपाधिकरणाप्रसिद्धौ तद्वृत्तित्वावच्छिन्नाभावस्य वायुते
५८ सुलभत्वान्नेति भावः वह्निमान्धूमादित्यादि सद्धेतौ समानाधिकरणधर्मावच्छिन्नसाध्याभावाधिकरणवृत्तित्वप्रतियो
गिकस्य तादृशवृत्तित्वरूपसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकाभावस्य हेतौ सत्त्वान्नाव्याप्तिः व्यभिचारिणि तु त
दसत्त्वान्नातिव्याप्तिरिति फलितार्थः ननु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकवृत्तित्वाभावस्याप्यभावत्वेन समाना
धिकरणधर्मावच्छिन्नप्रतियोगिताकसाध्याभावसाजात्यात्सजातीयपददानेप्यतिव्याप्तितादवस्थ्यमित्यत आह साजात्ये
चेति ननु व्यधिकरणधर्मस्यापि किंचित्समानाधिकरणत्वात्समानाधिकरणधर्मस्यापि किंचिद्व्यधिकरणत्वान्नेदं यावन्ने
कं स्वत्वप्रवेशे तु तस्य प्रतियोग्यविशेषणतया कथं साजात्यनिर्वाहः नहि घटत्वावच्छिन्नप्रतियोगिताकधूमाभावत्वं घटत्वा
वच्छिन्नप्रतियोगिताकवृत्तित्वाभावेऽस्तीति चेन्नैवं स्वत्वस्य परिचायकतया प्रवेशात् साध्याभावस्य समानाधिकरणधर्मा
वच्छिन्नप्रतियोगिताकस्य पदोपादानेन तादृशवृत्तित्वाभावस्यापि तादृशस्यैव एवं व्यधिकरणस्थलेऽयोग्यं नन्विदं वाच्यं ज्ञे
यत्वादित्यत्र उक्तान्यतराप्रसिद्धिः समानाधिकरणधर्मावच्छिन्नवाच्यत्वाभावाप्रसिद्धेः नैवम् विशेषणतावच्छिन्न
प्रतियोगिताकस्य वाच्यत्वे तेन वाच्यत्वाभावस्याप्रसिद्धावपि संयोगादिरूपव्यधिकरणसंबंधावच्छिन्नप्रतियोगिताकस्य ५८

तस्याप्रसिद्धत्वादिति केचित् साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्याकाशाभावत्वेनाकाशाभावाभावस्य
वत्त्वादित्यन्ये अपरे तु व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका ये ये भावास्तद्भेदकूटवत्त्वे समानाधिकरणधर्मावच्छि
न्नप्रतियोगिताकत्वे समानाधिकरणधर्मावच्छिन्नायाः प्रतियोगितास्तद्भिन्नप्रतियोगिताकत्वे च व्यधिकरणधर्मावच्छि
न्नप्रतियोगिताकत्वे साध्याभावनिष्ठेतदन्यतरवत्त्वे हेतुनिष्ठवृत्तित्वाभावो बोध्यस्तेन न केवलान्वयिन्यव्याप्तिर्नवाऽसत्ता
नन्तगमदोषः न वा धूमवान्वह्नेरित्यादावतिव्याप्तिः अन्यथा घटत्वेन निरूपितवृत्तित्वाभावस्य समनियताकाशाभाव-
रूपस्य समानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वानपायात् अत्राहुः पूर्वोक्तेति दीधितिकारीयलक्षणद्वयम
ध्ये द्वितीये पक्षलक्षणेनयोक्तः साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताक इति
यावत् साध्यव्यापकतावच्छेदकप्रतियोगिताकाभावस्य प्रथमलक्षणोक्तस्योपादाने तु वह्निमान्धूमादित्यादावव्या
प्तिः स्यात् तादृशस्य वह्निप्रकारकप्रमाविशेष्यत्वघटप्रकारकप्रमाविशेष्यत्वोभयत्वावच्छिन्नप्रतियोगिताकाभाव
स्य सजातीयो यस्तदधिकरणवृत्तित्वावच्छिन्नाभावस्तस्य धूमे सत्त्वादव्याप्तेः न च कपिसंयोगी एतद्वृक्षत्वादित्यादा
वव्याप्तिः कपिसंयोगत्वेन कपिसंयोगाभावस्याधिकरणे एतद्वृक्षे तस्य वृत्तित्वावच्छिन्नाभावस्य हेतावसत्त्वादत आह
व्याप्यवृत्तिश्चेति तत्त्वे वानवच्छिन्नवृत्तिकत्वे कपिसंयोगाभावस्य मूलावच्छेदेन वृत्तितानतयेति व्यधिकरणधर्मा

वच्छिन्नाभावमादाय लक्षणसमन्वय इति भावः संयोगी सत्त्वादित्यादावतिव्याप्तिवारणाय हेत्वधिकरणीभूतयत्किंचि
ॐ. द्व्यक्तिनिष्ठात्यन्ताभावप्रतियोगितायाः सामानाधिकरण्येनानवच्छेदकतद्भाववद्व्यक्तित्वकत्वरूपं व्याप्यवृत्तित्वं व्याप
५९ कताघटितत्वादुरूहत्वमित्यत आह प्रतियोगिनेति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरण्ये ये
तद्भिन्नत्वमित्यर्थः प्रतियोगिव्यधिकरणत्वमात्रोक्तौ व्यधिकरणधर्मावच्छिन्नाभावोऽपि वारितः स्यात् तस्य प्रतियोगि
59 समानाधिकरणत्वादतः प्रतियोगितावच्छेदकावच्छिन्नेत्युक्तं व्यधिकरणधर्मावच्छिन्नाभावस्य तत्प्रतियोगितावच्छे
दकावच्छिन्नप्रतियोग्यप्रसिद्ध्या न तद्वारणमिति भावः ननु वह्नित्वावच्छिन्नप्रतियोगिताकपर्वतीयवह्नीतरा
न्यतराभावपर्वतीयवह्निभिन्नान्यतराभावे पर्वते न वह्न्यभावं वादायाव्याप्तिः तेषां साध्यव्यापकतावच्छेदकरूपावच्छिन्न
प्रतियोगिताकत्वात् तदधिकरणे हि पर्वते नभिन्नमेव न वह्नित्वाभावस्य वह्नेः सत्त्वात् मैवं तत्तद्व्यक्त्यन्यतरत्वादि
विशिष्टवह्नित्वस्यैव साध्यव्यापकतानवच्छेदकस्य प्रतियोगितावच्छेदकस्याभावात् इति केचित् अन्ये तु प्रतियोगिता
न्यूनवृत्तित्वे सति समानाधिकरणतया यदवच्छेदके तदन्यावच्छिन्नत्वं साध्यव्यापकतावच्छेदकरूपावच्छिन्नत्वं विवक्षितं
उक्तं तदन्यत्वं च न्यूनवृत्तितया केवलव्यधिकरणतया वावच्छेदकेष्वविशिष्टे वह्नित्वे तत्तत्काले न्यूनवृत्तित्वेनैवाव
च्छेदके प्रतियोगिताश्रये द्व्यत्वादावभावात् इत्याहुः ननु प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्या ५९

विवक्षायां व्याप्तत्वसाध्यके साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिकैतादृशाभावाप्रसिद्धिः न च मेयत्वत्वेन वा
व्याप्तत्वाभावप्रतीतेश्चेति वाच्यं तस्य व्याप्तत्वेन व्याप्तत्वघटोभयाभावरूपतया प्रतियोगितावच्छेदकावच्छिन्नव्याप्तत्वरूपप्रति-
योगिसामानाधिकरण्यात् यत्र स्वप्रतियोगितावच्छेदकानतिरिक्तवृत्तियदवच्छेदकं तदवच्छिन्नप्रतियोगिसामानाधिकर
ण्याश्रयाप्रवृत्तयोर्ययोः भावास्तावच्छेदकत्वमेव वाच्यं व्याप्तत्वत्वेन तादृशमवच्छेदकं घटादिवृत्तितयोभयाभावीयप्र
तियोगितान्यूनवृत्तित्वात् एतेन मेयत्वत्वेन व्याप्तत्वाभावे तद्भिन्नत्वं सफलमेवेति तन्न सर्वेषामप्यभावानां तत्तत्त्वेन वृत्तित्व
विशिष्टस्वाभावत्वरूपं यत्प्रतियोगितावच्छेदकं तदवच्छिन्नो यस्तादृशस्वाभावरूपप्रतियोगी तत्समानाधिकरणतात्
द्भिन्नाभावाप्रसिद्धेः तत्राहुः साध्यव्यापकतावच्छेदका यावन्तः प्रतियोगितावच्छेदकास्तदवच्छिन्नो यः प्रतियोगी तत्समा-
नाधिकरणा ये ये तद्भिन्नत्वमेव वाच्यं यद्वा येषां येषामभावानां साध्यव्यापकतावच्छेदकीभूतेषु यावत्सु स्वप्रतियोगिताव
च्छेदकेषु स्वसमानाधिकरणप्रतियोगिवृत्तित्वं तद्भिन्नत्वं विवक्षणीयं यावदन्तर्गतेन च मेयत्वत्वेन तदवच्छिन्नव्याप्तत्वाभावसमा
नाधिकरणव्याप्तत्वरूपप्रतियोगिवृत्तित्वाभावान्मेयत्वावच्छिन्नव्याप्तत्वाभावे तादृशाभावभिन्नत्वं सफलमेव साध्यव्यापकता
वच्छेदके तु पादानात् वह्निमान् धूमादित्यत्र संयोगसामान्याभावत्वेन संयोगसामान्याभावाभाववत्संयोगरूपस्य साध्यव्याप
कतावच्छेदकरूपावच्छिन्नप्रतियोगिताकस्य गुणसामान्याभावत्वरूपप्रतियोगितावच्छेदकावच्छिन्नगुणसामान्याभावरू

डों॰
६०
60

पप्रतियोगिसमानाधिकरणभिन्नत्वेपि नाव्याप्तिः अन्यथा संयोगसामान्याभावगुणसामान्याभावयोरैक्यात्संयोगसा॰
मान्याभावस्तत्समानाधिकरणत्वं च संयोगसामान्याभावाभावस्य संयोगस्य नास्तीति यथोक्तसमानाधिकरणभिन्न
त्वस्य सत्त्वात् साध्यव्यापकतावच्छेदकत्वेन प्रतियोगितावच्छेदकविशेषणेन गुणसामान्याभावत्वादेर्वह्निव्यापकताव॰
च्छेदकत्वाभावान्न दोषः द्वितीयरीत्याभावनिवेशस्य फलमाह तेनतन्नादिति महानसीयवह्न्यभावाधिकरणे पर्वतादि
तद्वृत्तित्वाभावस्य धूमादावसत्त्वादव्याप्तिः स्यात् विवक्षायां तु महानसीयवह्नित्वस्य साध्यव्यापकतावच्छेदकरूपता॰
भावान्नेत्यर्थः साध्यवृत्तित्वस्य प्रतियोगिव्यधिकरणत्वस्य च विकल्पेन विवक्षितस्य फलमाह अव्याप्यहेताविति क
पिसंयोगी एतद्वृत्त्वादित्यादौ संयोगत्वावच्छिन्नसंयोगाभावस्याधिकरणमेतद्वृत्तस्तद्वृत्तित्वाभावस्य समानाधिकर
णधर्मावच्छिन्नस्य हेतावसत्त्वादव्याप्तिः स्यात् विवक्षायां तु कपिसंयोगत्वेन कपिसंयोगाभावस्याव्याप्यवृत्तितया प्रभा
वाद्यधिकरणधर्मावच्छिन्नतदभावपरत्वलक्षणघटकः तदधिकरणवृत्तित्वाभावस्य च व्यधिकरणधर्मावच्छिन्नस्य हेतौ
सत्त्वान्नाव्याप्तिरित्यर्थः ननु धूमवान्वह्नेरित्यादावतिव्याप्तिः धूमत्वेन धूमाभावस्याधिकरणे यो ह्रदस्तद्वृत्तित्वत्वावच्छि
न्नाभावस्य धूमेपि सत्त्वात् एवं पार्थिवत्वविशिष्टवृत्तिधूमवृत्तित्वत्वावच्छिन्नाभावस्यापि सत्त्वात् वह्नेस्तैजसत्वपार्थिव
त्वविशिष्टस्य निर्धूमवृत्तित्वस्य तास्मिन्नभावात् एवं निर्धूमवृत्तित्ववह्निभेदद्वयत्वभयत्वावच्छिन्नाभावस्यापि सत्त्वात्तेन तत्रा ६०

हेतुमदधिकरणवृत्तित्वाभाववैशिष्ट्येति तदधिकरणेति साध्याभाववद्वृत्तित्वव्यापकप्रतियोगिताकस्य तादृशवृत्तित्वाभावस्य निवेशे व्यधिकरणधर्मा-
वच्छिन्नाभावो न प्रसिद्ध्यः किन्तु समानाधिकरणधर्मावच्छिन्न एव तदधिकरणे हृदादावेव तद्वृत्तित्वाभावस्य समानाधिकरणधर्मावच्छिन्नो हेतुता-
वच्छिन्नसाध्याभावाधिकरणवृत्तित्वव्यापकप्रतियोगिताकस्य समानाधिकरणधर्मा॥ वृत्तित्वेति नाव्याप्तिः तथा च तत्तत्साध्याभावाधि-
करणवृत्तित्वव्यापिकाया मस्य वृत्तित्वधर्मावच्छिन्नाया प्रतियोगिताया यस्य तादृशस्य त्वर्थः हृदवृत्तिनिर्धूमवृत्तित्वाभावस्यादाय व्याप्तिव्या-
प्तिरुक्ता तस्मात्तत्तत्साध्याभाववद्वृत्तित्वव्यापकतत्प्रतियोगितायां निवेशं द्वारेणमित्याह तेनेति धूमत्वेन धूमाभाववान्व्यक्तिविशे-
षो हृदादिस्तद्वृत्तित्वप्रतियोगिकस्याभावस्य मतेऽपि नातिप्रसंगस्स्यन्वयः एवमन्तरहृ येऽपि योज्यं निर्धूमवृत्तित्वमयोगोलकादिवृत्तित्वप्र-
सिद्धहृदवृत्तित्वाभावीयायाः प्रतियोगितायाः नास्तीति भावः नन्वयोगोलकभेदत्वेनायोगोलकभेदाभावस्यापि साध्यव्यापकतावच्छेदकत्वेनाव-
च्छिन्नप्रतियोगिताकाभावतया तदधिकरणायोगोलकवृत्तित्वावच्छिन्नाभावस्य वह्न्यासत्त्वादेवोक्तातिव्याप्तिवारणे सम्भवात् उक्तविवक्षा-
वैयर्थ्यमित्यत आह पार्थिवत्वादीति तथा च सामानाधिकरण्येन पार्थिवत्वविशिष्टपदयोगोलकभेदाभाववद्वृत्तित्वे तदभावप्रतियो-
गितानतिरिक्तवृत्तित्वव्यापिकावच्छिन्नायोगोलकवृत्तित्वेतदभावीयप्रतियोगितायाश्चाभावादिति नातिव्याप्तिरिति भावः व्याप्यवृत्तिधर्मा-
नवच्छिन्नत्वनिवेशस्य फलमाह हृदादीति ननु हृदवृत्तित्वे न निर्धूमवृत्तित्वसामान्याभावः नन्वेवमपि निर्वह्निवृत्तित्वधूमावयवेन वा-
येन धूमस्य वृत्तित्वानिर्वह्निवृत्तिर्वह्निमता भावो धूमे नास्तीत्यव्याप्तिरित्यत आह हेतुतावच्छेदकेति तेन दोषमुद्धरति सावयवेति सं-
योगस्य वैधेन यन्न वृत्तित्वे तदभावसमानाव्याप्तिरित्यर्थः नन्वेवं जातिमान्सत्त्वादित्यादावव्याप्तिः जातित्वावच्छिन्नजात्यभाववत्तिसा-
मान्यादौ समवायेन वृत्तित्वविवक्षायामित्यनयाप्रसिद्ध्या तदभावस्यापि प्रसिद्धेरित्यत आह प्रत्येकेति हेतुतावच्छेदकसंबन्धेन वृ-

त्त्वविवक्षायामित्यर्थः तथाच हेतुतावच्छेदकसंबंधावच्छिन्नाधिकरणतावद्वृत्तियो साध्याभावस्तद्वृत्तित्वाभावो विवक्षणीयः तेन जा
उं· तित्वेन जात्यभावो न यावदेतद्गतः इति भावः तेन समवायावच्छिन्नाधर्मावच्छिन्नप्रतियोगिताकस्य हेतौ सत्त्वान्नाव्याप्तिः जात्यभावस्तु सा
८१ मान्यादिमात्रवृत्तिर्न यावदेतद्गतः समवायेन सामान्यादेः कस्याप्यनधिकरणत्वात् ननु वह्निमान्धूमादित्यादावपि जातिसामान्या
भावस्यापि यावदेतद्गततया न वृत्तित्वसामान्याभावो हेतुतावच्छेदकसंबंधेन संयोगेन वृत्त्यप्रसिद्ध्या वाव्याप्तिसंभवे सत्त्वपर्यन्तानुधावनं
वैयर्थ्यमिति चेन्न आदिपदेनैतस्याप्युक्तत्वात् जातिमान्स्पन्दादित्यत्र साध्यप्रतियोगिकाभावमादायाव्याप्तिर्वह्निमान्धूमादित्या
दौ तत्त्वप्रतियोगिकमित्येतावता विशेषणसत्त्वस्य सादाडेल्लावात् ननु एवं विशिष्टसत्त्वादित्यादावव्याप्तिः इष्टत्वेनेष्य
त्वाभाववद्गुणादिवृत्तित्वस्य हेतौ सत्त्वात् विशिष्टसत्त्वस्य सत्त्वानतिरेकात् नैवं गुणो गुणान्यत्वविशिष्टसत्त्वावानिति तु व्याप
त्तिः विशिष्टसत्त्वाभावावच्छिन्नाधिकरणतायास्तत्रासत्त्वात् विशिष्टसत्त्वा गुणवृत्तिरिति बुद्धेरिष्टत्वात् अतएवाह पदेति ताद
शा इति साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताका इत्यर्थः साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वनिवेशेन
विशिष्टसत्त्वाभावप्रतियोगितावच्छेदके न विशिष्टसत्त्वात्वेन जातित्वावच्छिन्नप्रतिव्यापकतायाश्चानवच्छेदात् उक्त
स्थलएवाव्याप्तिः सकलधूमाभावव्यापकस्य वह्नित्वेन धूमाभावसजातीयस्य तस्यैवाभावस्य
प्रतियोगितावच्छेदके न वह्निप्रतिव्यापकतायाश्चावच्छेदादिति
व्याप्तेर्वारणाय यावेत इति ॥ ८१

तथा च धूमत्वेन धूमाभावस्य यावदन्तर्गतस्य प्रतियोगितावच्छेदकेन धूमत्वेन वन्हित्वावच्छिन्नप्रतिव्यापकताया अनवच्छेदान्न दो
षः धूमत्वावच्छिन्नधूमाभावव्यापकीभूतस्य वन्हित्वेन घटाभावस्य प्रतियोगितावच्छेदकेन वन्हित्वेन वन्हित्वावच्छिन्नप्रतिव्या
पकताया अवच्छेदादिति व्याप्तिताद्वस्थ्यमत उक्तं सजातीयस्येति प्रागुक्तरीत्या प्रसिद्धेः संभवोऽपि धूमत्वेन धूमाभावस्य व
न्हित्वेन घटाभावो न सजातीयः व्यधिकरणधर्मावच्छिन्नत्वादिति न दोषः इदानीं धूमत्वेन धूमाभावसमानाधिकरण
स्य तत्सजातीयस्य वह्नित्वेन वह्न्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्नित्वावच्छिन्नप्रतिव्यापकताया अवच्छेदादति
व्याप्तिरत उक्तं व्यापकीभूतस्येति वह्नित्वेन वह्न्यभावस्तु धूमत्वेन धूमाभावस्य न व्यापकः तद्वत्ययोगोलके वह्नित्वावच्छि
न्नवह्न्यभावस्यासत्त्वादित्यर्थः नन्वयावदन्तर्गतस्यायोगोलकान्यत्वाभावस्यापि साध्यतावच्छेदकावच्छिन्नव्यापकता
वच्छेदकत्वावच्छिन्नप्रतियोगिताकस्य साध्याभावस्य धूमत्वेन धूमाभावाधिकरणे अयोगोलके वर्तमानस्य प्रतियो
गितावच्छेदकेनायोगोलकान्यत्वेन वह्नित्वावच्छिन्नप्रतिव्यापकताया अनवच्छेदान्नातिव्याप्तिरिति वाच्यं साध्यतावच्छेदकसं
बन्धावच्छिन्नप्रतियोगिताकस्योक्तसाध्याभावस्य व्यापकीभूताभावस्य प्रतियोगितावच्छेदकेन प्रतियोगितावच्छेदक
संबन्धेन यद्धर्मावच्छिन्नप्रतिव्यापकत्वमवच्छिद्यते तत्त्वस्य विवक्षितत्वात् अन्यथा समवायावच्छिन्नवह्निसामान्याभावस्य व्या
पकस्य प्रतियोगितावच्छेदकेन वह्नित्वेन वह्नित्वावच्छिन्नप्रतिसमवायसंबन्धेन व्यापकताया अनवच्छेदादव्याप्तेः साध्य

ॐ
५२
68

तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशेन समवायावच्छिन्नप्रतियोगिताकस्य वह्नित्वेन वह्न्यभावस्य वारणात्
संयोगावच्छिन्नप्रतियोगिताकस्य स्वव्यापकस्य वह्नित्वेन वह्न्यभावस्य प्रतियोगितावच्छेदकेन वह्नित्वेन प्रतियोगितावच्छेद
कीभूतसंयोगसंबंधेन वह्नितावच्छिन्नेइतिव्यापकताया अवच्छेदान्नाव्याप्तिः एवंवा गोलकान्यत्वाभावस्य विशेषणतावि
शेषसंबंधावच्छिन्नप्रतियोगिताकस्य साध्यतावच्छेदकसंयोगसंबंधावच्छिन्नप्रतियोगिताकत्वाभावान्न प्रतियोगितावच्छे
दकेन वह्निं प्रतिव्यापकताया अनवच्छेदेपि तत्त्वाभावाव्यापकीभूतस्यैतस्यानुपादेतिव्याप्तेरवारणात् नच प्रतियोगि
तावच्छेदकसंबंधेन व्यापकतावच्छेदकत्वविवक्षायां प्रयोजनाभावः संयोगावच्छिन्नप्रतियोगिताकस्य धूमत्वेन धूमाभाव
स्य स्वव्यापकस्य प्रतियोगितावच्छेदकेन धूमत्वेन वह्नितावच्छिन्नंप्रतिकालिकादिसंबंधेन व्यापकताया अवच्छेदादति
व्याप्तिप्रसंगात् नच संयोगेनायोगोलकान्यत्वाभावस्य प्रतियोगितावच्छेदकेनायोगोलकान्यत्वेन वह्निं प्रतिव्याप
कतानवच्छेदान्न दोष इति वाच्यं तदभावस्य गुणादावपि सत्त्वात्तत्समानाधिकरणस्य वह्नित्वेन वह्न्यभावस्य प्रतियो
गितावच्छेदकेन वह्नित्वेन वह्निं प्रति व्यापकतावच्छेदात्समानाधिकरणत्वमात्रनिवेशे तिव्याप्तितादवस्थ्यात् व्यापकत्व
निवेशेन संयोगेनायोगोलकान्यत्वाभावस्य वह्नित्वेन वह्न्यभावो न व्यापकः अयोगोलकान्यत्वाभाववत्ययोगोलके वह्नि
तावच्छिन्नाभावस्याप्यसत्त्वादिति नातिव्याप्तिरिति दिक् नन्वेवं धूमवान्वह्नेरित्यत्र हृदापृथिवीकपिसंयोगादित्यत्र वातिव्याप्तिः

१११

धूमाभावव्यापकस्य संयोगाभावस्य प्रतियोगितावच्छेदकेन संयोगत्वेन वह्निं प्रतिव्यापकताया अनवच्छेदात् पृथिवीत्वाभाव
व्यापकस्य कपिसंयोगाभावस्य प्रतियोगितावच्छेदकेन कपिसंयोगत्वेन कपिसंयोगं प्रतिव्यापकताया अनवच्छेदाच्चेत्यत आ
ह व्याप्यवृत्तेरिति निरवच्छिन्नवृत्तिकस्येत्यर्थः संयोगत्वरूपस्य स्वभावो न व्याप्यवृत्तिरिति नातिव्याप्तिः यथाश्रुतमिश्रग्रं
थस्य लभ्यं तल्लक्षणद्वयमाशंकते साधनस्येति साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिता
कः सजातीयो व्यापकीभूतो व्याप्यवृत्तिश्च योऽभावस्तत्प्रतियोगित्वमित्यर्थः तत्प्रतियोगितेति यथोक्ताभावप्रतियोगिताव
च्छेदकधर्मवत्त्वमित्यर्थः आद्यं दूषयति द्रव्यमिति द्रव्यत्वेन द्रव्यत्वाभावो हि तादृशरूपावच्छिन्नप्रतियोगिताकश्च स्वसमा
जातीयो व्यापकीभूतो व्याप्यवृत्तिश्च विशिष्टसत्तात्वेन विशिष्टसत्ताभावः तत्प्रतियोगित्वस्य सत्तायामसत्त्वात् विशिष्टसत्ताया
सत्तानतिरेकात् द्वितीये तु सत्तायाः साधनतावच्छेदकस्य तदभावप्रतियोगितानवच्छेदकत्वादुक्तदोषानवकाशादत्र दू
षणान्तरमाह प्रमितीति अत्र हि वाच्यत्वेन ज्ञेयत्वाद्यभावः साध्याभावः समानाधिकरणधर्मावच्छिन्नाभावाप्रसिद्धेः तस्य
सजातीयोऽभावो व्यधिकरणधर्मावच्छिन्न एव वाच्यः स चाप्रसिद्धः प्रमेयत्वव्यधिकरणायाः प्रतियोगिताया अप्रसिद्धेः
यद्यपि समानाधिकरणधर्मविषयापि प्रमेयत्वेन घटाद्यभावो प्रसिद्ध एव तथापि प्रकृतोपयोगादेवमुक्तं न च संयोगेन
प्रमेयाभाव एव संयोगावच्छिन्नप्रतियोगितावच्छेदकताकः प्रसिद्धः हेतुतावच्छेदकसंबंधेन प्रतियोगितावच्छेदकत्वस्य

उ॰ ६२

63

वाच्यत्वात् अन्यथा समाभावव्यापकस्य समवायावच्छिन्नवन्ह्यभावस्य समवायेन वन्हित्वस्य प्रतियोगितावच्छेदकत्वादति
व्याप्तेः नापि प्रमेयत्वेनाकाशाभाव एव प्रसिद्धः तस्याकाशाभावान्नतिरेकात् आकाशत्वस्यैव तत्प्रतियोगितावच्छेदक-
त्वात् तस्मात्स्वसजातीयसाध्याभाववन्निष्ठाभावप्रतियोगित्वमिति यथाश्रुतमिश्रलक्षणमनुपपन्नमेवेत्यर्थः अन्ये
तु साधनसमानाधिकरणतादृशयावत्साध्याभावसजातीयाभावप्रतियोगित्वमर्थः सद्धेतौ व्यधिकरणधर्मावच्छिन्ना-
भाव एव साधनसमानाधिकरणः तत्सजातीयाभावप्रतियोगित्वस्य हेतौ सत्वात् व्यभिचारिणि तु उभयविधोप्य-
भावः साधनसमानाधिकरणः उभयसजातीयस्यैकोप्यभावो नास्मिंस्तेनैकसाजात्यस्यात्राविवक्षितत्वादिति नातिव्या-
प्तिरेवं च मिश्रलक्षणं निर्दोषमेवेत्याहुः व्यापकत्वस्य साजात्यरहितमेव लक्षणं लाघवादाह यद्वेति तेन साध्यव्यापकताव-
च्छेदकरूपावच्छिन्नप्रतियोगिताकायावन्तोऽभावास्तत्प्रतियोगितावच्छेदके न यद्धर्मावच्छिन्नत्वं प्रतियोगितावच्छेदकसंबन्धेन
व्यापकत्वमवच्छियते तद्धर्मवत्त्वं व्याप्तिरित्यर्थः स्पंदः कालत्वादित्यादौ समवायेन स्पंदत्वेन स्पंदत्वाभावस्य प्रतियोगिता-
वच्छेदकेन स्पंदत्वेन कालिकसंबन्धेन कालत्वप्रतिव्यापकताया अनवच्छेदादतिव्याप्तिरतः प्रतियोगितावच्छेदकसंबन्धेनेत्यु-
क्तं अभावोपि व्यापकतावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताको निवेश्यः अन्यथा समवायावच्छिन्नवन्ह्यभावप्रति-
योगितावच्छेदकेन वह्नित्वेन धूमत्वावच्छिन्ने प्रतियोगितावच्छेदकसंबन्धेन समवायेन व्यापकतानवच्छेदकादसंभवापत्तेः

णेन व्यापकतावच्छेदकसंबंधेयावच्छिन्नतादृशाभावप्रतियोगितावच्छेदकेन तेन संबंधेन व्यापकत्वमवच्छिद्यते इत्येवोच्यता
मिति वाच्यं नस्यलक्षणांतर्गतव्यधिकरणधर्मावच्छिन्नाभावाघटितत्वेन प्रकृतानुपयोगात् अत्र केचित् साध्य
तावच्छेदकावच्छिन्नव्यापकतावच्छेदकप्रतियोगिताकयावन्तोभावास्तत्प्रतियोगितयायद्धर्मावच्छिन्नं प्रतिव्यापकत्वम
वच्छिद्यते इति लक्षणमिति पिलेषु प्रतियोगितानवच्छिन्नत्वविशेषस्यावच्छेदकांशस्त्यागात् साध्यतावच्छेदकावच्छिन्नप्र
तियोगिताकयावन्तोभावास्तत्प्रतियोगितावच्छेदकेन साध्यतावच्छेदकसंबंधेन यं प्रति व्यापकत्वमवच्छिद्यते इति ल
घीयः व्यापकतावच्छेदकांशरहितत्वात् यावत्पदेन व्यधिकरणध' र्मावच्छिन्नाभावे घटनोपपत्तेरित्याहुः वक्ष्यमाणसा
र्वभौमलक्षणे समवायपदमपहायैव योजयति परे तद्धेतिमद्वृत्तियावन्तः साध्याभाववद्वृत्तित्वाभावास्तद्वत्त्वं परे
त्विति धूमवान्वह्नेरित्यादौ धूमत्वावच्छिन्नधूमाभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिरतो यावत्तर
ति तेनउक्तहेतितत्त्वावच्छिन्नाभावस्य वह्न्यावत्त्वात्तावतिव्याप्तिरित्यर्थः वह्नित्वेन घटाभाववत्सकलमेव जगत् नस्यकेव
लान्वयित्वात् तद्वृत्तित्वावच्छिन्नाभावस्य ग्रहणाकाशादिमादाय हेतौ तत्त्वाभावाद्व्याप्तिरतो वृत्तिमद्वृत्तय इति तथा च ता
स्य यावदन्तर्गतत्वात् तस्य हेतावसत्वेपि न क्षतिरिति भावः पत्रसंभववारणायेदमिति तिनत्व पृथिवीत्ववान् घटादित्वादा
तादात्म्येन घटादेर्हेतुतायां पृथिवीत्वेन घटत्वाभाववत्तादात्म्यरूपस्य साध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मा

ॐ
८४
64

वच्छिन्नाभाव आकाशादावपि न प्रसिद्धः पृथिवीत्वेन घटत्वाभावस्य केवलान्वयितया तद्वत्तादात्म्यस्य पदार्थमात्रे
सत्त्वात् घटत्वेनोक्ततादात्म्याभावस्य केवलान्वयितया तद्वत्तादात्म्यस्य पदार्थमात्रे सत्त्वात् तु हेतावपि सत्त्वात् एवं गुणत्व
दादित्यादौ विषयतया घटादेर्हेतुतायां गुणत्वेन घटत्वाभाववद्विषयत्वरूपस्य साध्याभाववद्वृत्तित्वस्य समानाधिकरणध
र्मावच्छिन्नाभावस्य कुत्राप्यप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नाभावस्यैव प्रसिद्धेस्तस्य च हेतौ सत्त्वात् ननु वृत्तिमत्त्वं न ज
त्त्वकेऽपि व्याप्तितादवस्थ्यं धर्मं येन सम्बन्धेन हेतुतया तेन या साध्याभाववन्निरूपितवृत्तित्वसदभावो वाच्यः अवयवान्यत्वाभावव
प साध्याभाववति धर्मावयवे समानाधिकरणधर्मावच्छिन्नस्य समवायेन वृत्तित्वाभावस्य धर्मादावसत्त्वादित्यत आह येन
नेति साध्याभाववन्निष्ठहेतुतावच्छेदकसम्बन्धेन वृत्तित्वं वाच्यं तेनोक्तसाध्याभाववद्धर्मावयवसंयुक्तत्वाभावस्य धर्मेस
त्त्वान्नाव्याप्तिरित्यर्थः ननु एवं वह्नित्वेन घटाभावस्य समवायावच्छिन्नवृत्तिमति जात्यादौ प्रसिद्धस्य धर्मादावसत्त्वादव्या
प्तिरेवमत आह वृत्तिमदिति तथा च हेतुतावच्छेदकसम्बन्धेन वृत्तिमान्यस्तद्वृत्तित्वविवक्षणीये उक्ताभावस्तेन तथा
जात्यादेः संयोगेन वृत्तिमत्त्वाभावात् संयोगावच्छिन्नवृत्तिमत्पदार्थे योक्ताभावस्याप्रसिद्धेः व्यधिकरणधर्मावच्छिन्नस्य
तद्धर्मेऽपि सत्त्वात् इत्याह तेनेति साध्याभावपदार्थमाह साध्याभावश्चेति सर्वत्रेति साध्यतावच्छेदकावच्छिन्नव्या
पकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकाभावस्तदर्थ उक्तमर्थे कपिसंयोगाभाववान्नेतत्वादित्यादौ कपिसंयोगाभा

वाभाववत्तावच्छेदेन वृत्तिवृत्तित्वत्तावच्छिन्नाभावस्य हेतावसत्वाद्व्याप्तिरित्यत आह व्याप्यवृत्तिश्चेति कपिसंयोगवृत्त्यन्ताभावो ना-
व्याप्यवृत्तिः कपिसंयोगाभाववत्तेन घटाभाववज्जगदवेतद्वृत्तित्वत्तावच्छिन्नाभावस्य वृत्तिमत्यवृत्तित्वात् घटत्वेन वृत्तित्वाभावस्य वृ-
त्तौ सत्वात्तत्राव्याप्तिरित्यर्थः साध्याभाववद्वृत्तित्वाभावेच यावत्तविवक्षणाद्भूतादिवृत्तित्वाभावमादायातिव्याप्त्यनवकाशाद्दसमा-
णप्रयोजनानुरोधादन्यथा तदर्थमाह तद्वृत्तित्वाभाववत्त्वेति स्वव्यापकेति स्वपदं प्रतियोगितापरं यत्प्रतियोगिताव्यापके
यत्साध्याभाववद्वृत्तित्वत्वे तद्व्यापिका सा प्रतियोगिता यस्य तादृशत्वमर्थः प्रतियोगितायां सामान्यतः साध्याभाववद्वृत्तित्वत्वव्याप-
कत्वात्कौ निर्धूमवृत्तित्वाभावीयप्रतियोगिता न तादृशी उक्तप्रतियोगितायाः धूमत्वेन धूमाभाववद्वृत्तित्वमात्रवृत्तित्वात् साध्या-
भाववद्वृत्तित्वेऽपि सत्वात् किन्तु वृत्तित्वसामान्यनिष्ठैववृत्तित्वाभावीया प्रतियोगिता साध्याभाववद्वृत्तित्वत्वव्यापिका उभयविध-
साध्याभाववद्वृत्तित्वेऽपि वृत्तित्वत्वसत्वात् तादृशप्रतियोगिताकश्च व्यधिकरणधर्मावच्छिन्नाभावो वृत्तिमद्वृत्तित्वाभाववदन्तर्गतो हे-
तावस्त्येवेति धूमवानस्त्येवेति धूमवान्वह्नेरित्यादावतिव्याप्तिः नच यत्किंचित्साध्याभाववद्वृत्तित्वव्यापकत्वं प्रतियोगितायां तद्व्या-
पकत्वं च यत्किंचित्साध्याभाववद्वृत्तित्वत्वेऽप्येवसमव्यापीति वाच्यम् आलोकावृत्तिवृत्तित्वत्वावच्छिन्नाभावस्यापि संग्रहापत्तेः
तत्प्रतियोगितायां वह्निसामान्याभाववद्वृत्तित्वव्यापकत्वे यत्र वह्निसामान्याभाववद्वृत्तित्वं तत्रालोकावृत्तिवृत्तित्वाभावीयप्रति-
योगितायाः सत्वात् वह्निसामान्याभाववद्वृत्तित्वस्यालोकावृत्तितया तस्याप्यालोकावृत्त्यभावप्रतियोगित्वात् व्यधिकरणध-

ऊँ॰ ६५ 65

र्मावच्छिन्नवन्नाभाववद्वृत्तित्वे च तत्प्रतियोगिताव्यापकत्वमिति तत्साध्यतावच्छेदकत्वात् अतो यदभाववद्वृत्तित्वं व्यापक
त्वे प्रतियोगितायास्तदभाववद्वृत्तित्वस्यैव प्रतियोगिताव्यापकत्वमित्येतादृशार्थलाभाय साध्याभावेत्याद्युक्तं एवं च वह्नि
सामान्याभाववद्वृत्तित्वेन तत्प्रतियोगिताव्यापकं आलोकाद्यवृत्तिवृत्तिताभावीयप्रतियोगितायां घटवृत्तिवृत्तितादावपि सत्वा
त् तत्र च वह्निसामान्याभाववद्वृत्तित्वस्यासत्वात् इति तत्स्य यावदन्तर्गतत्वस्यासत्वात् धूमे तदसत्वेपि नाव्याप्तिः एतादृशप्रति
र्वह्निवृत्तित्वावच्छिन्नाभावो धूमस्यैव वह्नौ तन्निष्ठधूमवृत्तित्वावच्छिन्नाभावासत्वात् नाव्याप्तिः ननु तेन साध्याभावधार
णतन्मूलसामान्याभावसाध्यकेनाव्याप्तिरिति मिश्रलक्षणे व्याख्येयं नन्वेवमपि धूमनिष्ठवृत्तिनिष्ठविशेषमात्रं वृत्तिनिष्ठधर्माव
च्छिन्नप्रतियोगिताकस्य वृत्तित्वसामान्याभावस्य व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकस्य धू
मादावसत्वादव्याप्तितादवस्थ्यमित्यत आह तन्नदिति व्यधिकरणधर्मावच्छिन्नाभावस्य वारणमाभूदित्येतदर्थं समानाधि
करणेनेत्युक्तं तत्साध्याभाववद्वृत्तित्वाभावीयप्रतियोगितासमानाधिकरणेनेत्यर्थः साध्याभाववद्वृत्तित्वावच्छिन्नाभा
ववारणमाभूदित्येतदर्थं तत्साध्याभाववद्वृत्तित्वातिरिक्तेनेत्युक्तं तथा चोक्ताभावस्य तत्साध्याभाववद्वृत्तित्वातिरिक्ते
नतदभावीयप्रतियोगितासमानाधिकरणेन धूमनिष्ठवृत्तित्वविशेषमात्रवृत्तिनाधर्मेण वह्निच्छिन्नप्रतियोगिताकत्वात्तत्
स्य यावदन्तर्गततया मतिनेसहेतावसत्वेपि न क्षतिरिति भावः केचित्तु सत्वावान्धूमवत्त्वादित्यादौ व्यधिकरणधर्मावच्छिन्नसा

ध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकस्य घटसमवेतत्वोभयत्वावच्छिन्नप्रतियोगिताकाभावस्य च पदे समवायावच्छि
न्नवृत्तिमत्त्वाप्रसिद्धस्य द्रव्यत्वे हेतौ वस्त्वादव्याप्तिरत आह तत्तत्साध्याभावेति तथा चोक्तोभयत्वेन तत्साध्याभाववद्वृत्तिमत्ता
तिरिक्तमेवेति न दोष इत्याहुः साध्याभाववद्वृत्तित्वाभावो यः प्रतियोगितासमानाधिकरणत्वमपेक्ष्य लाघवादाह वृत्तित्ववृत्ति
नावेति तथा च तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तेन वृत्तित्वादिधर्मेणानवच्छिन्नप्रतियोगिताक इति फलितार्थं तत्र घटत्वेति तद
पेक्षयापि तत्तत्साध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावघटत्वलाघवान्निवेश्यं उक्तदोषाणामत एव निरासात् न च गुरुधर्मस्य प्रति
योगितानवच्छेदकतया तादृशाभावोऽप्रसिद्धः तदपेक्षया लघोर्वृत्तित्वस्यैव तदवच्छेदकत्वादिति वाच्यं वृत्तिमत्त्वप्रयत्नस्य
वैयर्थ्यापत्तेः व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वत्वावच्छिन्नाभावमवृत्तिमात्रप्रसिद्धमादायाव्याप्तिवारणार्थमेव त
दुपादानात् गुरुधर्मस्य प्रतियोगितावच्छेदकत्वानभ्युपगमे तादृशवृत्तित्वाभावस्य वृत्तित्वमेव प्रतियोगितावच्छेदकं लाघवात् वृ
त्तित्वस्य च तत्साध्याभाववद्वृत्तित्वत्वातिरिक्ततया तदवच्छिन्नप्रतियोगिताकाभावमादायाव्याप्तिशंकानुत्थानात् केवला
न्वयिस्थले च व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य व्यधिकरणधर्मावच्छिन्नमेवाभावमादाय लक्षणोपपत्तेः तत्र
समानाधिकरणधर्मावच्छिन्नस्य साध्याभावस्याप्रसिद्धेर्व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वावच्छिन्नाभावस्य वृत्ति
मद्वृत्तित्वाभावात् न च तत्साध्याभाववद्वृत्तित्वत्वाव्यापको यः समानाधिकरणो धर्मस्तदनवच्छिन्नप्रतियोगिताकाभाव एव

ॐ
९९
6b

तत्साध्याभाववद्वृत्तित्वाभावप्रसिद्ध्यर्थं यथोक्तो वृत्तित्वानवच्छिन्नप्रतियोगिताकोऽजगद्वृत्तित्वाभावोऽपि तथैवेति तद्वारणाय वृ-
त्तिमद्वृत्तिपदमिति वाच्यं पर्वतनिवेन्धनमतरवृत्तित्वाभावस्यापि तथैवोक्तरीत्या यावदन्तर्गतस्य धूमादावसत्त्वादव्याप्तेः त-
स्यापि हि वृत्तित्वमेव प्रतियोगितावच्छेदकं तत्साध्याभाववद्वृत्तित्वस्य व्यापकमेवेति तद्व्यापकधर्मानवच्छिन्नप्रतियो-
गिताकत्वस्य उक्तान्यतरवृत्तित्वाभावेऽपि सत्त्वात् न च तादात्म्येन सद्धेतौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववत्तादात्म्य-
स्य पदार्थमात्रवृत्तितया प्रमेयत्वस्थानीयतया तेन च तादृशाभावोऽपि अप्रसिद्ध एवेति वाच्यं तद्वात्म्यत्वधर्मो न तत्स्वरूपमित्य-
ङ्गीकारादित्याहुः प्रकृतमनुसरामः न च वृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्य तत्साध्याभाववद्वृत्तित्वाभावस्य
विवक्षायां धूमत्वेन तद्धूमत्वाभावस्य वृत्तित्ववृत्तिधर्मानवच्छिन्नस्य धूमेऽसत्त्वादव्याप्तिरिति चेन्न वृत्तित्वप्रतियोगिकत्वस्याप्य-
भावे विवक्षितत्वात् तद्वृत्तित्वाभावोऽपीति ग्रन्थस्वारस्यात् न च धूमनिष्ठधूमवृत्तित्वत्वावच्छिन्नस्य निर्वह्निवृत्तित्वधूमवृत्तेस्तद-
न्यतराभावस्य वृत्तित्वप्रतियोगिकस्य धूमेऽसत्त्वादव्याप्तिरिति वाच्यं तादृशान्यतरत्वविशिष्टधूमवृत्तित्वस्य तत्प्रतियो-
गितावच्छेदकतया तदवच्छिन्नस्यैव प्रतियोगितया साध्याभाववद्वृत्तित्वप्रतियोगिकत्वविरहेण तदभावस्य यावदन्तर्गतत्वा-
दिति केचित् अन्ये तु वृत्तित्वप्रतियोगिकत्वनिवेशे गौरवं तत्साध्याभाववद्वृत्तित्वातिरिक्तसमानाधिकरणधर्मावच्छिन्न-
प्रतियोगिताकतया यथोक्तदोषानवतारादित्याहुः तत्साध्याभाववद्वृत्तित्वे प्रतियोगिताव्यापकत्वनिवेशस्य फलमाह ते

नालोकावृत्तित्वेनेति आलोकावृत्तित्वावच्छिन्नाभावस्यालोक एव सत्त्वाद्धूमादौ तदभावात् आलोकावृत्तेर्धूमत्वादेर्धूमादौ सत्त्वा
त् उक्तरीत्या तत्तत्सत्त्वस्य यावदन्तर्गतत्वे आलोकावृत्त्यभावीयप्रतियोगितायां निर्वह्निवृत्तित्वव्यापकत्वेपि निर्वह्निवृत्तित्वस्य त
दव्यापकत्वात् घटत्वादावपि तदभावीयप्रतियोगितायाः सत्त्वात् निर्वह्निवृत्तित्वस्य च तत्रासत्त्वात् ननु धूमत्वे व्यधिकरणम
प्युक्तविवक्षाप्रयोजनतया कुतो नोक्तमिति चेन्न व्यासज्यवृत्तिधर्मावच्छिन्ननिवेशेनापि तद्वारणोपपत्तेः प्रतियोगितायां
तत्साध्याभाववद्वृत्तित्वविवक्षायाः फलमाह यत्रेन्धनत्वेनेति अनेन साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वं
साध्याभावस्य दर्शितम् अत्र महानसवृत्तित्वाभावीयप्रतियोगिता न तत्साध्याभाववद्वृत्तित्वव्यापिका इंधनत्वावच्छिन्नत्वं
न्यभाववद्वृत्तित्वस्य पर्वतादिवृत्तित्वेपि सत्त्वात् महानसवृत्तित्वाभावीयप्रतियोगितायाश्च तस्मिन्नसत्त्वादिति भावः महा
नसाद्यन्तर्भावेन दोषमुक्त्वा सद्धेतुसामान्ये दोषमाह तन्निष्ठेति हेतुतावच्छेदकसंबंधावच्छिन्नवृत्तिमत्त्वृत्तित्वदर्शनाय हेतु
तयेति धूमनिष्ठयद्वृत्तित्वेन यत्नाभाववति पर्वतादौ वृत्तित्वे तदभावस्यालोकावृत्तेर्धूमादावसत्त्वादव्याप्तिः स्यादित्यर्थः ननु सत्ता
भाववान् जातेरित्यत्राप्यव्याप्तिः साध्याभावोऽत्र सत्त्वात् द्रव्यसमवेतत्वावच्छिन्नाभावस्य गगनादिमात्रवृत्तितया वृत्तिमद्वृत्तित्वा
भावेन यावदन्तर्गतत्वात् घटत्वेन सत्ताभाववत्समवेतत्वाभावस्य तज्जातावपि सत्त्वादिति चेन्न अत्र साध्यसामानाधिकरण्यस्या
पि विवक्षणीयत्वादिति केचित् अन्ये तु घटाद्यवृत्तित्वेन घटाद्यवृत्त्यभावस्य साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियो

ॐ ६८

67

गिताकत्वात् तद्वृत्तिद्रव्यत्वेजातेर्हेतितान्नदोषइत्याहुः अवृत्तित्वहेतुवारणार्थंतद्वृत्तिमत्वंदेयमित्येके पक्षधर्मताविरहान्ना
नुमितिरित्यन्येनवजगद्वृत्तित्वेनपर्वतवृत्तित्वघटान्यतरभावस्यसाध्याभाववद्वृत्तित्वानतिरिक्तसमानाधिकरणधर्मानवा
च्छिन्नप्रतियोगिताकस्यधूमे सत्वादव्याप्तिरितिवाच्यंजगद्वृत्तित्वविशिष्टोक्तान्यतरत्वस्यैवतत्प्रतियोगितावच्छेदक-
त्वात् साध्याभाववद्वृत्तित्वानतिरिक्तेनान्यतरत्वेनैवगगनावच्छिन्नप्रतियोगिताकस्यतस्ययावदन्तर्गतत्वात् नचोत्पत्तिकाला
वच्छेदेननिर्धूमवृत्तित्वावच्छिन्नाभावस्यापिवन्हौसत्वादव्याप्तिरितिवाच्यं तादृशवृत्तित्वाभावस्यहेतुतावच्छिन्नवृत्तित्वनि
रूपकत्वस्यविवक्षितत्वात् अत्रपरेतत्स्वरूपसम्बन्धेनद्रव्यसत्वादित्यादावतिव्याप्तिः द्रव्यत्वत्वावच्छिन्नद्रव्यत्वाभाववतिगुणादौस
मवायेनवृत्तित्वत्वावच्छिन्नाभावस्यद्रव्यत्वादौसमवायावच्छिन्नवृत्तिमतिप्रसिद्धस्यहेतावभावात् सत्तापागुणादावपिवृ
त्तित्वाद्विशिष्टसत्तायाश्चतदभेदात् वस्तुतस्तुविशिष्टसत्तात्वावच्छिन्नाधिकरणतायागुणादावनङ्गीकारात् साध्याभाव
वद्वृत्तित्वाभाववत्त्वावच्छिन्नाधिकरणतासामान्यकत्वविवक्षायांनकश्चिद्दोषः विशिष्टसत्तात्वावच्छिन्नाधिकरणताया
गुणादावनङ्गीकारात् यादृक्षवृत्तित्वाभाववत्त्वादित्यादावतिव्याप्तिः एवंकालिकेनवृत्तौमहाकालान्योऽघटादित्यादौविष
यतयावृत्तौचनित्यज्ञानान्योऽघटादित्यादौनातिव्याप्तिः सामान्यान्तर्गततायांघटत्वावच्छिन्नाधिकरणतायांमहाकालनिष्ठा-
यांसाध्याभाववन्महाकालवृत्तित्वावच्छिन्नाभावसत्वादितिनदोषः सार्वभौमलक्षणमाह अन्येत्ववृत्तिमद्वृत्तित्वयोयावत :

साध्याभावसमस्ताधिकरणेवृत्तित्वाभावात्तदवस्थैवेत्यत आह प्रमेयेति वाच्यं घटादित्यादौ वाच्यत्वेन घटाद्यभाववत्त्वाग्रहादेव न
वृत्तित्वतावच्छिन्नाभावस्याग्रहात् गगनादिमात्रवृत्तेरेतावत्सत्वादव्याप्तिरतो वृत्तिमद्वृत्तीत्यत इति पर्वतत्वादौ व्याप्त्यैक्ये धूमवान् वह्नेरित्या
दौ धूमत्वेन धूमाद्यभावकूटाधिकरणवृत्तित्वप्रतियोगिकस्वाधिकरणधर्मावच्छिन्नाभावस्य वह्नौ सत्वादतिव्याप्तिरतो यावदेत
दिति तथा च निरुक्तवृत्तित्वावच्छिन्नाभावस्य यावदन्तर्गतस्य वह्न्यादावसत्वान्नातिव्याप्तिः नन्वालोकावृत्तित्वावच्छिन्नाभावस्या
पि निर्वह्निवृत्तित्वाभावतया तस्य धूमे सत्वाद्वह्निमान्धूमादित्यादावव्याप्तिरत आह स्वव्यापकेति स्वपदं प्रतियोगितापरं ता
दृशेति स्वव्यापकं यत्साध्याभावकूटाधिकरणवृत्तित्वं तद्व्यापकप्रतियोगिताक इति फलितार्थः तेनोक्ताव्याप्तिवारणमि
त्याह उक्तप्रायमिति साध्याभावकूटाधिकरणवृत्तित्वव्यापकत्वस्याप्यालोकावृत्त्यभावीयप्रतियोगितायां सत्वेपि सा
ध्याभावकूटाधिकरणवृत्तित्वस्यालोकावृत्त्यभावीयप्रतियोगिताव्यापकताभावात् घटत्वादावप्यालोकावृत्त्यभावी
यप्रतियोगितायाः सत्वात् साध्याभावकूटाधिकरणवृत्तित्वस्य च घटत्वादालोकावृत्त्यभावस्य यावदन्तर्गतत्वादिति
भावः प्रतियोगितायां साध्याभाववद्वृत्तित्वव्यापकत्वविवक्षाफलमाह एवं लक्षणे वह्निमान्धूमादित्यादौ द्रव्यत्वेन तत्त्वन्याभाववत्त्व
ह्रानत्वादिवृत्तित्वतावच्छिन्नाभाववारणमशक्यं एतल्लक्षणे तत्कूटघटितत्वाद्यत्र वह्निवत्तायां तत्कालेन संभवति महान
सादर्श्याधिकरणधर्मावच्छिन्नसाध्याभाववत्त्वेपि समानाधिकरणधर्मावच्छिन्नसाध्याभाववत्त्वाभावेन साध्याभावकूटानधि

उ०
६८
69

करणेतयानहृत्तितभावस्य यावदन्तर्गतत्वयातस्य हेतावसत्त्वेपिक्षतिविरहात् किंतुवक्ष्यधूमादित्यादौ समानाधिकर
णधर्मावच्छिन्नाभावस्याप्रसिद्ध्या व्यधिकरणधर्मावच्छिन्नसाध्याभावकूटाधिकरणं महानसादपि तद्वृत्तित्वावच्छिन्नाभावस्य
हेतावसत्त्वादव्याप्तिः स्यात् साध्याभावकूटाधिकरणवृत्तित्वव्यापकत्वस्य प्रतियोगितायां विवक्षितत्वे तदुक्ताभावो न यावद
न्तर्गतः उक्तसाध्याभावकूटाधिकरणवृत्तित्वस्य पर्वतादिवृत्तित्वेपि सत्त्वात् महानसादिवृत्तित्वाभावीयप्रतियोगितायामवृत्
त्तेः सत्त्वात् इत्यभिप्रायवानाह उक्तप्रायमिति तथा च साध्याभावकूटवद्वृत्तित्वत्वे प्रतियोगिताव्यापकत्वविवक्षायां पू
र्वलक्षणइवात्रापि वह्निमान्धूमादित्यादावव्याप्तिवारणे प्रयोजनं प्रतियोगितायां साध्याभावकूटवद्वृत्तित्वव्यापकत्वविव
क्षायास्तुवाच्यत्वादिसाध्यके धूमादावितिविशेषइतिभावः समवायेतीति समवायपदोपादानेनिर्धूमवृत्तित्वाभावोन
यावदन्तर्गतः तत्प्रतियोगितायाः साध्याभावकूटवद्वृत्तित्वाव्यापकत्वात् व्यधिकरणधर्मावच्छिन्नधूमाभाववद्वृत्तित्वेपि साध्या
भाववद्वृत्तित्वस्य सत्त्वात् निर्धूमवृत्तित्वाभावीयप्रतियोगितायास्तु सत्त्वात् किंतु व्यधिकरणधर्मावच्छिन्नो वृत्तित्वाभावए
व उभयविधसाध्याभाववद्वृत्तित्वेनप्रतियोगितायाः सत्त्वात् स च वह्न्यादावसत्त्वात्तेनाव्याप्तिः समवायपदोपादानेनतु निर्धूम
वृत्तित्वाभावएव तथा साध्याभावकूटाधिकरणवृत्तित्वस्य उक्ताभावप्रतियोगितावच्छेदकसमवायेन सत्त्वात् निर्धूमवृत्तित्वा
वच्छिन्नाभावस्य वह्निमहत्त्वे यावदन्तर्गतस्य वन्ह्यादावसत्त्वान्नातिव्याप्तिरितिभावः अत्र साध्याभावकूटाधिकरणवृत्तित्वस्य प्रति

योगिताव्यापकत्वं प्रतियोगिताया अस्साध्याभाववत्कूटाधिकरणवृत्तित्वव्यापकत्वमित्युभयत्र कूटपदं बोध्यं॰ न च साध्याभाववद्वृत्तित्व॰
व्यापकप्रतियोगिताया व्यापके साध्याभाववत्कूटाधिकरणवृत्तित्वमिति विवक्षितमिति वाच्यं वह्निमान्धूमादित्यादावव्याप्तेः
तादृशवृत्तित्वाभावाप्रसिद्धेः निर्वह्निवृत्तित्वाभावीयप्रतियोगितायाः साध्याभाववद्वृत्तित्वताव्यापकत्वात् व्यधिकरणधर्मा
वच्छिन्नसाध्याभाववद्वृत्तित्वे साध्याभाववद्वृत्तित्वस्य सत्त्वान्निर्वह्निवृत्तित्वाभावीयप्रतियोगितायास्तत्सत्त्वात् व्यधिकरण
धर्मावच्छिन्नसाध्याभाववद्वृत्तित्वाभावीयप्रतियोगितायास्तु साध्याभाववत्कूटाधिकरणवृत्तित्वे न व्यापकं इंधन न तेन वह्न्य
भाववद्वृत्तित्वे हि सा प्रतियोगिता न तु तस्मिन् साध्याभाववत्कूटाधिकरणवृत्तित्वमिति न च साध्याभाववत्कूटाधिकरणवृत्ति
त्वव्यापकत्वे प्रतियोगिताया न व्यापकत्वं च साध्याभाववद्वृत्तित्वे इति विवक्षणीयं आलोकाद्वृत्तियवृत्तित्वत्वावच्छिन्नाभा
वस्य धूमे सत्त्वादव्याप्तेः अस्ति हि आलोकवृत्तिवृत्तित्वाभावीयप्रतियोगिताया साध्याभाववत्कूटाधिकरणवृत्तित्वव्यापकत्वं
साध्याभाववद्वृत्तित्वे इति तस्यापि यावदन्तर्गतत्वात् इदं चात्र बोध्यं अत्र समुदायपदलभ्योऽर्थः पूर्वोक्तलक्षणे समुदायपद
त्यागेऽपि स्वव्यापकत्वं तत्साध्याभावे त्यादिशेषे साध्याभावस्य तत्तत्तेन धारणे कृतादोषितिकारेण नीतः किं चात्र तिधूमवृ
त्तित्वस्य व्यधिकरणधर्मावच्छिन्नाभावमादायाति व्याप्तिर्हेतुत्वाभावे यावत्प्रवेशाद्वार्यते मिश्रलक्षणे तु सा जात्यप्रवेशात्
एवं व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्य समानाधिकरणधर्मावच्छिन्नाभावमादायाव्याप्तिरत्र हेतुमद्वृत्तित्वप्रवे॰

डौ॰
६५
69

साद्धार्यमिति मिश्रलक्षणे तस्याजात्यप्रवेशादेवेति एवं च साध्याभावे यावत्तेमिश्रलक्षणे सार्वभौमलक्षणे च समाने इ
त्ताभावे मिश्रलक्षणे साजात्यं सार्वभौमलक्षणेन तथात्वमेव इतित्ताभावे इत्नि महत्तितं सार्वभौमलक्षणे धिकमि
त्यविशेषः ननु समवायेन वह्निः साध्यतायां संयोगेन धूमे हेतौ तावन्निव्याप्तिः एवं संयोगेन वह्नौ साध्ये वह्न्यवयवत्ते पर्वतव
त्ववह्न्यवयवसंयोगे वा हेतौ तावन्निव्याप्तिः पर्वतस्य समवायावच्छिन्नवह्न्यभावाधिकरणत्वेपि संयोगावच्छिन्नवह्न्यभावानधि
करणत्वात् वह्न्यवयवस्य च संयोगावच्छिन्नवह्न्यभावाधिकरणत्वेपि समवायावच्छिन्नवह्न्यभावानधिकरणत्वात् पर्वत
स्य वह्न्यवयवस्य च साध्याभाववत्कूटानधिकरणत्वात् कूटोदरेव तदधिकरणत्वात् इतित्ताभावस्य हेतौ सत्वादित्यत आह सा
ध्याभावश्चेत्यादि साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताको ग्राह्य इत्यर्थः तेन समवायावच्छिन्नवह्न्यभावघटितकू
टाधिकरणे पर्वतेपि तद्भित्ताभावस्य धूमे सत्वात् नातिव्याप्तिः नापि संयोगेन वह्नौ साध्ये वह्न्यवयवत्ते पर्वतवह्न्यवयवस
वसंयोगे वा हेतौ वह्न्यवयवस्य संयोगावच्छिन्नवह्न्यभावघटितकूटाधिकरणत्वात् इतित्ताभावस्य हेतावसत्वादिति भावः
अत्र वह्न्यवयवत्तेविरुद्धे हेतौ पर्वतवह्न्यभाववयवसंयोगस्य साध्यसामानाधिकरण्यः साध्याभावसमानाधिकरणश्चेति व्यभि
चारीति विशेषः स्वव्यापकेति स्वप्रतियोगिता तद्व्यापकं साध्यतावच्छेदकं तद्व्यापिका च प्रतियोगिता यस्य तादृशस्येत्यर्थः सा
ध्यतावच्छेदकप्रतियोगिताव्यापकत्वविवक्षायाः फलमाह तेनेति पचेति तत्र सद्धेतौ नाव्याप्तिरित्यन्वयः पृथिवीत्वाभाववा

न्यूजलत्वात् अत्र पृथिवीत्वाभावत्वावच्छिन्नपृथिवीत्वाभावाभावस्य पृथिवीत्वस्वरूपतया तद्वतो घटपटादेर्विपक्षत्वे घटादि
त्वावच्छिन्नाभावो घटमात्रे पटावृत्तित्वावच्छिन्नाभावश्च पटमात्रे इत्येवं क्रमेण साध्याभावमध्यप्रविष्टघटावृत्त्यभावादीनामेकाधिक
रणमप्रसिद्धं घटावृत्त्यभावो हि साध्यतावच्छेदकव्यापकप्रतियोगिकत्वान्न भवति साध्याभावः पृथिवीत्वाभावस्य घटावृत्तितया
घटावृत्त्यभावीयप्रतियोगितायाः साध्यतावच्छेदकपृथिवीत्वाभावत्वव्यापकत्वात् पृथिवीत्वाभाववत्त्वस्य तत्तस्मिन्नसत्त्वादिति ना
व्याप्तिरिति भावः ननु तद्घटावृत्तित्वाद्यवच्छिन्नाभावमादाय वह्निमान्धूमादित्यादावव्याप्तिसंभवात् स्थलान्तरानुसरणवशेने
ति चेन्न तत्र गुणादेरेव कूटाधिकरणस्य सुलभत्वात् तत्रयंयोगिनकस्यचिदप्यवृत्तेः अत्र तद्घटावृत्तित्वं घटत्वाभावस्यैव विशेष
णतया गुणादौ वृत्त्या घटावृत्तित्वावच्छिन्नाभावस्य साध्यतावच्छेदकीभूतविशेषणतासंबन्धावच्छिन्नप्रतियोगिताकस्य गुणा
दौ दुर्लभत्वात् कूटाधिकरणाप्रसिद्धिनिबन्धनाया अव्याप्तेस्तदवस्थत्वात् तत्रापि गुणादौ वृत्तितावच्छेदकसंयोगसंबन्धे
न वृत्तिताप्रसिद्धिनिबन्धनाव्याप्तिरिति तत्पदेनत् ननु यावतामेकाधिकरणेऽसंभवस्तावदभावघटितसमुदायाधिकरणं घटा
द्येव प्रसिद्धं न हि वृत्तित्वाभावो जलत्वे सुलभ इति नेयमव्याप्तिः अतः प्रयोजनान्तरमाह पृथिवीत्वादाविति पृथिवीद्रव्यत्वप्रकारक
प्रमाविशेष्यत्वादिमत्त्वादौ जातित्वेन जात्यभावोऽपि साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वात् साध्याभावः स्यात् पृथिवीत्व
स्यापि जात्यभावप्रतियोगित्वात् जातित्वावच्छिन्नाभावकूटाधिकरणं सामान्यादिकमेवं तद्वृत्तित्वाभावस्य हेतौ सत्त्वादतिव्या

ॐ ८० 70

त्रिः स्मात् उक्तविवक्षायां तु साध्यतावच्छेदकस्य पृथिवीत्वस्य तदभावीयप्रतियोगिताव्यापकत्वेनास्ति घटत्वादावपि त
त्प्रतियोगितायाः सत्त्वात् पृथिवीत्वस्य च तस्मिन्नसत्त्वादिति न दोष इत्यर्थः अत्र द्रव्यत्वे हेतौ सामान्यादौ हेतुतावच्छेदकसम
वायसंबंधेन हेतुमन्निष्ठाभावाप्रसिद्ध्या नातिव्याप्तिरतो द्रव्यत्वप्रकारकप्रमाविषयत्वे हेतुकृते तथा च स्वरूपसंबंधेन हेतुतावच्छेदके
न हेतुमत्त्वे सामान्यादावपि प्रसिद्धमिति भवत्यतिव्याप्तिरिति भावः प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविवक्षायाः फलमाह
व्याप्येति अभावत्वे साध्यतावच्छेदके घटत्वाभावपटत्वाभावाद्यभावानां घटत्वपटत्वादीनामेकाधिकरण्यमप्रसिद्धेरन्यथाति
उक्तविवक्षायां तु घटत्वाभावीयप्रतियोगितानामभावत्वव्यापकाऽभावत्वनियतघटत्वाभावे तदीयप्रतियोगितायाऽभावात्
प्रतोऽभावत्वेनाऽभावाभावो न साध्याभावः किंतु व्यधिकरणधर्मावच्छिन्नाभाव एव तन्मते यदा व्यधिकरणहेतुत्वताव
च्छिन्नाभावो हेतुमन्निष्ठाभावान्तर्यावदंतर्गतः किंतु व्यधिकरणधर्मावच्छिन्नाभाव एव स च हेतावसत्त्वेनानाव्याप्तिरिति
भावः द्रव्यत्वेति द्रव्यत्वपृथिवीत्वोभयवान् द्रव्यत्वादित्यत्रोभयत्वे साध्यतावच्छेदके तदुभयात्मनरत्वावच्छिन्नाभावः स्वव्या
पकसाध्यतावच्छेदकव्यापकप्रतियोगिताकत्वात्साध्याभावः प्रतियोगिताश्रयउभयस्मिन्न तदीयप्रतियोगितायाः सत्त्वात्
प्रतियोगितासाध्यतावच्छेदकयोः समनियतत्वात् तादृशाभाववांश्च गुणादिरेव द्रव्यत्वस्य द्रव्यमात्रसत्त्वात् द्रव्यस्य तदधि
करणत्वानुपपत्तेः समवायेन तु हेतुमन्निष्ठाभावस्य द्रव्यत्वे सत्त्वेनातिव्याप्तिरिति भावः एवं व्यासज्यवृत्तिधर्मेण साध्यतायामति

व्याप्तिमत्त्वाविशिष्टधर्मेण साध्यतायोग्यतामाह अपिचेति द्रव्यत्वेन घटाद्यभावस्य द्रव्ये सत्त्वेपि द्रव्यत्वेन द्रव्यत्वाभावस्य तत्
स्मिन्नसत्त्वात् साध्याभावकूटाधिकरणं गुणादेव समवायेन तद्रूपत्वाभावस्य द्रव्यत्वे सत्त्वादतिव्याप्तिरिति भावः उक्ताभावस्य
स्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकत्वं दर्शयति द्रव्यत्वेनेति द्रव्यत्वेन द्रव्यत्वाभावीया हि प्रतियोगिता द्रव्यत्व
निष्ठा पृथिवीत्वविशिष्टद्रव्यत्वस्य साध्यतावच्छेदकस्य द्रव्यत्वानतिरिक्ततया प्रतियोगितसाध्यतावच्छेदकयोः परस्पर
व्यापकत्वमिति भावः ननु द्रव्यत्वं द्रव्यान्यासमवेतत्वे सति सकलद्रव्यसमवेतत्वं तत्र लाघवात् द्रव्यान्यासमवेतत्वमेव प्रति
योगितावच्छेदकं तदवच्छिन्नाभावीयप्रतियोगितावद्रूपादावप्यस्ति तत्र च द्रव्यत्वत्वरूपसाध्यतावच्छेदकाभावात्स्वव्याप
कसाध्यतावच्छेदककप्रतियोगिताकत्वाभावादेव नायमभावो लक्षणघटक इति कथमतिव्याप्तिरिति चेन्न आधेयताविशे
षरूपस्य द्रव्यत्वत्वस्य प्रतियोगितावच्छेदकत्वात् तदवच्छिन्नाभावीयप्रतियोगितस्य रूपादावभावात् केचित् द्रव्यान्यासमवेत
त्वमेव साध्यतावच्छेदकं तच्च रूपादावप्यस्तीति साध्यतावच्छेदके प्रतियोगिताव्यापकत्वमित्याहुः तन्न द्रव्यान्यासमवेतत्वाव
च्छिन्नाभावीयप्रतियोगितस्य पृथिवीत्वेपि सत्त्वात् पृथिवीत्वविशिष्टद्रव्यान्यासमवेतत्वरूपसाध्यतावच्छेदकस्य तत्रासत्त्वेन
सत्प्रतियोगिताव्यापकसाध्यतावच्छेदककत्वस्योक्ताभावे दुर्घटत्वात् ननु साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगि
ताकोऽभावो ग्राह्य इति प्रागेवोक्तं साध्यतावच्छेदकसंबंधश्चात्र न समवायः सद्धेतुत्वापातात् पृथिवीत्वविशिष्टद्रव्यत्वस्य

दी॰ ७२

द्रव्यत्वानतिरेकात् द्रव्यत्वस्य च पृथिव्यां सत्त्वात् किं तु पृथिव्यन्यत्वविशिष्टद्रव्यत्वावच्छिन्नाधिकरणत्वमेव तथा पृथिव्यां ता
दृशविशिष्टधर्मावच्छिन्नाधिकरणत्वानंगीकारेण व्यभिचारितोपपत्तेः तत्संबंधावच्छिन्नप्रतियोगिताकोक्तसाध्याभाववती
पृथिव्यपि तद्वृत्तिताभावस्य द्रव्यत्वेनास्तीति नातिव्याप्तिः एवं पूर्वोक्तेपि उभयत्वावच्छिन्नाधिकरणत्वरूपसाध्यतावच्छेदक
संबंधावच्छिन्नप्रतियोगिताकाभावाधिकरणे जलादावपि तद्वृत्तिताभावस्य द्रव्यत्वे सत्त्वान्नातिव्याप्तिरित्यस्वरसादाह
किं चेति रूपसामान्याभाववान् वायुत्वादित्यादावव्याप्तिः साध्याभावानां तत्तद्रूपात्मकानामेकाधिकरणाप्रसिद्धेरिति भाव
यावतामिति तथा च यावतामभावानामेकाधिकरण्यप्रसिद्धेस्तावदभावघटितस्यैव समुदायो विवक्षणीयः तथा च घ
टत्वादिना रूपसामान्याभावाभावो रूपसामान्याभावत्वेन रूपसामान्याभावाभावत्वरूपेण उभयघटितसमुदायाधिक
रणे च दोषे च प्रत्येकं प्रसिद्धमिति नोक्ताव्याप्तिरिति भावः यावतां साध्याभावानां मिथः सामानाधिकरण्यं तद्घटितसमुदा
यविवक्षायां दोषमाह इदं पृथिवीति इदमिति पृथिवीविशेषणे कर्मधारयाश्रयणात् तेन पृथिवीपदं पृथिवीविशेष
परं अन्यथा घटतद्धान्यवृत्तितपटतद्धान्यवृत्तित्वादिरूपसाध्याभावसमुदायाधिकरणत्वस्य वायावपि सत्त्वान्नत्र च वायुत्वस्यावृ
त्तिताभावादतिव्याप्त्यसंगतेः तत्र च घटरूपपृथिव्यां पटतद्धान्यवृत्तित्वरूपाभावघटतद्धान्यवृत्तित्वरूपस्य साध्याभावस्यासत्त्वात्सा
ध्याभावस्य समुदायस्य रूपगंधाघटितत्वात् रूपादीनां साध्याभावत्वेपि परस्परसामानाधिकरण्यानापन्नत्वात् घटेव

रूपस्यप्येपरूपस्याभावात् तदापन्नसाध्याभावसमवायाधिकरणत्वस्य पृथिव्यामसत्त्वात् उक्तरीत्या पृथिवीपदस्यत
चरमक्षणादिरूपपृथिवीविशेषपरत्वेन तत्पृथिवीवृत्तिगुणाभावे साध्ये सैकाधिकरण्यापत्त्यायेगंधरूपाद्यात्मकाभावास्तव
दितसमवायाधिकरणे पृथिव्यां वायुत्वस्य हेतोरवृत्तेरिति भावः नन्वुत्पत्तिकालावच्छेदेन पृथिवीवृत्तिगुणाभावस्यापि
सत्त्वात् सद्धेतुरेवायमत आह सत्तानेति इहापि पृथिवीपदं विशेषपरं उक्तयुक्तेः सत्ताभिन्नपृथिवीसमवेतद्रव्यत्वा
दित तदभावस्य वायौ कदाप्यभावादेतत्साध्ये वायुत्वमसद्धेतुरेवेत्यर्थः ननु साध्यसामानाधिकरण्यस्य हेतौ दानोदवत्तदभा
ववृत्तिवायुत्वेनातिव्याप्तिरित्यत आह रूपवदिति तत्र च गुणादौ साध्यसामानाधिकरण्यस्य सत्त्वात् तथाप्यतिव्याप्तिरित्य
र्थः रूपात्यन्ताभावस्योत्पत्तिकालावच्छेदेन पृथिव्यादावपि स्वीकारात् साध्याभाववद्वृत्त्यधिकरणे पृथिव्यां तत्सत्त्वादिति भा
भिन्ने स्यादतो रूपवदन्यत्वे हेतुत्वकृते तद्भेदस्य वायुवृत्तित्वात् तत्र नास्तीति भावः पृथिवीसमवेतान्यत्वे सत्तान्यसमवेतत्वम
त्वेवासाध्यत्वस्य समनियतसमवेतसामान्याभावरूपतया लाघवात् समवेतत्वमेव साध्यतावच्छेदकमिति पृथिवीसमवेतसाध
वच्छिन्नप्रतियोगिताकाभावरूपसाध्याप्रसिद्धिः पृथिवीसमवेतप्रतियोगिके स्यत्वमयातावच्छिन्नाभावस्य वायावपि सत्त्वा
त्सद्धेतुत्वमेव सत्तान्यत्वेन पृथिवीसमवेतविशेषणेन तदभावान समवेतसामान्याभावसमनियतः सत्तान्यपृथिवीसमः
वेताभावस्यापि द्रव्यत्वाभावसमनियतत्वात् इयत्वसमवेतप्रतियोगितावच्छेदकं नतु सत्तान्यपृथिवीसमवेतत्वमित्यप्रसि

ॐ
७२

च्छिन्नत्वादवस्थं इत्यत्र तन्नापेक्षमात्रस्य गुरुत्वाभावात् न च समवेतसामान्याभाव एव साध्यमस्त्विति वाच्यं वायुमात्रसमवेतस्व
रूपादेः साध्याभावात्तद्घटितकूटमध्ये पृथिवीमात्रसमवेतस्य परस्परसामानाधिकरण्यानापन्नत्वेनाप्रवेशात् तादृशकूटा
धिकरणे वायौ वायुत्वस्य वृत्तित्वादिति व्याप्त्यनुपपत्तेः प्रत्येकं तु वायुमात्रसमवेतस्वरूपादेः साध्याभावात्तेन कूटघटकार
न्तिकूटाधिकरणपृथिव्यादौ च तत्र हि वृत्तित्वाद्वायुत्वस्यातिव्याप्तेः सत्त्वात् अथ साध्याभावानां समानाधिकरणानाम
ष्यभावानां कूटं विवक्षणीयं तथा च पूर्वोक्तच्छिन्नत्वादिघटितकूटाधिकरणं वायुरपि तद्वृत्तित्वाद्वायुत्वस्य नातिव्याप्तिरि
त्यत आह वस्तुत इति तादृशेति व्यधिकरणधर्मावच्छिन्नेत्यर्थः प्रतियोगितावच्छेदकभेदादभावभेद इत्याशयेन
सहस्येति तथा च कूटस्य रूपादिघटितत्वाद्यावद्रूपाणां चैकाधिकरण्यानुपपत्त्या समानाधिकरणानां यावदभावानां चैका
धिकरणमप्रसिद्धमिति भावः दूषणान्तरमप्याह किं चेति हेतुनेति साध्याभाववति हेतुतावच्छेदकसम्बन्धेन या वृत्ति
रित्यन्वयः अन्यथेति वृत्तित्वस्य हेतुतावच्छेदकसम्बन्धावच्छिन्नत्वाविवक्षायामित्यर्थः तादृशेति साध्यतावच्छेदकसम्ब
न्धावच्छिन्नत्वाविवक्षायामित्यर्थः स्वव्यापकसाध्यसामानाधिकरण्ये वृत्तित्वाभावस्य हेतौ सत्त्वादव्याप्तिः स्यात् उक्तविवक्षायां तु संयोगा
वच्छिन्नवृत्तित्वाभावस्य धूमे सत्त्वान्नेति भावः ननु सम्बन्धसामान्येन वृत्तित्वाभावो विवक्षणीय इत्यत आह साध्येनेति घट
त्वावान् द्रव्यत्वादित्यत्र समवायेन घटत्वस्य साध्यत्वे द्रव्यत्वस्य हेतुत्वे साध्याभाववति महाकाले सम्बन्धसामान्येन तादृशावृत्तित्व

नेनतादृशवृत्तिताभावोऽप्रसिद्धः कालिकेनतत्रसर्वेषामपिवृत्तिमत्तोवृत्तितान् आकाशादौतत्तादृशवृत्तिताभावस्यसत्वेपि
तस्यवृत्तिमद्वृत्तिताभावात् किंतुव्यधिकरणधर्मावच्छिन्नएवतादृशवृत्तिताभावः सचहेतावस्त्येवेतिव्याप्तिरितिभावः इय्ये
सत्तादिमात्रेणनदोषः साध्याभाववत्कूटाधिकरणेगुणादौसंबंधसामान्येनगुणादिवृत्तित्वेनगुणावृत्तिताभावस्यहेतुताव
च्छेदककालिकसंबंधेनवृत्तिमतिघटत्वादौप्रसिद्धस्यहेतावभावात् नचजन्यमात्रस्यकालोपाधितयागुणादावपिकालिकेन
घटत्वादेर्वृत्तितान्नत्रापियथोक्ताभावोवेनप्रसिद्धइतिव्यधिकरणधर्मावच्छिन्नएवगुणादिवृत्तिताभावःप्रसिद्धः तस्यचहेतावस
त्त्वादतिव्याप्तिस्तस्येतिवाच्यं जन्यमात्रेकालोपाधिरितिपक्षानभ्युपगमेतदसंभवात् तत्पक्षेतुतदावेदोषापत्तियामेवेबोध्यत्वात्
तथापिप्रात्ममित्रंमेयत्वादित्यादौनातिव्याप्तिः आत्मनएवतत्रसाध्याभाववत्कूटाधिकरणत्वात् तत्र संबंधसामान्येन
तद्वृत्तित्वेनतद्वृत्तिताभावस्यघटत्वादौप्रसिद्धस्यहेतावभावात् तथाचेति हेतुतावच्छेदकसंबंधावच्छिन्नेयत्साध्याभावव
द्वृत्तित्वंतदभावविवक्षायामित्यर्थः भूतेति सत्तावान् घटादित्यत्रसंयोगेनघटस्यसमवायेनद्रव्यत्वस्यवा हेतुतायांसाध्याभा
ववत्कूटाधिकरणंसामान्यमेवतत्रचसंयोगेनसमवायेनवावृत्तित्वमप्रसिद्धमितितदभावस्योभयविधस्याप्यप्रसिद्धत्वादव्या
प्तिरित्यर्थः चक्रवर्तिनांविवक्षामाह साधनेति तथाचरूपसामान्याभाववान्वायुत्वादित्यादिसद्धेतुमात्रेव्यधिकरणधर्मा
वच्छिन्नाभावएवसाध्याभावपदार्थः समानाधिकरणधर्मावच्छिन्नाभावस्यसाधनसमानाधिकरणत्वविरहात् तेनरूप

ॐ·
७३
73

स्वरूपाभाववान्नोसमुदायघटकताभावात् एकतदधिकरणप्रसिद्धावपिनव्याप्तिः एवंवह्नित्वमहत्त्वघटत्वस्यवह्निमान्धूमा
दित्यादावव्याप्तिवारणार्थंतत् केवलान्वयिनीवतत्रापिसमानाधिकरणधर्मावच्छिन्नाभावस्याकरीत्यासमुदायानेनघटितत्वा·
त् नन्वेवंव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकेति प्रागुक्तविवक्षायांसाध्यतावच्छेदकेप्रतियोगिताव्यापकत्वो·
क्तिवैयर्थ्यम् पृथिवीत्वाभाववान्जलत्वादित्यत्रघटावृत्तित्वपटावृत्तित्वायवच्छिन्नाभाववान्नोसाध्यतावच्छेदकव्यापकप्रति
योगिताकत्वेपिसाधनसामानाधिकरण्याभावादेववारणात् नैवं पृथिवीत्वयत्प्रकारकप्रमाविषयत्वादित्यत्रातिव्याप्ति
वारकत्वात् तत्रसमवायेनजलावृत्तित्वतेजोऽवृत्तित्वायवच्छिन्नाभाववान्नोसाधनसमानाधिकरणत्वयासमुदायघटकत्वेनद·
धिकरणसामान्यायेव तद्वृत्तित्वाभावस्यहेतौसत्वात् उक्तरीत्यातुजलासमवेताभाववत्तेजोऽसमवेताभाववान्नसमुदायघटका ः
तदीयप्रतियोगितायातेजोजलत्वाद्यावपिसत्वात् साध्यतावच्छेदकस्यपृथिवीत्वत्वस्यतत्रासत्वादिति एवंकूटघटितेन·
दानेधूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थंसाधनसमानाधिकरणसाध्याभाववद्वृत्तित्वसमनियतप्रतियोगिताकेत्य
भिधानेनिर्धूमवृत्तित्वाभावस्ययावदन्तर्गतत्वात् उभयविधधूमाभावस्यापिसाधनसमानाधिकरणत्वाद्धिसमानाधिक
रणधूमाभाववद्वृत्तित्वस्यपर्वतादिवृत्तित्वेपिसत्वात् निर्धूमवृत्तित्वाभावीयप्रतियोगितायास्तत्राभावात् व्यधिकरणध
र्मावच्छिन्नोयोधूमाभावस्तद्वृत्तित्वाभावस्यच तादृशस्यवह्नौसत्वात् एवंसाधनसमानाधिकरणसाध्याभावकूटाधिकरणे

वृत्तित्वतस्य प्रतियोगिताव्यापकत्वमादायोक्तौ वह्निमान् धूमादित्यादावव्याप्तिः तादृशवृत्त्यधिकरणमहानसादिवृत्तित्वाभावस्या
पि तथात्वात् तस्य च धूमादावसत्त्वात् प्रतियोगितायां तादृशवृत्तित्वव्यापकत्वस्याप्यभिधाने तु नायं दोषः उक्तवृत्तित्वस्य
पर्वतादिवृत्तित्वेऽपि सत्त्वात् महानसवृत्तित्वाभावीयप्रतियोगितायाश्च तास्मिन्नसत्त्वादिति तस्य यावदन्तर्गतत्वात् नचेदमेवा-
स्तु इति वाच्यम् धूमत्वव्यधिकरणधर्मावच्छिन्नवत्त्वाभाववद्वृत्तित्वे चोभयत्वावच्छिन्नाभावस्य हेतुतावच्छेदकसंबंधेन
वृत्तिमत्त्वालोकादौ वह्नेर्धूमे सत्त्वादव्याप्तेः उक्तवृत्तित्वे प्रतियोगितावच्छेदकत्वस्यापि निवेशे तु उक्ताभावो न यावदन्तर्ग
तः तदीयप्रतियोगितायाश्च धूमेऽपि सत्त्वात् उक्तवृत्तित्वस्य च तास्मिन्नसत्त्वादिति न दोषः तस्मादुक्तवृत्तित्वस्य च प्रति
योगितायाश्च परस्परव्यापकत्वनिवेश आवश्यक इति संक्षेपः स्पष्टोऽन्तरेऽतिव्याप्त्योक्तविवक्षां दूषयति भूतत्वेति
भूतत्वमूर्तत्वान्यतरत्वावच्छिन्नप्रतियोगिताकाभाववत्त्वात् स्पर्शवदन्यत्वात् अत्राकाशे मनोव्यभिचारनिरूपकाधिकरणे
अत्र साध्याभावो भूतत्वमूर्तत्वस्वरूपो आद्यस्य आकाशे द्वितीयस्य च मनसि साधनसामानाधिकरण्ये तयोरेकाधिकरणेऽपृ
थिव्यादिचतुष्टयेऽप्रसिद्धे तद्वृत्तित्वाभावस्य यावत्त्वे हेतौ सत्त्वादतिव्याप्तिरित्यर्थः ननु भूतत्वं बहिरिन्द्रियग्राह्यविशेषगु
णः शब्दः आकाशे हेतुसमानाधिकरणः मूर्तत्वं चावच्छिन्नपरिमाणं मनःपरिमाणरूपं मनसि हेतुसमानाधिकरणं न
वतयोरधिकरणे पृथिव्यादीनि कथमतिव्याप्तिरिति चेन्मैवं तत्प्रकारकप्रमाविशेष्यत्वस्य तावद्भूतमूर्तत्वस्य वा भूतत्वमू

ॐ॰ ७४ ७५

त्वेन पदार्थोऽउक्तत्वान्न स्वच पृथिव्यादावपि सत्त्वात् ननु भूतत्वमूर्त्तत्वान्यतरत्वावच्छिन्नाभावोऽतिरिक्त एव लाघवात्तदधिक
रणे मनोऽपि न हनित्वाभावस्य हेतावसत्त्वान्न दोष इत्यत आह किं चेति यद्वा यदधिकरणे हत्वाभावप्रतियोगितात्वं साधने
समानाधिकरणाभावनिरूपितसाध्यतावच्छेदकसम्बन्धप्रतियोगितात्वव्यापकं तदत्र कूटाधिकरणत्वेनाविवक्षिते
भवति वयत्र स्पर्शवदन्यत्वसमानाधिकरणयोर्मूर्तत्वरूपयोरभावस्तन्निरूपितसाध्यतावच्छेदकसम्बन्धप्रतियोगि
तात्वे उक्तान्यतरत्वावच्छिन्नाभावनिष्ठप्रतियोगितायां तत्र मनोऽहत्वाभावप्रतियोगितात्वे उक्ताभावनिष्ठप्रतियोगितायाम्भ
तत्वमूर्त्तत्वोभयस्वरूपाभावनिरूपितायाव्यापकत्वात् तथा च स्वनिरूपकाभावाश्रयत्वसम्बन्धेन तादृशप्रतियोगिताकूटा
धिकरणत्वं पर्यवसन्नं स्वपदं प्रतियोगितापरं तादृशकूटाधिकरणं च मनोऽपि न हनित्वाभावस्य हेतावसत्त्वान्न दोष इ
त्यत आह किं चेति अन्येन साधनसमानाधिकरणसाध्याभावकूटाधिकरणे हनित्वव्यापकप्रतियोगिताकाद्वयमेव
वाच्यं न चैवं प्रतियोगितायां उक्तहनित्वव्याप्यत्वानभिधानं सर्वोक्तमुभयाभावमादाय धूमादावव्याप्तिरिति वाच्यम्
व्यासज्यहनित्वधर्मानवच्छिन्नप्रतियोगिताकत्वनिवेशेन तद्वारणात् एवं च भूतहनित्वाभावस्यापि यावदन्तर्गतस्पर्शस्पव
दन्यत्वे हेतावसत्त्वान्नातिव्याप्तिः न च सत्तावान् जातेरित्यत्र गुणान्यत्वविशिष्टसत्ताभावद्रव्यान्यत्वविशिष्टसत्ताभावा
दीनां साधनसमानाधिकरणानां एकत्राधिकरणे सामान्यादिकमेव तत्समवेतत्वेनाप्रसिद्धमित्यव्याप्तिरिति वाच्यं

हेतुतावच्छेदकसंबंधेन किंचित्पदार्थाधिकरणे तस्याविवक्षितत्वात् सामानाधिकेंच समवायेन कस्यापि नाधिकरणे
मिति तद्घटितकूटाधिकरणस्य इष्टत्वादेवं समेभवात्तत्समवेतत्वाभावस्य व्यधिकरणधर्मावच्छिन्नस्यैव प्रसिद्धत्वात्तस्य
च हेतौ सत्त्वादत आह किं चेतीत्याहुः महाकालभिन्ने घटादित्यत्र महाकालभेदाभावस्य महाकालत्वस्य महाकाले हे
तुसमानाधिकरणसाध्याभाववत्तया तद्घटितकूटाधिकरणं महाकाल एव कालिकसंबंधेन तद्वृत्तित्वाभावस्य व्यधिक
रणधर्मावच्छिन्नस्य वृत्तिः प्रसिद्धः स च हेतावस्त्येवेत्यतिव्याप्तिः गगनादीनामवृत्तित्वपक्षेपि समानाधिकरणधर्माव
च्छिन्नस्याकाशवृत्ति त्वाभावस्य वृत्तिमद्वृत्तित्वाभावो न यावदन्तर्गतत्वात् इत्यर्थः दैशिकविशेषणतया कालभेदसाध्यका
लिके न च घटस्य हेतोर्विरहस्तत्रया साध्यसामानाधिकरण्यप्रदानेवातिव्याप्तिरतो महाकालानुधावनं तथा च इत्थं च काल
हेतुसाध्ययोः समानाधिकरण्यात्रैतेनापि निर्वाह इति भावः अत्र केचित् उक्तसाध्याभाववत्कूटे विशेषणतया संब
द्धत्वविशेषणेन वोक्तकूटस्य तथात्वे महाकालत्वघटितस्य तस्य संबंधत्वाभावात् महाकालसंबंधत्वरभिन्ने घटादित्यत्र
संबंधत्वाभावस्य महाकालान्यत्वाभावस्य वा तादृशकूटाधिकरणमप्रसिद्धमिति नातिव्याप्तिरित्याहुः हेतुतावच्छेद
कसंबंधावच्छिन्नायावन्तीवृत्तिता प्रसिद्धा तद्वृत्तितधर्मानवच्छिन्नप्रतियोगिताक इति वृत्तिमद्वृत्तिपदस्यार्थः महाकालवृत्ति
त्वेन महाकालवृत्तित्वाभावोपि तादृशः स्वेडकालनिष्ठापि तद्वृत्तितायां महाकालवृत्तित्वस्याभावात् स च हेतौ नास्तीति

उ॰
७५

तद्दोषश्चासमे कूटाधिकरणे हेतुतावच्छेदकसंबंधेन समकिंविसदाधीनधिकरणत्वमपि देयं महाकालस्तु न तथा कालिके
न जगदाधारत्वात् अतः कूटाधिकरणाप्रसिद्धावेव न दोष इत्यपि च एतेनेति उक्तातिव्याप्तेः समर्थः साध्यतेति अत्र प्रतियोगि
ताकांते साध्यवृत्तीति समानाधिकरणे दत्ते यावदिति चाभावविशेषणे वृत्तिमद्वृत्तित्वे यावदेव वृत्तित्वाभावविशेषणे
वह्नित्वेन घटाभावमादाय समन्वयः तत्तदधिकरणवृत्तित्वसामान्याभावस्य वृत्तित्वात् व्यधिकरणधर्मावच्छिन्नतदभावा
स्य च प्रसिद्धत्वात् धूमवान्वह्नेरित्यादौ च न दयोगोलकावृत्त्यभावेन तदयोगोलकावृत्त्यभावानां साध्यव्यापकतावच्छेदकेन
तदयोगोलकावृत्तित्वादिना ऽवच्छिन्नप्रतियोगिताकानां वह्निसमानाधिकरणत्वेन यावदंतर्गतानां एकाधिकरणाप्रसि
द्धमिति नातिव्याप्तिः एवं नानाव्यक्तीनां यत्र व्यभिचारनिरूपकाधिकरणे तत्र सर्वत्र तत्तद्धिपदार्थवृत्तित्वावच्छिन्नाभावान
मेकाधिकरणाप्रसिद्ध्या न दोषः एवं तेकव्यक्तेरेव व्यभिचारनिरूपकाधिकरणं यथा एतद्रूपभिन्नं गुणत्वादित्यादौ तत्रै
तद्रूपमेव तथा एतद्रूपभेदत्वेन एतद्रूपभेदाभावस्य घटाभावस्य च तत्रैव वृत्तेः घटत्वेन तद्वृत्तित्वाभावस्य हेतौ सत्त्वात्
अत उक्तं यावत्त्वेन इति तथा च एतद्रूपवृत्तित्वेन एतद्रूपवृत्तित्वाभावस्य समवाये न वृत्तिमति द्रव्यत्वादौ प्रसिद्धस्य हेतावभा
वान्न दोषः अभाववान्वाच्यत्वादित्यादौ साध्यसमानाधिकरणानां घटादिवृत्तित्वाभावपटाद्यभावानां एकाधिकरणम
प्रसिद्धमित्यव्याप्तिवारणाय प्रतियोगितानांते घटादिवृत्तित्वादिके तु न साध्यव्यापकतावच्छेदके जलत्वाभाववति पटे

दाहेतेर्गुणत्वस्याभावात् नच व्यापकतावच्छेदकप्रतियोगिताकाद्यन्तोपितद्वारणासंभवाद्रूपावच्छिन्नेति व्यर्थमिति वाच्यं
वाच्यत्वसाध्यके घटत्वविशिष्टवाच्यत्वाभाववद्घटान्यत्वविशिष्टवाच्यत्वाभावयोरपि तादृशयोः साधनसमानाधिकरणत्वा
नुभयाधिकरणाप्रसिद्धेर्व्याप्तेः विशिष्टसत्तावान् जातेरित्यादौ गुणान्यत्वाभावकर्मान्यत्वाभावयोर्यावदन्तर्भावार्थं सा
ध्यतावच्छेदकावच्छिन्नेति अन्यथा सत्ताया विशिष्टसत्तायाश्चैक्यात् गुणान्यत्वत्वादेः साध्यव्यापकतावच्छेदकरूपत्वाभा
वात् उक्तरीत्या तद्विशिष्टसत्तात्वावच्छिन्नाधिकरणतावत् द्रव्यमेव तत्र च गुणान्यत्वसत्त्वात् भवति गुणान्यत्वं व्यापकता
वच्छेदकरूपत्वाभावात् उक्तरीत्या तद्विशिष्टसत्तात्वावच्छिन्नाधिकरणतावत् द्रव्यमेव तत्र च गुणान्यत्वसत्त्वात् भवति गुणा
न्यत्वं व्यापकतावच्छेदकं तदवच्छिन्नप्रतियोगिताकाभावयोरेकमधिकरणमप्रसिद्धमिति नातिव्याप्तिः एवं व्याप
कतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वमभावविशेष्यं अन्यथा समवायेन वह्न्यभावकूटाधिकरणपर्वतादिवृत्ति
त्वावच्छिन्नपर्वतादिवृत्तित्वाभावस्य वह्न्यवयवे प्रसिद्धस्य धूमादावसत्त्वेऽपि नाव्याप्तिः एवं च द्रव्यत्वपृथिवीत्वोभयवान् पृ
थिवीत्वात् विशिष्टद्रव्यत्ववान् द्रव्यत्वात् अत्र तत्स्वत्वेनान्यत्वत्वावच्छिन्नप्रतियोगिताकाभाववान् स्पर्शवदन्यत्वात् इ
त्यादावपि नातिव्याप्तिः पूर्वोक्ततत्तद्विपदाहेत्तितावच्छिन्नाभावानां साध्यतावच्छेदके प्रतियोगिताव्यापकत्वाभावे
न यावदन्तर्गतत्वात् उक्ततत्तद्रूपावच्छिन्नप्रतियोगिताकतया तेषामपि यावदन्तर्गतत्वात् तेषामेकाधिकरणाप्र

ॐ
७९

सिद्धेः व्याप्यवृत्तिपदस्य कृत्यमाह केवलेति कपिसंयोगाभाववान् सत्वात् इत्यादौ अपि संयोगाभावत्वरूपसाध्यव्यापकं
तावच्छेदकरूपावच्छिन्नप्रतियोगिताकानां हेतुसमानाधिकरणानां कपिसंयोगरूपाणां यावताम् अभावानाम् एकाधिक
रणाप्रसिद्धेरव्याप्तिः ननु समस्तपदार्थस्वरूपाभावनिवेशाद्यावताम् एकाधिकरणे संभवतीति विवक्षणाद्वान्नित्वात्
गुणवान् द्रव्यत्वादित्यादावप्रतीकारात् इत्याह एवमिति दैशिककालिकाव्याप्यवृत्तिभेदेनोदाहरणद्वयमित्यन्ये
समवायेन गुणत्वेन गुणाभावस्य उत्पत्तिकालावच्छेदेन हेतुसमानाधिकरणस्य यावदन्तर्गतत्वात् नाशयावदभावाधि
करणं नित्यद्रव्यभिन्नमेव न हि तद्वृत्तित्वेन तद्वृत्तित्वाभावस्य नित्यमात्रसमवेते आकाशादौ प्रसिद्धस्य हेतुत्वाभावात्
व्याप्यवृत्तित्वनिवेशात्तु संयोगरूपो गुणत्वावच्छिन्नगुणाभावो वा न यावदन्तर्गतः अव्याप्यवृत्तित्वात् किन्तु कपिसंयोगा
भावस्य गुणस्य वा व्यधिकरणधर्मावच्छिन्नाभाव एव तदधिकरणं च जगदेवेति न हि तत्त्वावच्छिन्नाभावो न वृत्तिमहा
न्तिः किं तर्हि तदेव न जगद्वृत्तित्वाभावः तस्य च हेतौ सत्त्वान्न दोष इत्यर्थः एतेन तत्पसामान्याभाववान् पृथिवीत्वादित्यादौ
नाव्याप्तिः घटात्मकाभाववानां व्याप्यवृत्तित्वाभावात् नित्यरूपाणां च हेतुसमानाधिकरणत्वाभावात् स्वसमानाधिकरण
त्वस्य कृत्यमाह उक्तरूपेति वह्निमान् धूमादित्यादौ तन्न हि पदार्थवृत्तित्वेन साध्यव्यापकतावच्छेदकरूपेणावच्छिन्नप्रतियो
गिताकानां तत्तद्ह्रदवृत्तित्वेन ह्रदवृत्तित्वावच्छिन्नतद्ह्रदवृत्त्यभावानामेकाधिकरणाप्रसिद्धमित्यव्याप्तिः उक्तविवक्षा

योत्वे तेषां हेतुसमानाधिकरणत्वान्न यावदन्तर्गतत्वे तद्वृत्त्यभावो हि तद्वदवयवतद्वृत्त्यभावो येन तद्वदवयवत्वेन तद्व
दयोश्च हेत्वनधिकरणत्वात् नोक्ताभावानां हेतुसामानाधिकरण्यमिति भावः हेतुसामा नाधिकरण्यं च हेतुतावच्छे
दकसंबंधेन हेतुतावच्छेदकावच्छिन्नाधिकरणे दैशिकविशेषणतया वृत्तित्वं संबंधविशेषानुपादाने वह्निमान् धूमादित्या
दौ कालिकेन हेत्वधिकरणे तत्स्पंदपत्नत्स्पंदे वै दैशिकविशेषणतया वर्तमानायां स्वतत्स्पंदवृत्तित्वेन तत्स्पंदवृत्त्यभावयोर
पि साधनसमानाधिकरणत्वेन यावदन्तर्भावेन तयोरेकाधिकरणाप्रसिद्धेः उक्तनीत्या तत्स्पंदस्य हेतुतावच्छेदकेन संयो
गादिना हेत्वनधिकरणत्वाच्च दोषः हेतुतावच्छेदकावच्छिन्नत्वानुपादाने द्रव्यं विशिष्टसत्त्वादित्यादौ नाव्याप्तिः गुणवृत्तित्वा
वच्छिन्नकर्मवृत्तित्वावच्छिन्नाभावयोरपि गुणादौ सत्त्वाद्रूपहेतुसमानाधिकरणत्वात् विशिष्टसत्त्वावच्छिन्नाधि
करणत्वेन द्रव्यमेव न तत्र तदभावाविति न दोषः सत्त्वावान् जातेरित्यादावव्याप्तिवारणाय दैशिकेति अन्यथा सत्त्वेन स
त्त्वाभावस्य समवायेन हेत्वधिकरणे काले कालिकसंबंधेन सत्त्वायावदन्तर्गतत्वे समवायाधिकरणे सामान्यादिकमेव तत्र
समवायेन वृत्तेरप्रसिद्धेः तदभावेति समवायाधिकरणवृत्तित्वे हेतुतावच्छेदकसंबंधेन ग्राह्यत्वे तेन द्रव्यं भिन्नं सत्त्वादित्यादौ
नातिव्याप्तिः अन्योन्याभावसमवायाधिकरणे महाकाले कालिकेन वृत्तिमत्त्वाच्च स्वहत्यात्त्वसामान्याभावस्य वृत्तिमद
वृत्तित्वेन यावदनेन्तर्गतत्वाद्यधिकरणधर्मावच्छिन्नस्य महाकालवृत्तित्वाभावस्यैव हेतावपि सत्त्वात् उक्तरीत्या तत्समवा

यावच्छिन्नमहाकालवृत्तित्वसामान्याभावस्य घटादौ प्रसिद्धस्य हेतावभावान्नेत्यर्थः तदभावेति साध्याभावसमुदायाधिकर
णवृत्तित्वाभाववदित्यर्थः सर्वस्वीकारीत्यस्य व्यापकयथोक्तसाध्याभावसमुदायाधिकरणवृत्तित्वव्यापकप्रतियोगिताको
ग्राह्यः तेन पर्वतवृत्तित्वत्वादिना पर्वतवृत्तित्वाभावस्य धूमेऽसत्वेपि नाव्याप्तिः तदीयप्रतियोगितायाश्च तद्वृत्तित्वव्यापकत्वा
भावेन तस्य गुणवदन्यत्वगोतत्वादित्यर्थः वृत्तिमत्वेति वृत्तिमद्वृत्तेयमत्र यन्नत्वद्वृत्तिमत्वे हेतुतावच्छेदकसंबंधेन ग्राह्ये अन्यथोक्त
कूटाधिकरणसंयुक्तत्वाभावस्य कूपादौ प्रसिद्धस्य धूमादावसत्वादव्याप्तेः पर्वतकूपादेः संयोगेन वृत्तिमत्वाभावात्तदभा
वेनयावदेतगोतइतिभावः आदिपदात् कृष्णमेस्य प्रतियोगितावच्छेदकत्वेऽक्तवृत्तित्वावच्छिन्नाभावोनिवेश्यइत्यादिःसंग्र
हः प्रतियोगितावच्छेदकप्रकारकज्ञानस्य सोन्तेअणभावधीहेतुता भावे पिष्टलमुपपादयति विशेषणेनेति विशे
षणतावच्छेदकप्रकारकविशेषणोज्ञानस्येत्यर्थः तथाच विशिष्टस्य वैशिष्ट्यमित्येवं विषयताकबोधे विशेषणतावच्छे
दकप्रकारकज्ञानस्य हेतुत्वात् घटत्वविशिष्टस्य घटादेः प्रतियोगितासंबंधेनाभावांशे वैशिष्ट्यावगाहित्वभावप्रत्ययेपि हे
तुत्वान्नदोषइति भावः ननु घटत्वेन पटो नास्तीति बुद्धौ अवच्छिन्नत्वसंबंधेन घटत्वे प्रतियोगितायां भाति नतु प्रतियो
गिनि पटे तथाच घटत्वविशिष्टपटवैशिष्ट्यावगाहित्वाभावान्न तत्प्रकारकज्ञानेपेक्ष्यमित्यत आह अभावप्रत्ययोहीति
तथाच प्रतियोगिनि विशेषणतापन्नस्यैव संसर्गीभूतप्रतियोगितायामवच्छेदकत्वसंसर्गेणभानमिति घटो नास्तीत्या

देऽउभयसिद्धम् अन्यथा समानाधिकरणधर्मावच्छिन्नाभावप्रतीतेरीषद्घटत्वेन पटो नास्तीत्यादौ कारकतापत्तेः प्रकृता
माह तदिहेति घटत्वस्य पटे वैशिष्ट्यावगाहने विना प्रतियोगितायां घटत्वस्यावच्छेदकत्वावगाहनानुपपत्तेः वैशिष्ट्यावगाह
नेऽवभ्रमत्वावश्यकत्वात् तस्य च वस्तुमात्रासाधकत्वात् इत्यर्थः सत्यन्तभवे यथोक्तनियमोपि त्याज्य इत्याशयेनाह यदि पुनरि
ति कल्पितावभवस्याप्रयोजकत्वादात्मभविकरस्यादि घटत्वेन घटो नास्तीति प्रतीतेः प्रामाणिकत्वे प्रतियोग्यंशे प्रकारता
नवच्छेदे नैव घटत्वस्य प्रतियोगितायामवच्छेदकत्वेन ग्रहात् तस्य च भ्रमत्वाभावाद्व्यधिकरणधर्मावच्छिन्नाभावेन किं विद्वाध·
कमित्यर्थः घटत्वेन पटो नास्तीति क्वचित्पाठस्तु प्रकृताभिप्रायेण कथंचिद्योज्यः ननु साध्यासामानाधिकरण्यानधिकर
णत्वे यदि साध्यानधिकरणवृत्तित्वस्यानाश्रयत्वं तदा केवलान्वयिन्यव्याप्तिः अथ तदधिकरणवृत्तित्वस्यानाश्रयत्वं तदा·
साधिकरणत्वपदवैयर्थ्यम् इत्थं सत्त्वादिमाद्यादावतिव्याप्तिश्च इयत्ताधिकरणवृत्तिताभावानाश्रयत्वस्य सत्तायां सत्त्वादिमत आ
ह साध्यस्येति तथा च साध्याधिकरणवृत्तयो ये पदार्थास्तेन साध्यासामानाधिकरण्यपदेनोक्तमित्यर्थः तदभावेति नचैतदधि
करणत्वपदव्याख्यानेन तदधिकरणत्वाभाववत्त्वमिति वक्ष्यमाणेऽशतिवाच्ये अधिकरणत्वांशस्यानतिप्रयोजनत्वमिति वक्ष्य
माणत्वात् अत एव केवलान्वयिनि साध्यवद्वृत्तिगगनादेरधिकरणाप्रसिद्धावपि नाव्याप्तिरिति भावः ननु वह्निमान्धूमादि
त्यादावव्याप्तिः साध्यवद्वृत्तेर्धूमाद्वृत्तादेर्धूमादेः सत्त्वादत आह तस्मिन्सतीति तस्यैवार्थमाह तदवच्छिन्नेति इदं च मूल

ॐ
७८

संयोगादेव लभ्यत इत्याह सतिसप्तमीति तथा च साध्यवद्वृत्तिपदार्थाभावत्वे यदधिकरणतायाः अवच्छेदकं तत्त्वमित्यर्थः अथा
अवच्छेदकत्वे पर्याप्त्यनतिरिक्तवृत्तित्वेन विवक्षिते न हि धूमवान्वह्नेरित्यत्रातिव्याप्तिः धूमवद्वृत्तिपदार्थाभाववत्त्वे वह्न्यधिकरणतानतिरि
क्तवृत्तित्वस्य सत्त्वात् संयोगादिना वह्निमद्वृत्तेर्जलत्वादेः संयोगादिपर्यवच्छिन्नाभावस्य धूमाधिकरणतायाः अनतिरिक्तवृत्तित्वा
द्धूमादावव्याप्तेश्च धूमाधिकरणताश्रयेऽपि संयोगादिना जलत्वाभावसत्त्वात् तस्य केवलान्वयित्वादत आह तथेति तथा चा
योगोलकत्वाभाववह्न्यधिकरणतानतिरिक्तवृत्तित्वान्नातिव्याप्तिः तदेव दर्शयति एवं चेति साध्यवद्वृत्तेर्योऽयं सकलः पदा
र्थास्तदभाववत्त्वमित्यर्थः धूमवद्वृत्तेर्योऽभावस्तस्य वह्न्यधिकरणतानतिरिक्तवृत्तित्वादित्यतिव्याप्तिरत उक्तं सकलेति तेन धू
मवद्वृत्तिसकलमध्यप्रविष्टस्यायोगोलकत्वस्याभावस्तस्य वह्न्यधिकरणतानतिरिक्तवृत्तित्वान्न दोषः नैवं पर्याप्तमिति य
ये साध्यवद्वृत्तित्वपर्याप्तेस्तेषां तेन तेन रूपेणावच्छेदाभावघटकत्वादिति भावः तथापि प्रयोजनाभावादाह हेत्वेनेति शिष्टाधि
कारिपर्याधिकामित्यर्थः तेन समवायेन धूमाधिकरणताभावो वाच्य इत्यपि दर्शयन्नाह येन येनेति तथा च साध्यवति
येन संबन्धेन यद्रूपावच्छिन्नस्यावृत्तित्वं तत्संबन्धतद्रूपाभ्यामवच्छिन्नप्रतियोगिताकोऽभावो वाच्यः अन्यथा सकलत्वावच्छि
न्नाभावस्य सार्वत्रिकत्वादतिव्याप्तेः एवं च साकल्यमप्यर्थाद्भावे पर्यवसन्नं संबन्धविशेषानुपादाने च संयोगादिना धूमवद्वृत्ते :
संबन्धान्तरेणाभावस्य वह्न्यन्यनतिरिक्तवृत्तित्वात्तत्रातिव्याप्तेः न चायोगोलकत्वादेरप्युभयाभावस्य वह्न्यनतिरिक्तवृत्तित्वाद्दोषतादव

ष्यम साध्यवद्वृत्तित्वावच्छिन्नाभावस्य वाच्यत्वात् एतेनेति येनयेनेति विवक्षणेनेत्यर्थः समवायेनेति समवायाद्
यवृत्तित्वादौ सत्ताधिकरणे समवायेनावृत्तेर्गगनादेः विशेषणतया सत्त्वे च सत्त्वात् संबंधसामान्येनैव तत्त्वस्य प्रसिद्धमिति
व्याप्तिः तदभाव इति साध्यवद्वृत्तेरभाव इत्यर्थः तादृशेति साध्यतावच्छेदकेत्यर्थः तथा च विशेषणतया मेयत्वाभा
वस्याप्रसिद्धावपि समवायेन मेयत्वाभावस्य सार्वत्रिकत्वान्न दोष इत्यर्थः तेदति जातिमात्रे यत्वादिस्यादौ साध्यतावच्छेदक
संबंधः समवायः तेन जातिमद्वृत्तेः पदार्थस्य सत्ताः समवेतत्वनियमात् समवायावच्छिन्नप्रतियोगिताकस्य जातिमदस
मवेताभावस्य केवलान्वयित्वया मेयत्वान्न वृत्तित्वादतिव्याप्तिरित्यर्थः अत एवेति उक्तातिव्याप्तेरेवेत्यर्थः अव्याप्तिमप्या
ह इदं न जातिमदिति साध्यवत्समवेतेति जात्यभाववति सामान्यादौ कस्यापि पदार्थस्यासमवेतत्वात् तत्संयुक्ताप्रसि
द्धिरप्यत्र बोध्या तथा च जात्यभाववत्समवेतत्वाभावादेरत्र साध्यत्वे साध्यवद्वृत्तिपदार्थस्याप्रसिद्धिरित्यर्थः साध्यतावच्छेद
कसंबंधेन यद्वृत्तित्वं तदभावविवक्षायां तु जात्यादावपि स्वरूपसंबंधेन वृत्तित्वस्य घटाभावादेः प्रसिद्धत्वान्नायं दोष इति तत्रा
स्यानुक्तिः साधनतेति समवायस्वरूपसंबंधयोरेवेति नोक्तदोष इत्यर्थः एतद्रूपेति अत्र व्यभिचारनिरूपकाधिकरण
मेतद्रूपमेव एतद्रूपभेदवत्समवेतत्वस्य समवेतमेव एतद्रूपमात्रसमवेतस्य कस्यचिदप्यभावात् तथा च समवाये
न तदभावस्य केवलान्वयित्वया हेतुत्वान्न वृत्तित्वादतिव्याप्तिरित्यर्थः रूपभेदस्य साध्यतायां रूपभेदवत्समवेतस्य तत्र

डो॰

79

न्तस्याभावो हि तद्विकरणे एतद्रूपेणास्तीति तस्य नह्यनित्वादेति व्याप्तिरित्ययं तद्रूपभेदानुसारः वस्तुभिन्नमिति विषयत-
यावटभेदवदहङ्गे निर्विषयकत्वनियमाद्विषयतयाताहेयप्रदार्थाभावस्य केवलान्वयितया मेयत्वाप्यनहमित्वादित्यर्थः न
नु घटमात्रविषयकनिर्विकल्पे विषयतया घटभेदवहत्नि विषयतासंबन्धावच्छिन्नतदभावस्य मेयत्वाधिकरणे घटेना-
स्तीति साध्यवदहत्वान्निर्विकल्पकीयस्याभावस्य मेयत्वव्यनहमित्वाद्याप्यदोषइत्यत आह घटेति निर्विकल्पकस्य वि-
शेषणत्वानवच्छेदार्थमेव स्वीकाराद्घटत्वविषयकत्वाभावात्तस्य घटभेदविषयकत्वमित्यर्थः इत्थमिति इत्थत्ववतिकालेका-
लिकसंबन्धेन हति मन्मात्रस्य हेतोः संबन्धसामान्येन साध्यवहत्नित्वाभावोऽप्रसिद्धः अहतीनामाकाशादीनां तत्संबन्धसा-
मान्येनाभावः सर्वत्रास्तीति हि तत्त्वनहत्नित्वादेति व्याप्तिरित्यर्थः यत्नयेनेमस्यानन्तनुगतत्वादाह विशेषणतेति तथा
च विशेषणतासंबन्धावच्छिन्नसाध्यवहत्नित्वाभाववत्त्वावच्छिन्नविशेषणतासंबन्धावच्छिन्नप्रतियोगिताकाभावो यद्धर्मा-
वच्छिन्नान्यनहत्नित्वद्धर्मवत्त्वं व्याप्तिरित्यर्थः तेनैव संबन्धेन तत्त्वसामान्याभाव इति वक्ष्यमाणत्वात् सर्वत्रेति व्यभिचारिमात्रेऽ-
त्यर्थः व्यभिचारनिरूपकाधिकरणमात्रहत्निधर्मे साध्यवदहत्नित्वत्वानवच्छेदभावस्य हेतुत्वनहत्नित्वात्क्वापि व्यभिचारइत्यर्थः
ननु तत्र व्याप्तिरिति एतद्रूपभिन्नमित्यादौ एतद्रूपव्याप्तित्वे साध्यवदहत्नित्वाभावस्यामप्रसिद्धत्वात्तस्य वसत्त्वादित्यादियोज्य ननु
तद्व्याप्तित्वं नहत्निरसाधारणो धर्मस्तदात्म्येन तद्रूपादिरेव तस्य च विशेषणतयावहत्निमत्त्वमत आह तदन्यान्यत्वइति अस्य

भेदस्वरूपत्वात्तस्यालाभं तन्निर्दिष्टमपि तस्य किंतु पर्यवसन्नमतः आह तत्प्रकारकेति व्यभिचारनिरूपकाधिकरणमात्र
वृत्तित्वे यो धर्मः तत्तद्रूपत्वादिस्तत्प्रकारकेत्यर्थः विशिष्टत्वादीनां विशेषणत्वे येव हेतोरित्यर्थः तत्फलमभिमिति नन्वत्र विशे-
षणतया साध्यवद्वृत्तित्वस्य गगनादौ तदभावस्य च गगनाभावादौ च प्रसिद्धत्वात् किमियता मन्वयोगेनेति चेन्मैवं विशे-
षणतया हेतुमद्वृत्तौ वर्तमानस्य साध्यवद्वृत्तित्वस्य तत्पदेन परामर्शात् हेत्वधिकरणे तदवच्छिन्नाभावान्वयेनैव व्यभि-
चारनिरासात् मिश्रव्याख्यानमाह केचिदिति नन्वयन्तासेनेति असमानाधिकरणेनात्रत्यस्य नञः साध्यपदार्थेऽ-
न्वयनात् तदभावव्याप्यत्वरूपविरोधस्य केवलान्वयिन्यसंभवादाह साध्यसामान्येनेति ननु धूमसमानाधिकरणस्य
गगनादेर्वह्निसामानाधिकरण्याभावस्याभावादतिव्याप्तिरत आह साध्यसामान्येत्यादि यत्र साध्यसामान्याधिकरण्याभा-
वस्तत्र यत्सामानाधिकरण्याभाव इति व्यापकत्वं वक्तव्यं तन्न लभ्यं इत्यर्थः तेन धूमसामानाधिकरण्याभाववत्त्वयोगो-
लकत्वादौ वह्निसामानाधिकरण्याभावो नास्तीति न दोषः ननु पर्वतीयवह्निसामानाधिकरण्याभावो धूमसामानाधिक-
रण्याभावव्यापकस्तस्यैवमतिव्याप्तिरत आह सामान्येति तथा च धूमसामानाधिकरण्याभाववत्त्वयोगोलकत्वादौ वह्नि-
सामानाधिकरण्यसामान्याभावो नास्ति अयोगोलकीयवह्निसामानाधिकरण्यस्य तत्र सत्त्वादिति भावः ननु तत्तद्व्य-
क्तित्वविशिष्टवह्निसामान्याभाव उक्तसामान्येऽवच्छेदकधर्माभावस्तत्र व्याप्यस्येवेति दोषस्तावदस्त्य किंच धूमसामा-

ऊँ. ८०
80

नाधिकरण्याभाववन्निष्ठात्यंताभावप्रतियोगितानवच्छेदकस्याभावत्वप्रमेयत्वादेरुक्तसामान्याभावेसत्वादितिचेन्नैवं
साध्यसामानाधिकरण्यत्वावच्छिन्नप्रतियोगिताकाभावत्वेसाध्यसामानाधिकरण्याभावव्यापकतावच्छेदकमित्यर्थात् सा
ध्यपदेसाध्यतावच्छेदकावच्छेदकावच्छिन्नपरं तेनविशिष्टसत्तावान्जातिरित्यत्रजातिसामानाधिकरण्याभावस्यजातिसामा-
नाधिकरण्याभाववतिगुणेजातिसामानाधिकरण्याभावस्यासत्वात् एवंहेतुपदेहेतुतावच्छेदकावच्छिन्नहेतुपरमेतेन
गुणत्वविशिष्टसत्वादित्यत्रसत्तासामानाधिकरण्याभाववतिद्रव्यत्वसामानाधिकरण्याभावाव्यापकत्वेपिनाव्याप्तिः गुण
त्वाद्यवच्छिन्नविशिष्टसत्तात्वावच्छिन्नसामानाधिकरण्याभावसत्वात् परंत्वेति हेतुसामानाधिकरण्यमित्यर्थः साध्यसामा
नाधिकरण्येसाध्यतावच्छेदकसंबंधेनसाध्यवत्वविवक्षायाः फलमाह तेनसमवायेनेति अन्यथापृथिवीत्वघटादिसत्वा
तिव्याप्तिः अत्रसमवायेनपृथिवीत्वेसाध्ये कालिकेनघटोहेतुः संबंधसामान्येपृथिवीत्ववद्वृत्तिहेतुमत्ताभावोस्यहेत्वादेव
प्रसिद्धः तत्रचहेतुसामानाधिकरण्याभावसत्वात् विवक्षायांतुसमवायेनपृथिवीत्ववतिकालिकेनावर्तमानस्यघट
मध्यस्योक्तसामानाधिकरण्याभाववत्वात्तत्रचहेतुसामानाधिकरण्याभावस्यासत्वान्नदोषः कालेतस्यहेतुसमानाधिकर
णत्वात् तेनैवहेतुतावच्छेदकसंबंधेनहेतुमत्वनिवेशस्यफलमाह द्रव्यत्वादेश्चेति इयंसत्ताद्गुणत्वाद्धेतुत्वेत्यर्थः अयोहेतुर्व्यभि
चारीद्वितीयोविशिष्टइतिविशेषः अत्रसमवायेनद्रव्यत्ववतिमहाकालेकालिकेनहेतुमत्वात्रस्यहेतुत्वात्सामानाधिकर

ण्याभावस्याहेतावेव प्रसिद्धेः तत्र च हेतुसामानाधिकरण्याभावस्यापि सत्त्वादतिव्याप्तिः विवक्षायां तु काले समवायेन वह्नित्वा
भावस्य गुणत्वकर्मत्वयोः प्रसिद्धत्वान्न च वह्नित्वसामानाधिकरण्याभावस्याभावान्न दोषः हेतुसामानाधिकरण्यघटकहेत्वधि
करणत्वे हेत्वधिकरणत्वविवक्षायाः फलमाह नैवेति स्पंदत्वादेर्हेतावपि नातिप्रसंग इत्यन्वयः वह्निमानेतद्रूपादित्यादौ सं
योगेन वह्निमति समवायेन वह्नित्वाभावरूपस्य साध्यसाध्यसामानाधिकरण्याभावस्य कालपरिमाणे स्पंदत्वादौ च सत्त्वात्
कालिकसंबंधेन एतद्रूपवति काले हेतुतावच्छेदकसमवायेन वह्नित्वरूपहेतुसामानाधिकरण्यसत्त्वेन वतत्र तदभावसत्त्वा
त् अव्याप्तिः विवक्षायां तु कालस्य हेतुतावच्छेदकसमवायसंबंधेन हेत्वधिकरणत्वाभावान्न दोषः तत्रैव हेतुतावच्छेदकसंबं
धेन वह्नित्वनिवेशस्य फलमाह समवायेनेति समवायेनैतद्रूपाधिकरणे पर्वतादौ घटादेः संयोगेन वह्नितावपि नातिप्रसंग इ
त्यन्वयः उक्तसाध्यसामानाधिकरण्याववति घटादौ समवायेनैतद्रूपाधिकरणे पर्वतादौ संयोगेन वह्नित्वरूपहेतुसामा
नाधिकरण्यसत्त्वात्तदभावो नास्तीत्यव्याप्तिः विवक्षायां तु तत्र घटादेः समवायेन वह्नित्वाभावरूपस्य हेतुसामानाधिकरण्या
भावस्य सत्त्वान्न दोषः तद्भिन्नमित्यस्य सरसत्त्व एतद्रूपभिन्ने गुणत्वादित्यादावतिव्याप्तिः एतद्रूपभेदवति समवायेन वह्नित्वस्य
समवेतपदार्थ एव प्रसिद्ध एतद्रूपमात्रसमवेतस्याप्रसिद्धेः तस्य च समवायेन वह्नित्वाभावाद्धेतुसामानाधिकरण्याभाव
स्याविरूपकत्वादिति केचित् वाच्यत्वादिसाध्यके वाच्यत्वत्ववह्नित्वत्वावच्छिन्नाभावाप्रसिद्धेः लाघवेन वह्नित्वस्यैवावच्छेद

ओं० कत्वादित्यत्राप्तिरित्यन्ये स्वोक्तार्थे मूलोक्तदोषानवकाशमाह यथाश्रुतमिति ननु साध्याधिकरणाहत्तित्वमेव लक्ष
णं कर्तुरभिमते आकाशादौ प्रसिद्धमित्यस्वारस्यात् तत्कथं तदनधिकरणाहत्तित्वमुपन्यस्यते मूले नेत्यत आह यथा
८८ संभवमिति तथा च संभवि मात्रे विकल्प्यते न तु तत्सम्मतमेवेत्यर्थः अप्रतियोगिपदेनेति तथा च धूमसमानाधिकर
41 णात्यन्ताभावप्रतियोगित्वस्य प्रत्येकं वह्नौ सत्त्वेऽपि वह्नित्वस्य तत्प्रतियोगितानवच्छेदकत्वान्न दोषः तत्त्वं च प्रतियोगितावच्
छेदकतापर्याप्त्यनधिकरणत्वमित्यर्थः इत्यनादेरीति मूले कपिसंयोगाभावे साध्ये इत्यर्थः संयोगेन साध्ये न दोषः
संयोगसामान्याभावस्य द्रव्यप्राचीनेरत्वपगमात् ननु प्रतियोग्यनधिकरणहेत्वधिकरणाहत्तित्वरूपे प्रतियोगिवि
रोधिते मूलोक्तदोषानवकाश इत्यत आह प्रतियोगिण्यपीति हेत्वधिकरणे निरवच्छिन्नहत्तित्वरूपेव्याप्यहत्तित्वे मू
लोक्तदोषानवतारादाह स्वसमानेति तथा सतीति अधिकरणे ह्युपपन्नाविर्त्यर्थः अभाव एवेति अधिकरणातिः
रिक्त इत्यर्थः अधिकरणानामननुगतत्वादनुगताभावप्रतीत्यर्थमतिरिक्ताभावस्वीकारः अधिकरणभेदादभावभेदे
त्वं न नुगतत्वमस्मादतिरिक्ताभावस्वीकारे प्रमाणाभावात् नेत्वक्तसत्त्वं संयोगाभावस्य द्रव्ये प्रतियोगिसामानाधिकर
ण्ये गुणेवत्तदसामानाधिकरण्यमिति विरुद्धधर्मानुपपन्नेस्तद्ध्यासादेवभेदः स्यादितानोवानहुद्दयपवि संयोगाभावा
सत्यादिना प्रतियोगिसमानाधिकरण्यपाबेह प्रतियोग्यधिकरणीभूतेति अव्याप्यहत्तित्वमावेह साधिकरणीभू

तेति स्वपदे संयोगाभावपदं द्रव्यत्वविशिष्टात्यन्ताभावः संयोगरूपः तत्प्रतियोगित्वमित्यर्थः प्रतियोगिसमानाधिकरणेत्य
त्यावच्छेद् प्रतियोग्यनधिकरणभूतेति व्याप्यवृत्तित्वावच्छेद् स्वाधिकरणीभूतेति गुणनिष्ठात्यन्ताभावो घटाद्यभावः
संयोगस्याभावस्य तत्रासत्वात् तदप्रतियोगित्वे संयोगाभावस्यापि अविरोधादिति गगनाभावादौ संयोगाधिक
रणद्रव्यवृत्तित्वस्य संयोगानधिकरणगुणादिवृत्तित्वस्य च दर्शनादित्यर्थः प्रतियोगिनि ताहशप्रतियोगितावच्छिन्ना
त्वविरुद्धेन व्याप्तित्याह सामान्यतश्चेति तथाव्यतिरेकेऽसमन्वयः स्वसमानाधिकरणात्यन्ताभावप्रतियोगिसाध्यवान्य
स्यापत्रयत्पदार्थस्य साधनस्य साध्यवत्तासहाधिकरणत्वमेव संबंधः तथा च साध्यवान् यदधिकरणमित्यर्थः ननु यस्मि
तिष्ठत्यर्थस्य साध्येनापि सममेव संबंधः समसंबंधिकत्वात् सर्वत्र तत्र व्याप्तिनिरूपकत्वमेव स्यात्तमाशङ्क्य पक्षादेव व्याप्तिमित्य
तत्राह साध्यसाधनयोरपीति सामानाधिकरण्येन व्याप्तिघटितत्वमितिभावः वह्निधूमसंबंधिनोर्व्याप्तिनिरूप्य:
त्वाभावाद्यावच्छेद साध्यत्वसाधनत्वेऽपि व्याप्तिप्रतियोगित्वसाध्यत्वे तदनुयोगित्वे च साधनत्वमिति भवति धर्मयोर्व्याप्ति
निरूप्यत्वमित्यर्थः यत्रेत्रमेवेति ननु साध्यत्वसाधनत्वाभ्यां तथा च यत्सामानाधिकरण्यात्यन्ताभावाप्रतियोगिय
द्वृत्तेन समं सामानाधिकरण्यमिति वर्णयंवसानानात्मत्वाप्तिप्रवेशाऽप्रसक्त्यर्थः यद्रूपावच्छिन्नेन भवतीति यत्पदे वह्नित्वा
दिपरे ननु वह्नित्वावच्छिन्नस्य पर्वतीयवह्न्यादिधूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वमस्त्येव

ॐ
८२

पर्वतीयवह्निमन्महानसमित्यादिप्रतीतेः सैवं हेतुसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकतापर्या
प्त्यवच्छेदकतापर्याप्त्यनवच्छेदकं तद्वह्नित्वसामानाधिकरण्यं सविवक्षितत्वात् तत्र हि प्रतियोगितावच्छेदकता
महानसीयवह्नौ वपर्याप्ता प्रतियोगितावच्छेदकतानमहानसीयत्ववह्नित्वे चेति वह्नित्वसामान्यपर्याप्त्यनवच्छेदकत्वस
त्वात् वह्नित्वावच्छिन्नो वह्निरिति वह्नित्वेन प्रतियोगितावच्छेदकतावच्छेदकत्वपर्याप्त्यधिकरणत्वमित्यर्थः अयोगो
लकेन धूमवदिति प्रतीत्या धूमत्ववह्निसमानाधिकरणात्यन्ताभावकूटप्रतियोगितावच्छेदकमेवेत्यत आह व्याप्तिविरहाद
व्याप्तिपरत्वेन मूले यावद्वह्नि यत्त्वेति प्रत्येकमिति अमिलिताऽत्यर्थः वह्नित्वसामान्येति तथा च तत्तद्वह्नित्वावच्छि
न्नभेदसमुदायादर्थलिङ्गको वह्नित्वावच्छिन्नप्रतियोगिताको भेदो नास्त्येव विशेषभेदानां प्रतियोगितावच्छेदकेऽभवत्र
वद्वह्नित्वावच्छिन्नो वह्निरित्यव्याप्तिरित्यर्थः ननु साधनवैयधिकरण्यानधिकरणं यत्साध्यं तत्सामानाधिकरण्यमेवा
स्तु किं साधनसमानाधिकरणवैयधिकरण्येनेत्याशङ्कायां प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेरित्यग्रिममूलानुरोधादाह
तदनधिकरणेति ननु वाच्यत्वे प्रमेयत्वादित्यत्र यत्किंचित्साधनसमानाधिकरणभिन्नवृत्तित्वाप्रसिद्धमेवेत्यव्याप्तिरित्यत आ
ह अतिप्रसञ्जकं चेति इत्यनधिकरणाय यत्किंचित्पृथिवीत्वजलत्वादिद्दीनिनाभावस्य पृथिवीत्वसमानात् यत्र समा
नाधिकरणपददानेऽपि तद्दोषतादवस्थ्यादाह अतिप्रसञ्जकं चेति यद्वा तदधिकरणावृत्तित्वपर्यवसितवैयधिकरण्यमाधा

रणेऽभावयति अतिप्रसंजकं चेति अत इति तथा च तादृशजलत्वानधिकरणे वृत्तित्वाभावस्य पृथिवीत्वे सत्त्वात्तत्रातिप्रसंग
इत्यर्थः धूमोदयपीति समानाधिकरणे यद्द्रव्यत्वादीत्यन्वयः तदनधिकरणे गुणादौ वृत्तित्वेनास्तीत्यतिव्याप्तिरित्यर्थः
ननु साधनतावच्छेदकसंबंधेन साधनाधिकरणे येन संबंधेन यस्य वृत्तित्वं तेन संबंधेन तत्सामानाधिकरणे साध्यतावच्छेद
कसंबंधेन यद्वृत्तित्वं तदभावो वात्र वैयधिकरण्ये वाच्यम् अन्यथा तादृशाधर्मीनधिकरणे इदं कालिकेन यद्वृत्तित्वं तदभा
वस्य धूमेऽप्यसत्त्वादव्याप्तेः तथा च गुणादौ संयोगेन वृत्तित्वाप्रसिद्धेरेव नातिप्रसंग इति चेन्न तथाप्यादिपदोपात्तस्य साध
नसमानाधिकरणसंबंधनादेरनधिकरणमादाय तत्त्वोऽलभ्यात् केचित्तु समवायेन धूमस्य साध्यतायामयमतिप्रसंगः
द्रव्यत्वानधिकरणे गुणादौ समवायेन वृत्तित्वस्य प्रसिद्धत्वात् तदभावस्यापि धूमे सुलभत्वादित्याहुः पृथिवीत्वादौति च
टत्वानधिकरणे पटादौ पटत्वानधिकरणे घटादौ च द्रव्यत्वस्य सत्त्वात् इयं पृथिवीत्वादित्यादावव्याप्तिरित्यर्थः ननु त
दनधिकरणमात्रवृत्तित्वं विवक्षितमिति न च तद्द्रव्यत्वादौ घटत्वाद्यधिकरणेऽपि सत्त्वादित्यत आह तदनधिकरणमात्रेति
घटरूपस्य घटत्वानधिकरणमात्रवृत्तित्वादेव पटरूपादेरपीति रूपवान् पृथिवीत्वादित्यादावव्याप्तिरित्यर्थः तादृशेति
साधनसमानाधिकरणेत्यर्थः न हीति यदवच्छिन्नं साध्यतावच्छेदकावच्छिन्नं नास्ति तद्धर्मानधिकरणमात्रवृत्तित्वस्याव
च्छेदके साध्यतावच्छेदके स्यात् घटत्वावच्छिन्नघटरूपत्वावच्छिन्नमस्त्येव तथा च पदेत्येकघटादिरूपाणां पटत्वाद्यनधिक

ॐ
पञ्च
67

रणमात्रवृत्तित्वेपि साध्यतावच्छेदकस्य रूपवत्त्वस्य पृथिवीत्वसमानाधिकरणमात्रवृत्तितानवच्छेदकतया नातिव्याप्तिरित्यर्थः प्रति
व्याप्तिं निरस्यति धूमवत्त्वादिकं त्विति तदनतीति साधनसमानाधिकरणधर्मानधिकरणमात्रवृत्तितान्यवृत्तित्वमित्यर्थः
अन्यूनवृत्तित्वरूपेणानवच्छेदकत्वे प्रमेयवान्धूमादित्यादौ साधनसमानाधिकरणपर्वतत्वानधिकरणमात्रमहानसवृत्तित्वे ह्रदा
दौ प्रसिद्धे तदेपदत्वया प्रमेयत्वस्य साध्यतावच्छेदकस्यान्यूनवृत्तित्वरूपावच्छेदकताया असम्भवादनवच्छेदकताभावादव्याप्तिरिति तत्
त्परित्यागः सैनेति तच्छून्यधर्मावृत्तित्वमित्यत्र धर्मपदप्रवेशेनेत्यर्थः धर्मपदस्य वृत्तिमत्परतया गगनादेश्चा ऽ तथात्वात्
गगनादिवृत्तित्वेपीति तथा चोक्तवृत्तिताभावरूपावच्छेदकताभावादनवच्छेदकत्वमस्त्येव इयत्वस्य साध्यतावच्छेदकस्ये
त्यतिव्याप्तिरित्यर्थः ननु प्रयोगोलकीयवह्नावपि कालिकेन धूमवत्त्वस्य वृत्तित्वादनवच्छेदनवच्छेदकतापत्तेरतिप्रसंगस्य
वारणाय साधनसमानाधिकरणमात्रवृत्तितच्छून्यधर्मे साध्यतावच्छेदकताघटकसंबंधेन यद्वृत्तित्वं तदभावो वाच्यः त
था च इयं प्रमेयत्वादित्यत्र साधनसमानाधिकरणगुणत्वानधिकरणमात्रवृत्तितान्ये सामान्यादौ साध्यतावच्छेदकताघट
कसंबंधेन समवायेन वृत्तिताप्रसिद्ध्या साधनसमानाधिकरणपर्वतत्वानधिकरणमात्रवृत्तितान्ये घटादौ समवायेनावृत्ति
ताभाववत्ताघटत्वादेरवच्छेदकत्वाद्द्रव्यत्वस्यानवच्छेदकत्वमतादित्यव्याप्तितादवस्थ्यमिति चेत्सत्यम् अनवच्छेदकांते च
साध्यतावच्छेदके तादृशवृत्तिताशून्यधर्मवृत्तित्वस्य विवक्षितत्वात् तस्य च द्रव्यत्वे ऽसंभवात् साधनसमानाधिकरणे

यद्गुणत्वेनतदनधिकरणमात्रवृत्तितायमेघ्नन्यधर्मस्यसंयोगेनवृत्तिमत्वोऽप्रसिद्धत्वात् धर्मपदेनसाध्यतावच्छेदकसंबंधेन
वृत्तिमत्वोविवक्षितत्वात् अन्यथागगनादेरपिकालिकेनवृत्तितादतिव्याप्तेर्दुर्वारत्वात् नचगगनेशब्दादित्वतादात्म्येन
गगनेसाध्येऽव्याप्तिः तादात्म्येनवृत्तित्वाप्रसिद्धेरितिवाच्यं साधनसमानाधिकरणद्रव्यत्वानधिकरणमात्रवृत्तित्वाघ्नत्वेवृ
त्तिमत्त्वघटादौसाध्यतावच्छेदकस्यगगनत्वस्यावृत्तेः अप्रसिद्धतादृशधर्मानधिकरणमात्रवृत्तित्वघ्नन्यत्वस्साध्यतावच्छेदकं
संबंधेनवृत्तित्वोभयाभाववत्त्वस्याश्रयसामान्यकत्वमवच्छेदकत्वंदर्यैतेस्मिवद्रव्यत्वाश्रयेसर्वत्रोक्तोभयाभावसत्त्वादित्याद्वः
वक्ष्यमाणप्रयोजनादाह वस्तुतस्त्विति तादृशेति साधनसामानाधिकरणधर्मानधिकरणमात्रवृत्तिः स्वावच्छिन्ना
धिकरणतायस्यतत्वमित्यर्थः स्वपदंसाध्यतावच्छेदकपरं उक्तविवक्षाफलमाह तेनेति समाद्रव्यत्वोभयवान् जातिम
त्त्वादित्यत्रव्याप्त्यवृत्तिधर्मः ५ साध्यतावच्छेदकः गुणकर्मान्यत्वविशिष्टसत्तावान् जातिमत्त्वादित्यत्रविशिष्टधर्मेऽ
तिविशेषः विरहप्रीति जातिसमानाधिकरणगुणत्वानधिकरणमात्रवृत्तिताधिकरणसत्त्वात्प्रथमेवृत्तित्वात्साध्यतावच्छेदा
कस्योभयत्वस्योभयत्वस्योभयत्वस्यानवच्छेदकत्वसत्त्वात्सर्वोक्तपदेऽतिव्याप्तिःस्यात् प्रकृतविवक्षायांतुगुणत्वानधिकरण
द्रव्यमात्रवृत्तित्वाडुभयत्वावच्छिन्नाधिकरणतायाः साधनसमानाधिकरणगुणमानधिकरणमात्रवृत्तित्वस्यावच्छिन्नाधिकर
णताकत्वाडुभयत्वस्यावच्छेदकत्वसत्त्वादनवच्छेदकत्वेनास्तिइतिनदोषः एवंविशिष्टसत्तावच्छिन्नाधिकरणताया अ

उ॰ ८४ 84

पिगुणत्वाभाववन्मात्रवृत्तित्वादवच्छेदकत्वमेवेत्यर्थः प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेरितिमूलोक्तदोषनिरासार्थमाह
नन्वव्यतिरेकित्वेनेति तद्वद्भेदप्रतियोगितावच्छेदकत्वे प्रमेयत्वादिकं तु न तथा प्रमेयत्ववदन्यस्याप्रसिद्धेः तथा च साधनस
मानाधिकरणाव्यतिरेकिधर्मवैयधिकरण्यानधिकरणत्वादिवाच्यं ननु धूमसमानाधिकरणो व्यतिरेकिधर्मः सत्तापि सा
वसंयोगेन धूमवत्तिसमवायेन वृत्तिः तथा च समवायेन सत्तानधिकरणे सामान्यादौ समवायसंबंधेन वृत्तित्वाभाववत्त्वरूपतद्वै
यधिकरणेव वर्त्तमानो यो भेदस्तत्प्रतियोगितावच्छेदकत्वस्य वाच्यत्वात् सत्तावच्छेदकस्य द्रव्यादित्रयेणास्त्येव सामान्यादिकं
तत्संयोगसमवायादीनां कस्यापि नाधिकरणमिति सत्ताया व्यतिरेकित्वाभावात् उक्तविवक्षायां गौरवादाह वस्तुतस्त्वि
ति तथा च यावत्त्वेन धर्मविशेषणं व्यापित्वस्यावच्छेदकविशेषणमित्यर्थः तदेव दर्शयति तथा चेति धर्मवत्तासामानाधि
करण्यमित्यन्वयः ननु साधनसमानाधिकरणमहानसत्वनिरूपितवैयधिकरण्यावच्छेदके पर्वतीयवह्नित्वे तद्वद्वह्नि
त्वादनतिरिक्तमिति वह्नित्वस्य तद्भिन्नत्वाभावादव्याप्तिरत आह अवच्छेदकत्वञ्चेति पर्याप्तिसंबंधेनावच्छेदकत्वाभावो वह्नि
त्वेप्यस्तीति भावः पर्याप्तिस्वरूपार्थमेव द्वितीयप्रकारोक्तेः एवं च पर्याप्त्यावच्छेदकत्वनिवेशे न दोषः तथा चेति साध
नसमानाधिकरणधर्मः साध्यं तस्य समवायेनाभाववति तद्भिन्ने च हेतोः सत्तानिरूपकवैयधिकरण्यद्वयं दृष्टमित्यर्थः मू
लस्यान्यतराभंगार्थमाह यत्तेनेति संबंधविशेषेणेति साधनाधिकरणवृत्तितावच्छेदकसंबंधेन स्वानधिकरणे साध्यता

उ॰ ८४
84

पिगुणत्वाभाववन्मात्रवृत्तित्वादवच्छेदकत्वमेवेत्यर्थः प्रमेयत्वादेर्वैयधिकरण्याप्रसिद्धेरितिमन्दोक्तदोषनिरासार्थमाह
नन्वयव्यतिरेकित्वेनेति तत्त्वभेदप्रतियोगितावच्छेदकत्वे प्रमेयत्वादिकं तु न तथा प्रमेयत्ववद्भेदस्याप्रसिद्धेः तथा च साधनस
मानाधिकरण्यव्यतिरेकिधर्मवैयधिकरण्यानधिकरणत्वादिवाच्यं ननु धूमसमानाधिकरणो व्यतिरेकिधर्मः सत्तापि सा
वसंयोगेन धूमवति समवायेन वृत्तिः तथा च समवायेन सत्तानधिकरणे सामान्यादौ समवायसंबंधेन वृत्तित्वाभावरूपतद्वै
यधिकरणवत्त्वेमानोयोभेदस्तत्प्रतियोगितावच्छेदकत्वस्य वाच्यत्वात् सत्तावच्छेदस्य द्रव्यादित्रयेणास्त्येव सामान्यादिकं
तु संयोगसमवायादीनां कस्यापि नाधिकरणमिति सत्ताया व्यतिरेकित्वाभावात् उक्तविवक्षायां गौरवादाह वस्तुतस्त्वि
ति तथा च यावत्त्वेन धर्मविशेषणं अपितु अवच्छेदकविशेषणमित्यर्थः तदेव दर्शयति तथा चेति धर्मवत्तासामानाधि
करण्यमित्यन्वयः ननु साधनसमानाधिकरणमहानसत्वनिरूपितवैयधिकरण्यावच्छेदके पर्वतीयवह्नित्वे तत्त्ववह्नि
त्वादनतिरिक्तमिति वह्नित्वस्य तद्भिन्नत्वाभावादव्याप्तिरत आह अवच्छेदकत्वस्येति पर्याप्तिसंबंधेनावच्छेदकत्वाभावो वह्नि
त्वेऽप्यस्तीति भावः पर्याप्तिस्वरूपार्थमेव द्वितीयप्रकारोक्तेः एवं च पर्याप्त्याऽवच्छेदकत्ववद्भेदनिवेशेऽपि न दोषः तथा चेति साध
नसमानाधिकरणधर्मः साध्यं तस्य समवायेनाऽभाववति तद्भिन्नत्वे हेतोः सत्ताभिन्नत्वे वैयधिकरण्यद्वयदुष्टमित्यर्थः स्व
लस्यान्यत्वतात्पर्यार्थमाह एतेनेति संबंधविशेषणेति साधनाधिकरणवृत्तितावच्छेदकसंबंधेन सत्त्वानधिकरणो साध्यता

वच्छेदकसंबंधेनहेतुमत्त्वमित्यर्थः आत्माश्रयेति साध्यनिरूपितव्याप्तिनिरूपकत्वे प्रवेशात् आत्माश्रयादिति धूमनिष्ठायाध
मनिरूपितव्याप्तेरपिलक्षणत्वात् तस्याप्यवह्निनिष्ठव्याप्तिनिरूपकत्वरूपव्यापकत्वेप्रवेशात् यदिधूमनिरूपितव्याप्तेर्व्याप
याधूमसामग्रीनिष्ठधूमनिरूपितव्यापकत्वेप्रवेशः धूमसामग्रीव्यापकत्वेचधूमनिष्ठधूमसामग्रीनिष्ठव्याप्तिनिरूपकत्वे
दात्माश्रयः यदिद्रव्यत्वादिनिष्ठं तदानवस्थेतिभावः अव्याप्यवृत्तावुपाधौ साध्यवन्निष्ठाभावप्रतियोगित्वादप्रतियोगि
गर्भलक्षणानव्याप्तिराह येऽत्रेति अव्याप्यवृत्तिरिति गुणवान् सत्त्वादित्यत्रसंयोगादित्यर्थः नातेति धूमवान्वह्नेरि
त्यत्रार्द्रेंधनादिरित्यर्थः गुणवत्त्वसत्त्वादित्यादौ द्रव्यत्वादेस्तथात्वेपियत्रसंभवस्तत्रसत्वेऽप्येवोपाधिः प्रकृतोपयुक्तोपाधि
मात्रस्यलक्षणत्वात् इत्याह अतएवेति व्यभिचारनिरूपकाधिकरणान्यतमप्रवेशे सर्वत्रसंभवतीत्याद्यः तद्वदिति आ
र्द्रेन्धनवह्नित्वप्रकारकप्रमाविषयताभावादिरूपो ऽत्रैवोपाधिः आर्द्रेंधनवतिसर्वत्रोक्ताभावसत्त्वात् नवतत्प्र
कारकप्रमाविशेष्यत्वमेवोच्यतामितिवाच्यं विशेष्यभेदेनतस्याननुगतत्वात् ननुयत्रतद्विशिष्टस्यउक्तोपाधेरभावः उ
क्तोपाधिर्घटस्वरूपमुभयत्वावच्छिन्नाभावस्यसाध्यवत्यपिवृत्तेरितितत्प्रतियोगित्वादुक्तोपाधेर्व्याप्तिरेवेत्याह धूमयीति उ
क्ताभावप्रतियोगित्वेऽतिरिक्तत्वेविवादात्संभवइत्युक्तम् परिहरति तदेति तथाचवह्नित्वादिवितद्वच्छेदकत्वादुपाधितावच्छेद
कस्यतद्वदिन्धनत्वप्रकारकप्रमाविशेष्यताभावत्वस्यधूमवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात्ताव्याप्तिरित्यर्थः प

वेवत्राईंयनमपिभवत्येतादृशं धूमवतितत्त्वावच्छिन्नाभावस्यासत्त्वात् वह्निमति च सत्त्वादिति तद्रूपेणाप्युपाधित्वमित्यर्थः
अं॰ दलद्वयेति साध्यवन्निष्ठाभावाप्रतियोगित्वे साधनवन्निष्ठाभावप्रतियोगित्वमित्येतद्रूपेत्यर्थः अनवस्थामिति वि
८५ रोधस्तदभावव्याप्यत्वे तत्प्रतियोगित्वव्याप्तिघटके तत्रापि विरोधघटकव्याप्त्यन्तरे प्रवेशादस्मैवरूपामित्यर्थः एकेत्या
८६ दिसूत्रणस्य प्रयोजनमाह तेनेति संयोगतदभावयोः सामानाधिकरण्येप्येकदेशावच्छेदेन तदभावात् प्रागभावध्वं
सयोश्चैककालावच्छेदप्रतियोगिसामानाधिकरण्याभावात्तदीयप्रतियोगितायां नाव्याप्तिरित्यर्थः एवं च यदवच्छेदे
नाभावस्तदवच्छेदेनाभावाधिकरणवृत्तित्वस्याभावः प्रतियोगित्वमित्यर्थः तेन गोत्वाभावेऽवच्छेदकानङ्गीकारात्तत्प्रतियो
गितायामव्याप्तिरिति केचित् व्याप्यवृत्त्यभावप्रतियोगितायामवच्छेदकेन निवेशप्रमेवेत्यस्य तद्वतीति यत्संबन्धावच्छि
न्नप्रतियोगिताकोऽभावो यत्रास्ति तत्तेन संबन्धेन तस्य वृत्तित्वे सहानवस्थानपदार्थः समवायेन वह्न्यभाववति महा
नसादौ समवायेन वह्निवृत्तित्वाभावात्तत्राव्याप्तिरित्यर्थः नन्वन्योन्याभावीयप्रतियोगितायामव्याप्तिः तादात्म्यावच्छिन्न
न्नप्रतियोगिताकभेदवर्जितादात्म्येन वृत्तित्वस्याप्रसिद्धेरत आह इत्येवेति वृत्तित्वं विहायाः संबन्धित्वमेवाभिधेये तादात्
म्यादिना वाच्यत्वेव प्रसिद्धमेवेति तदभावस्य तत्प्रतियोगिन्यपि सत्त्वादित्यर्थः सत्तायाइति समवायसंबन्धावच्छिन्नायां स॰
त्ताभावीयसत्तानिष्ठप्रतियोगितायामित्यर्थः तद्वतीति समवायेन सत्तावच्छिन्नाभाववत्सामान्यादेव तत्र समवायेन

हनिताप्रसिद्ध्यातदभावस्यदौर्लभ्यादितिभावः तादृशेति प्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसंबंधेयदधिकरणंतदवृ
त्त्यभावकत्वाभिधानेऽप्यर्थः भवीनचसमवायेनसत्तासंबंधेऽधिकरणेद्रव्यादौ समवायेनसत्तात्वावच्छिन्नाभावस्यावृत्तित्वासि
त्तिनाव्याप्तिरित्यर्थः ननुसत्ताभावनिष्ठायांसत्तात्मकाभावीयप्रतियोगितायामव्याप्तिः विशेषणताविशेषसंबंधेनस
त्ताभावात्मकप्रतियोगिसंबद्धमधिकरणंसामान्यादि तत्रसत्ताभावाभावस्यसत्तात्मकस्यविशेषणतासंबंधावच्छिन्नवृत्ति
त्वस्याप्रसिद्धत्वात् सत्ये अभावाभावस्यातिरिक्तत्वादितिकेचित् सप्तमपदार्थरूपाभावीयप्रतियोगितामेवलक्ष्यमित्यभि
प्रेत्यदूषणमाह अधिकरणेति संयोगेनसत्तात्वावच्छिन्नाभाववतिरूपितायांसत्तादिनिष्ठायां तत्रप्रतियोगितावच्छेदकेनसं
योगादिनाप्रतियोगिसत्तादिसंबद्धस्याप्रसिद्ध्यातदभावासिद्ध्यातदभावासिद्धेरित्यर्थः सिद्धांतेति प्रतियोगितावच्छेदक
संबंधसामान्ये यत्प्रतियोगिकत्वयदभाववद्वृत्तित्वोभयाभावस्तस्यतदभावप्रतियोगितेवाच्ये प्रकृतेपिविशेषणताविशे
षरूपोक्तप्रतियोगितावच्छेदसंबंधेसत्ताभावप्रतियोगिकत्वसत्वेपि सत्ताभावाभाववद्वृत्तित्वाभावाद्उभयाभावः सत्तावति
तदभावीयविशेषणतायाअवृत्तित्वादित्याह तत्रविमाणेपीति अपिरेवार्थे उक्तव्याप्तेरेवपरिहारोनतुघटत्वादौद्रव्यत्वा
भावप्रतियोगितापत्तेः द्रव्यत्वाभाववतिघटत्वस्याप्यभावात् नवान्योन्याभावेतिघटस्यघटभेदाभावरूपत्वाभावाद्व्याप्तिः
घटत्वस्यघटभेदाभावरूपत्वादव्याप्तिरित्यर्थः प्रकृतेति उक्तव्याप्तिलक्षणेघटत्वंयद्व्यापकत्वंतदुपयोगितामात्रप्रतियोगि

उ॰
८८
108

तासाध्यवत्त्वात् नोक्तव्याप्तिदोषः अत्यन्ताभावीयप्रतियोगितासाध्यवत्त्वव्यापकत्वघटकत्वात् अत्यन्ताभावपदेति अ
न्तपदवैयर्थ्यम् साध्यवन्निष्ठाभावाप्रतियोगित्वस्यैव लक्षणत्वाभावात् साध्यवन्निष्ठाभावविरहमित्रत्वे सतीति साधनत्ववन्नि
ष्ठाभावविरहत्वमुपाधित्वमितिदलद्वयस्यार्थः एतावतैव उपाधिलक्षणे निर्व्यूढे न त्वेवम् धूमवन्निष्ठध्वंसप्रतियोगि
त्वआर्द्रेन्धनोदकेरुपाधित्वेन स्यादिति वह्नौ धूमस्येवाप्यनौपाधिकः स्यादिति व्याप्तिलक्षणमतिव्याप्तं स्यादत आह सर्वत्र
नित्यस्येति अयोगोलकादिरूपव्यभिचारनिरूपकाधिकरणे तदन्यत्वादेरुपाधित्वसंभवात् साध्यनुपाधित्वेपि नोक्त
दोषइत्यर्थः ननु नित्यस्यापि विशिष्टाभावउभयत्वावच्छिन्नाभावस्य साध्यवत्त्वेव उक्तदोषतादवस्थ्यमित्यत आह नित्यसाधार
णेति साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकेघटादेर्वाच्यत्वादयः पिण्डाहमितिवादिना आर्द्रेन्धनादेरनित्यस्याप्युपाधित्वमि
त्यर्थः यद्यप्येवमार्द्रेन्धनत्वादिनाप्युपाधित्वेसंभवति आर्द्रेन्धनत्वस्य धूमवद्वृत्तिध्वंसप्रतियोगितानवच्छेदकत्वसत्वात् ध्वंसप्रा
गभावयोस्तु व्यक्तिमात्रप्रतियोगिकत्वेन सामान्यावच्छिन्नप्रतियोगिताकत्वानंगीकारात् तथाप्यनित्यसाधारणेनोपाधि
त्वेनव्यक्तित्वादिनोपाधिस्थलेनसंभवतीत्येतदुक्तं केचित्तु इदमव्याप्यवृत्तीतिपदेआर्द्रेन्धनत्वादिकोपाधित्वेसंभवतीतिन
त्यानत्याहुः भेदीयप्रतियोगित्वादनुपाधितापत्तिः अन्तोः त्यन्तपदे संसर्गाभावपरतया सार्थकं यद्यपि नित्यसंसर्गाभाव
वत्यत्यन्ताभाववत्त्वे तथापि तत्यापि भेदसंसर्गाभावपदेनैववारणात्रित्यत्वनिवेशप्रयोजनाभावात्संसर्गाभावपरतयेत्य

२४

ननु धूमोऽर्द्रेन्धनोद्भूमवह्निभेदप्रतियोगितेऽपि धूमोऽर्द्रेन्धनेनत्वेत्यस्यैतरत्वेनार्द्रेन्धनस्योपाधित्वसंभवात् संसर्गाभावनिवे
शनेवयर्थमेव नित्यसाधारणरूपावच्छिन्नपदेवेति ग्रैष्यस्वारस्येन साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्यैव
साध्यव्यापकत्वस्य लक्षणत्वात् उक्तान्यतरत्वस्यापि धूमवह्निभेदप्रतियोगितानवच्छेदकत्वात् मैवं प्रतियोगित्वग-
र्भस्यैव लक्षणस्याभिमतत्वात् नित्यसाधारण्यादेर्वाशङ्केनावसरसम्भवनात् न च विशिष्टाभावस्योभयाभावे चादायासं
भव इति वाच्यं तयोरनैगिकात्वात् अन्यत्वसंसर्गाभावपदे प्रतियोगिव्यधिकरणत्वस्याभावविशेषणमिति स्फोरणार्थम्
अत उक्ताभाववारणमित्याहुः प्रतियोगितापदस्य पारिभाषिकत्वेन समाधत्ते विरहपदस्येति तज्ज्ञानेति तत्पदमभाव
परे तथा च घटान्योन्याभावज्ञानप्रतिबन्धकं तादात्म्येन घटज्ञाने घटात्यन्ताभावज्ञानप्रतिबन्धकं च संयोगेन घटज्ञाना-
मिति तद्विषयत्वस्य घटे समवायाद्यावृत्तेरित्यर्थः तदेव दर्शयति प्रतिबध्नातिहीति तथा च घटस्य घटभेदात्यन्ताभावेऽपि न त-
तिरित्यर्थः ननु कारणीभूताभावप्रतियोगित्वरूपप्रतिबन्धकत्वनिवेशादात्माश्रय इत्यत आह प्रतिबन्धकत्वे चेति ग्रन्थप्रति-
योगितालक्षणे कालभेदेन घटतदभावज्ञानयोरेकत्वान्मानिमत्वादेककालेति एवमनाहार्यत्वं दोषविशेषाजन्यत्वं वा
भावज्ञानेन निवेश्यम् कायव्यूहस्थले एकत्वान्मानिवेशिभिन्नदेहावच्छेदेन तदुभयज्ञानयोः प्रामाणिकत्वेनैकशरीरावच्छेदे
नेत्यपि वाच्यम् भूतावेशस्थले भूततदविभूतभूतात्मनोरेकशरीरावच्छेदेन तदुभयज्ञानसत्त्वात्मकत्वान्निवेश्यमेवेति भावः

ॐ ८७

८७

अन्योन्याभावप्रतियोगितावच्छेदकेऽतिव्याप्तिं निरस्यति अभावपदस्येति तथा च घटत्वस्य घटभेदाभावरूपत्वेऽपि घटभेदस्य
घटत्वनिष्ठप्रतियोगितानिरूपितानुयोगिताकत्वाभावान्नातिव्याप्तिरित्यर्थः संसर्गाभावावच्छिन्नमेव प्रकारमाह वस्तुतस्त्वि
ति एकसंबंधेति संयोगसंबंधावच्छिन्नप्रतियोगितामवप्रतियोगितानवच्छेदकमप्यार्द्रेन्धनत्वं तादृशसमवायसंबंधावच्छि
न्नप्रतियोगितावच्छेदकाभावप्रतियोगितावच्छेदकं भवत्येव अतः संयोगसंबंधावच्छिन्नायाधूमवन्निष्ठाभावप्रतियोगिताया
अनवच्छेदके यत् वह्निमन्निष्ठायास्तादृशप्रतियोगितायाश्चावच्छेदके न तद्धर्मवत्त्वं उपाधित्वं वाच्यमित्यर्थः यत्संबंधेनवि
वत्त्वायोग्यवह्निमान् धूमादित्यादौ गुणत्वं न उपाधिः स्यात् समवायावच्छिन्नायाधूमवन्निष्ठाभावप्रतियोगितायाश्चानवच्छेदके सं
योगावच्छिन्नायाधूमवन्निष्ठाभावप्रतिप्रतियोगितायाश्चावच्छेदके यद्गुणत्वं तद्वत्त्वात् न च संबंधसामान्येन साध्यवन्निष्ठाभाव
प्रतियोगितानवच्छेदकत्वं निवेश्यमिति वाच्यं धूमवान् वह्नेरित्यादावव्याप्यत्वोपाधिकत्वापत्तेः आर्द्रेन्धनत्वस्य अयोगोलकान्यत्वस्य सं
योगेन वह्निमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात् न च तत्र भेदत्वमेव लाघवात् प्रतियोगितावच्छेदकं न त्वयोगोलका
न्यतत्त्वमिति वाच्यं जन्यमात्रस्य कालोपाधितया तेः अयोगोलकान्यताभावस्यापि धूमवति कालिकेन सत्त्वात् न च दैशिकेन सा
ध्यवन्निष्ठत्वमभावे निवेश्यमिति वाच्यम् विषयतासंबंधावच्छिन्नप्रतियोगिताकस्य अयोगोलकान्यताभावस्य धूमवति स
त्त्वात् अप्रसिद्धतावच्छेदकेनान्वयेनान्तरमेव विहायेति सवेति अक्षरसमस्त्वित्यर्थः सर्वेति संयोगावच्छिन्नरूपाभावीयत्वात्

संयोगेन रूपवज्ज्ञाने प्रतिबन्धकत्वे इत्यादिरीत्या रूपनिष्ठप्रतियोगितायां लक्षणे नेयम् यत्र च विषयविशेषे कस्यापि व्यधिकरण
सम्बन्धेन प्रतियोगिभ्रमो न जातस्तत्र प्रतिबन्धकताकल्पनात् तन्निष्ठप्रतियोगितायामव्याप्तिः समानाधिकरणसम्बन्धावच्छिन्ना
भावस्थले तु तेन सम्बन्धेन प्रतियोगिज्ञाने भ्रमात्मके भागवत्तयोपिनिष्ठैवास्त्वलभेम वेति तत्परित्यागः व्यधिकरणसम्बन्धेन प्र
तियोगिज्ञानस्य तत्र प्रमात्वनियमात्र भागवत्तादिज्ञानमादाय प्रसिद्धस्तस्य प्रमात्वनियमादित्यर्थः ननु यद्धर्मावच्छेदेन यादृश
भावज्ञानकालीनज्ञानीययत्प्रकारतासामान्ये तद्धर्मावच्छिन्नविशेष्यतानिरूपितत्वतत्सम्बन्धावच्छिन्नत्वोभयाभावस्तेन तद्रू
ज्ञाने तद्विरोधीति वाच्यम् तथा च नाप्रसिद्धिः व्यधिकरणसम्बन्धसंसर्गकप्रतियोगिप्रकारकभ्रमाभावस्थलेऽपि तत्सम्बन्धावच्छिन्न
प्रतियोगिताकाभावज्ञानकालीने समानाधिकरणसम्बन्धसंसर्गके तत्प्रकारकज्ञाने एतत्तः सार्वत्रिकमपि प्रसिद्धं तदीयत
त्प्रकारतासामान्ये यद्वत्तावच्छिन्नविशेष्यतानिरूपितत्वतत्सम्बन्धावच्छिन्नत्वोभयाभावस्य सुलभत्वादित्यत आह स्वाभा
वेति स्वसम्बन्धभिन्नाभावसम्बन्धितमित्यर्थः सम्बन्धस्यापि व्याप्तिवारितत्वादाह स्वाभावज्ञानेति स्वसम्बन्धभिन्नाभावज्ञानविषय
ते भवति च यदभावज्ञानविषयत्वे च स इत्यर्थः तथा चैतदपेक्षया स्वाभावज्ञानप्रतिबन्धकज्ञानविषयत्वस्य गौरवं प्रसक्तत्वात् प्र
तियोगितालक्षणं न क्षतिरिति भावः नन्वस्तु तदुक्तमिदमेव प्रतियोगित्वमित्यत आह स्वाभावेत्यादाविति तथा चात्र निविष्टसं
बन्धिते स्वरूपसम्बन्धविशेषत्वस्यैवाक्ये प्रतियोगित्वनिवेशो आत्माश्रयापत्तेः एवं च स्वरूपसम्बन्धविशेषत्वप्रतियोगित्व·

ऊँ.
८८

मस्त्वकिंतद्घटितो लाघवात् गुरुरूपतयेति भावः अभाववत्वेति इत्यादिघटकाभ्यो माभाववत्वमभाववत्वं एककालावच्छेदेनैकत्रवर्त्ति-
मानत्वाभाववत्त्वोक्तप्रतिबंधकत्वे उभयत्रापि प्रतियोगित्वप्रवेशादात्माश्रय इत्यर्थः ननु भावप्रकारकव्यवहारविषयत्वमे
वाभाववत्वादिकं वक्तव्यमित्यत आह तथापि विधेति केचित् वस्तुतस्तु प्रतियोगित्वे न व्यवहारविषयत्वमेव तदित्यत आह न
याविति धे यात्म्याध्यासे तत्र कर्मधारयेपामिहेत्तनिषेधेत न लभ्येतेत्यत आह यत्समानाधिकरणेति तथा च षष्ठीसमा
मासः समानाधिकरणपदस्य घटस्यार्थेन पाठकार्थलाभ इति भावः यत्समानाधिकरणेत्यादि वह्निसमानाधिकरणात्यन्ता
भावप्रतियोगितानवच्छेदकयत्किंचित्पदार्थधर्मस्य धूमसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वादतिव्याप्तेरतो
यावदिति तथा च तादृशस्याद्रेंधनत्वस्य यावदन्तर्गतस्य धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकत्वान्न दोष
द्वितीयेपि धूमसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य प्रमेयत्वादेर्वह्निसमानाधिकरणात्यन्ताभावप्रतियो-
गितानवच्छेदकत्वाद्व्याप्तिरतो यावदिति तथा च तादृशस्याद्रेंधनत्वस्य वह्निसमानाधिकरणात्यन्ताभावप्रतियोगि
तानवच्छेदकत्वान्न दोषः एकसंबंधेति ननु यत्संबंधावच्छिन्नायत्र प्रतियोगितान्तत्संबंधावच्छेदकत्वाभावान्न दोषः एक
संबंधेति ननु यत्संबंधावच्छिन्नायत्र प्रतियोगितातत्संबंधावच्छिन्नैव दलान्तरेपि प्रवेश्या तथा चाननुगमः इत्याशंक्य
यत्संबंधमध्याविशेषणेनापि निविष्टेवेति सर्वत्रैव निवेश्यमाशयेनाह विशेषणेति तथा च वह्निधूमप्रकारकप्रमाविशे

ध्यत्वादिकमेव घटकमिति भावः उक्तविवक्षाविरहे प्रथमे दोषमाह नेनेति प्रतियोगितावच्छेदकमात्रस्येति मात्रपदं
साकल्यपरं धूमवान् वह्नेरित्यादौ वह्निसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदके समवायेनार्द्रेन्धनाद्यभावस्य धूम
वत्त्वापि सत्त्वादित्यतिव्याप्तिरिति भावः द्वितीये तु यत्किंचित्संबन्धनिवेशेऽव्याप्तिरित्याह एकेति समवायेन वह्निसमानाधि-
करणाभावप्रतियोगितानवच्छेदकस्यापि रूपत्वादेः संयोगादिना धूमसामानाधिकरणाभावप्रतियोगितावच्छेदकत्वादि
त्यर्थः न च संबन्धानिवेश एव संबन्धसामान्येनानिवेश्य इति वाच्यं गुरुधर्मस्य कंबुग्रीवादिमत्त्वादि रहितेन गगनादेर्वा ना
ह्यप्रतियोगितानवच्छेदकस्य वह्निसामानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्यापि सत्त्वादतिव्याप्तेः प्रथममिति
व्याप्तिं परिहरति व्यभिचारिणीति प्रयोगोत्तरकं व्यभिचारनिरूपकाधिकरणे विशेषणताविशेषणेन तन्निष्ठाभावप्रति
योगितावच्छेदके धूमप्रकारकप्रमाविषमायत्वे तत्त्वविधविशेषणताविशेषावच्छिन्नप्रतियोगिताक धूमवन्निष्ठाभावप्रति
योगितावच्छेदकं न भवतीति नातिव्याप्तिरित्यर्थः द्वितीये तु लक्षणेन न दोषः विशेषणताविशेषेण वह्निसमानाधिकर
णाभावे प्रतियोगितानवच्छेदकस्योक्तप्रमाविषयत्वस्य वह्निसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वाभावात् धूम
प्रकारकप्रमाविषयत्वस्य वह्निमद्योगोत्तरकं निष्ठाभावप्रतियोगितावच्छेदकत्वात् प्रत्यासोगाभावघटितमपि निष्कर्षं द्व
यमाह वस्तुतस्त्विति भवति वह्निसमानाधिकरणसोगाभावप्रतियोगितावच्छेदकं यावदेव वह्निमावच्छिन्नसमाना

धिकरणान्योन्याभावप्रतियोगितावच्छेदकम् इतिलक्षणसमन्वयः वह्निसमानाधिकरणान्योन्याभावप्रतियोगितावः
डो. च्छेदकं तार्द्रेन्धनेधूमत्वावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं न भवति आर्द्रेन्धनवह्नेर्दस्यायोगोलके
८९ सत्वात् धूमवतीतत्वेसत्वादिति नातिव्याप्तिः द्वितीयेपि धूमवन्निष्ठान्योन्याभावप्रतियोगितानवच्छेदकस्यार्द्रेन्धनस्य वह्निस
89 मानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वेनासत्त्वीति नक्षतिभावः अन्योन्याभावीयप्रतियोगिताया स्वतादात्म्या
वच्छिन्नत्वनियमाद्व प्रतियोगितावच्छेदकसंबंधैक्यं न विवक्षणीयम् प्रयोजनाभावादितिपूर्वोपलक्षणालायवेविशेषः अत्रव
देति अवच्छेदकतावच्छेदकसंबंधैक्यमिहापिनिवेश्यमेव अन्यथा विषयतासंबंधेनायोगोलकभेदवत्त्वाने तद्भेदस्य धूम
वन्निवर्त्तमानस्य प्रतियोगितावच्छेदकत्वमयोगोलकभेदस्यापीत्यतिव्याप्तेः विवक्षितेत्वयोगोलकेभेदनिष्ठावह्निसमा
नाधिकरणान्योन्याभावप्रतियोगितावच्छेदकताविशेष्यताविशेषणताविशेषावच्छिन्नाधूमसमानाधिकरणान्योन्या
भावप्रतियोगितावच्छेदकताविषयतासंबंधावच्छिन्नेति न दोषः न च संयोगेन धूमवति विषयतासंबंधेनकस्याप्यवृत्ति
त्वात् तत्र भेदत्वेन भेदसामान्येमव प्रतियोगितावच्छेदकेन न योगोलकभेदइति वाच्यम् भेदांतरविषयकत्वानेवर्त्तमानस्ये
वायोगोलकभेदविषयकज्ञानेभेदस्य धूमवद्वृत्तित्वात् भेदमात्रस्य भेदवन्निष्ठान्योन्याभावप्रतियोगितावच्छेदकत्वानुपपत्ते
रयोगोलकभेदस्य प्रतियोगितायामावश्यकत्वात् न वावच्छेदकसंबंधैक्यपूर्वंत्रापिनिवेश्य अन्यथाऽयोगोलकभेदत्वविष

यकत्वानात्मेताभावस्यापेमवतिवर्तमानस्य प्रतियोगितावच्छेदकमपि गोलकभेदत्वमित्यतियोमरिति वाच्यम् तत्रला
घवेन भेदत्वेनैव प्रतियोगितावच्छेदकत्वात् अतोलाघवाभावान्कात्स्न्यनिकथवायंपाठः यावत्त्वस्य साध्यविशेषणत्वमेनि
राकरोति यावतां तेषामिति साध्यं यावतामव्यभिचारिभावतामव्यभिचारित्वामिति त्यर्थः दूषितमिति मूले हेतुमाह
केवलेति तथा च तदभावादिदमेव लक्षणमादिष्टमतमत आह साध्येति अव्याप्तिरित्यर्थः मूलोक्तदोषयोजनार्थं मूलत्वमते
ताद्रूप्यार्थेविकल्पमाह कात्स्न्यमित्यादि द्वितीयतृतीययोः स्वयमभिधाने सकलसाध्यसमवेतसाध्यनेकवत्त्वाभावादि
तिमूलानुरोधादाद्यमपि द्वेधा विकल्पयति आद्येइति साधनस्य कात्स्न्यमिति वह्न्यादेरित्यर्थः अन्यमेइति कृत्स्नसाधनसामाना
धिकरण्यं साध्याभिमतेत्यर्थः स्वयं दोषमाह व्याप्येति उक्तरीत्या साध्यनिष्ठत्वस्य वलाभादित्यर्थः ननु पक्षमोऽस्तु यावत्सा
नाधिकरण्यं साध्यतावच्छेदकत्वं विवक्षायां नोक्तदोषद्वयमित्यत आह पृथिवीति कृत्स्नसाधनेत्यस्य यथाश्रुतार्थकत्वे द्रव्यत्वस
त्वादित्यादौ न दोषः हेतोः कात्स्न्याभावात् अत्र साध्यस्य सामान्यतत्त्वापि न था पृथिवीत्वव्यापकजातित्वाश्रययावत्सामाना
धिकरण्यस्य पृथिवीत्वेसत्त्वादतिव्याप्तिरित्यर्थः अत्र व्यापकत्वं पृथिवीत्ववन्निष्ठभेदप्रतियोगितानवच्छेदकत्वं अवच्छेदक
ताघटकः समवायः अन्यथा पृथिवीनिष्ठप्रतियोगिनित्वाभावविषयीभूतस्य लघुधर्ममात्रस्य पृथिवीनिष्ठभेदप्रतियो
गितावच्छेदकत्वात् घटांशे वा तदवच्छेदकत्वं असमवेतगगनादावपि सत्त्वो जातौति समवेतपरं असमवेतसमवायेनट

थिवीत्वविशिष्टात्यन्ताभावप्रतियोगित्वमेवात्र व्यापकत्वं विशिष्टाभावादिवारणाय समवायादिगर्भप्रतियोगित्वे यधिकरण्य
मपि देयं तेन जलत्वविशिष्टमादिसाधारण्याज्जातीति पूर्वपदे वार्थं इत्याह । नचेति पृथिवीत्वसमानाधिकरणजातेरित्येव हेतुत्वरा
त्वेऽतिव्याप्तिरिति वाच्यम् सामानाधिकरण्यस्य विलक्षणत्वे सङ्केतत्वात पृथिवीत्वसामानाधिकरण्यविशिष्टद्रव्यत्वादेः पृथिवीमात्र
वृत्तित्वात् उपलक्षणत्वे च गौरवात् व्यापकत्वे पृथिवीत्वसामानाधिकरण्यस्यात्यन्ताभावविशेषणेन यो जातिविशेषणा
त्यन्ताभावेनैव यदर्थ्यं शङ्कानवकाशाच्च प्रथमे द्वितीये विकल्पं दूषयति अत एवेति उक्तातिव्याप्तेरेवेत्यर्थः साध्यस्य कालस्य
मिति स्वोक्तद्वितीयविकल्पे मूलसम्मतिं दर्शयन्नाह अथेति अत एवेति मूलस्य एकहेतुकाव्याप्तिपरत्वभ्रमं निरस्यति ए
कव्यक्तिसाध्यकेति मूलं तो परिहरति समव्याप्तेर्विशेषेति संख्यावान्परिमाणादित्यादावित्यर्थः एकत्वेति घटपरिमाणे
घटसंख्यासामानाधिकरण्याभावात् तयोः प्रतिव्यक्तिभिन्नत्वात् न च हेतुतिष्ठसामानाधिकरण्यनिरूपकत्वं यद्धर्मेण व्या
पकं तद्धर्मावच्छिन्नसामानाधिकरण्यं वाच्यम् अस्ति च घटसंख्यात्वेन परिमाणत्वसामानाधिकरण्यनिरूपकत्वम् अत आह
भावाच्चेति यत्र घटे तत्तद्व्यक्तिनिष्ठसामानाधिकरण्यनिरूपकत्वं घटमात्रस्य द्रव्यत्वसामानाधिकरण्यनिरूपकत्वा
दित्यतिव्याप्तिरित्यर्थः तृतीय इति सामान्याश्रयेणापरत्वाभावादेकमात्रवृत्तिसाध्यकेऽव्याप्ति वक्तव्यत्वे साध्यसमानाधि
करणेनावच्छेदेनासम्भवात्रायं भ्रान्तये दोष इति यथासम्भवमित्युक्ते तत्र तत्र वह्निमान् धूमादित्यादावव्याप्तिः वह्निसमाना

धिकरणानां यावंतो पर्वतत्वमहानसत्वादितामेकाश्रयाप्रसिद्धेः तृतीयेपि वह्न्याश्रयावृत्तित्वस्य कस्यचिदपि धूमे विरहादित
र्थः वह्निमान् सत्वादित्यादौ सत्वस्य वह्निमाश्रयावृत्तित्वात् अर्थपरिष्कारेति आभेदे तन्निष्ठत्वमेवादत्तमेवेत्यर्थः यथाश्रु
ते हेतुत्वसाध्यनाश्रयमेवेयत्सवसाध्ये लालाभात् स्वयमपि दोषान्तरमाह एकमात्रेति तत्र साधनाश्रयेयावत्त्वाभावात् तथैवा
ति अर्थपरिष्कारस्यवैकल्पमेवेत्यर्थः यथाश्रुते हेतुत्वसाधनसमानाधिकरणधर्मत्वस्य लाभात् तस्य च प्रमात्वाभावात् न
न्नु साधनसमानाधिकरणस्य महानसत्वादेः प्रत्येकं सामानाधिकरण्यं वा व्याप्तिरित्याशंकां दूषयति तादृशानामिति य
द्वितीये वह्न्यो महानसत्वसामानाधिकरण्यस्य महानसीये व पर्वतत्वसामानाधिकरण्यस्याभावात् एवमन्यत्रापि त्वयाभारि
त्यर्थः तेन विशिष्टसत्ताभावान् नोक्तरित्यत्र शुद्धसत्तासामानाधिकरण्यं तस्य जातिसामानाधिकरण्यव्यापकतावच्छेदकत्वेपि नात्र
त्वव्याप्तिः जातिसामानाधिकरण्यं द्रव्यत्वादिनिष्ठात्यन्ताभावप्रतियोगितानवच्छेदकता हि विशिष्टसत्तात्वावच्छिन्नसामानाधिक
रण्यत्वमेवेत्यर्थः साधनपदमपि साधनतावच्छेदकावच्छिन्नपरम् तेन द्रव्ये विशिष्टसत्त्वादित्यत्र शुद्धसमानाधिकरण्येन द्रव्यत्व
सामानाधिकरण्ये तेन व्यापकताभावेपि नाव्याप्तिः विशिष्टसत्तात्वावच्छिन्नसामानाधिकरण्ये द्रव्यत्वसामानाधिकरण्य
स्य तेन व्यापकत्वसत्त्वात् तद्धर्मावलीढेति तद्धर्मवत्तासामानाधिकरण्ये निवेश्य तद्धर्मावच्छिन्नाधिकरणतानिवेशप्रयोजना
भावादित्यर्थः दूषयति इतोपीति साधनसामानाधिकरण्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकेत्यत्र यद्

ऊँ.
स.
९१

मीवच्छिन्नस्य सामानाधिकरण्यं तेन तद्वच्छिन्ने यद्धर्मावच्छिन्नसामानाधिकरण्यं तत्सामानाधिकरण्यमपेक्ष्य साध्यसमाना
धिकरण्यात्यन्ताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यस्य लघुत्वात् तस्यापि व्याप्त्य
नुमितिजनकतावच्छेदककोटौ निवेशादिति भावः अविनेति अविनाभावस्याभाववदर्थकत्वाद्भाववद्वृत्तित्वे लभ्यते तच्च न
धूमादौ जलत्वाद्यभाववति पर्वतादौ वृत्तित्वादत आह साध्येविनेति तदर्थश्चाभाववतीति विनाशब्दोऽत्र सप्तम्यर्थप्रत्ययप्रकृतिक
त्वेन लोपात् विनाभावशब्दोऽत्र साध्याभाववद्वृत्तित्वपरस्तथा च तेन समस्यमानस्य समासात् साध्याभाववद्वृत्तित्वाभावस्तस्याभावइ
त्यर्थः पूर्वं तु साध्याभाववद्वृत्तित्वमित्यस्यार्थमिति भेदः ननु साध्याभाववद्वृत्तित्वावच्छेदकसंबन्धेन यद्वृत्तित्वं तदभावो वाच्यः
अन्यथा द्रव्यादौ कालिकेन धूमो द्रव्ये वृत्तित्वात् अव्याप्तेः तथा च समवायेन जातेः तिस्रादौ साध्याभाववत्सामान्यादिनिरूपितसम
वायावच्छिन्नवृत्तित्वमप्रसिद्धमिति तदभावोऽपि न पल्लवाव्याप्तिरत आह साध्येविनेति विनाभावस्सत्रा ऽकारप्रश्लेषः साध्यप
देवधूमण्णीय साध्याभावसत्त्वे योऽभावस्तदवच्छेदकावच्छेदेनाभावान्वयात् तत्तिसमभ्यावा व्यापकत्वं लभ्यते तस्याभावश्च तन्
न्मसामान्यप्रतियोगितालाभ इति साध्याभाववद्वृत्तिकीभूताभावप्रतियोगित्वलाभ इत्यर्थः तथा च यत्र साध्यतावच्छेदकसंबन्धा
वच्छिन्नप्रतियोगिताकसाध्याभावस्तत्रैव तत्सत्तावच्छेदकसंबन्धावच्छिन्नप्रतियोगिताकयदभावश्च स लक्षणे नोक्ताः व्याप्ति
रिति इत्यर्थः जन्यजनकभावादिसंबन्धस्याव्याप्तिताभावादाह सामानाधिकरण्यमिति व्यभिचारिसंबन्धस्येति व्यभिचारितिमिह

साध्यसामानाधिकरण्यमेवेत्यर्थः सामानाधिकरण्यस्य निरूपकभेदेनाभिन्नत्वादाह किंचिद्रूपेति तदेवाह अनादेरपीति
नव्यभिचारिण्ययोगोलकीयवह्नौ धूमसामानाधिकरण्यस्यैवाभावात् तदुक्तं धूमत्वावच्छिन्नव्यापकतादिदमयुक्तमि
ति वाच्यं पृथिवीत्वस्यानादित्वादौ द्रव्यत्वव्याप्यत्वेनाभावप्रतियोगितानवच्छेदकस्य जातित्वस्य पृथिवीत्वेपि सत्त्वात् उदाहरणस्य
विवादितत्वात् व्यभिचारानुपस्थितावनुमितेरनुत्पादस्यासिद्धत्वादाह नह्यतिरेकेति व्यभिचाराभावेनेत्यर्थः अननुभवे विप्रतिपत्ते
रत्राह हेत्वंतर इति आलोके वह्निर्व्यभिचारीति ज्ञानेपि धूमपरामर्शादनुमितेरुदयाद्व्यभिचारज्ञानाभावो न हेतुरित्यर्थः नन
तल्लिंगकानुमितौ तल्लिंगविशेष्यकव्यभिचारज्ञानाभावो न हेतुः प्रतिबंधकमतं तत्राह नचैववेति रूपांतरेणेति इदंव-
ह्निव्यभिचारीति इत्येवं न धूमे व्यभिचारग्रहेपीत्यर्थः ननु तद्धर्मावच्छिन्नलिंगकानुमितौ तद्धर्मावच्छिन्नविशेष्यताकव्यभि
चारज्ञानं प्रतिबंधकं स्यादत आह हेतुतावच्छेदकाग्रहेपीति वह्निसमानाधिकरणो वा नित्यादेः सामानाधिकरण्याग्रहेनि-
रुक्तमितावच्छेदककादपि ज्ञानादनुमित्युपगमेः ननु येन रूपेण पक्षधर्मताधीस्तेन व्यभिचारज्ञानं विरोधि प्रकृते च समा-
नाधिकरण्येन पक्षधर्मताधीः अतस्तेनैव व्यभिचारज्ञानं विरोधि स्यादत आह विवदंतेवेति व्यापकताज्ञाने हेतुतावा-
दिनः इति शेषः नच व्याप्यसामानाधिकरण्यज्ञाने हेतुत्वमेव विवक्षा अस्ते न तु व्यभिचारज्ञाने हेतुत्वमपीत्यर्थः यद्वा प्रकृते
व्यभिचारज्ञानाभावस्य हेतुत्वमेव [illegible] तत्राह विवदंतेवेति व्याप्यसामानाधिकरण्यज्ञाने हेतुतावादिनो प्रमेवेदमंव्यतिरस्त

उं॰ ५२

त्तयाह व्यभिचारज्ञानाभावेति तस्य सामानाधिकरण्यज्ञानस्य च परस्परसहकारित्वे कारणताभेदः अभावे प्रतियोगि
तायां ज्ञानस्य निवेशश्चेति गौरवं तत्प्रकारणताकसामानाधिकरण्यज्ञाने व्यभिचाराभावस्य विषयतयावच्छेदकत्वे तु तदे
कालाघवं नचेति धूमो वह्निव्यभिचारी न वेति संशयानुमितेर्न स्यादव्यभिचारनिश्चयत्वेन हेतुत्वे वाच्ये यत्संशयनिश्चयव्य
तिरेकनिश्चयौ यत्प्रतिबंधकौ तन्निश्चयत्वेन हेतुरिति नियमात् व्यभिचारज्ञानाभावहेतुतायां तु संशयनिश्चयसाधारणज्ञा
नत्वमेव निविष्टं तथा तदभावाप्रकारकत्वे सति तदभाववत्प्रकारकज्ञानत्वरूपनिश्चयत्वापेक्षया लाघवमिति अव्यभिचार
ज्ञानहेतुतायामेव गौरवमिति शंकार्थः समाधत्ते व्यभिचारेति धूमो वह्निव्यभिचारीति ज्ञानमप्रमेति निश्चयसत्वे व्यभिचारज्ञा
नेनानुमितिप्रतिबंधके अतोऽप्रमाण्यनिश्चयाभावविशिष्टव्यभिचारज्ञानत्वेन विरोधित्वं वाच्यं अप्रमाण्यग्रहमात्रस्योत्तेजकत्वे
अप्रमाण्यसंशयकाले अनुमितिप्रतिबंधापत्तेः मम तत्त्वव्यभिचारनिश्चयस्य हेतुतायां अप्रमाण्यज्ञानमात्रस्योत्तेजकत्वं
अप्रमाण्यसंशये निश्चये वानुमित्युत्पत्तेः अव्यभिचारज्ञानीयनिश्चयत्वेन व्यभिचाराप्रकारकत्वमिति लाघवं व्यभि
चारज्ञानीयाप्रमाण्यनिश्चयत्वेन व्यभिचाराभाववद्विशेष्यकव्यभिचारप्रकारकत्वाभावाप्रकारकत्वेऽप्रमि व्यभिचाराभावव
द्विशेष्यकमप्रमाण्यज्ञाने अव्यभिचारनिश्च व्यभिचारप्रकारकत्वप्रकारकमिति तत्र च गौरवं इति भावः ननु यत्राप्रामाण्य
ज्ञानविशेष्यकमप्रमाण्यज्ञाने अव्यभिचारनिश्चयोऽप्रमेतिज्ञानमप्रमाकारकं जातं तत्र व्यभिचारनिश्चयविशेष्यकाप्रामा

ण्यज्ञाने सत्यप्यनुमित्युत्पत्त्या अप्रामाण्यज्ञानोत्तेजकताया अप्रामाण्यनिश्चयाभावो निवेश्यः तस्य प्रामाण्यनिश्चयनिवेशा
वश्यकत्वेन तन्मते तद्व्यभिचारज्ञानमप्रमेत्याकारकाप्रामाण्यग्रहकालेपि जनकताया अप्रामाण्यग्रहाभाव एव निवेश्य इ
ति लाघवमिति चेन्न अप्रामाण्यज्ञानविषयाभ्यकाऽप्रामाण्यज्ञानस्योत्तेजकतानभ्युपगमात् केचित्तु यत्राऽप्रामाण्य
ज्ञानेऽप्रामाण्यज्ञानेन जाते व्यभिचारज्ञानादौ न जाते तत्राऽव्यभिचारनिश्चयत्वेन हेतुत्वे लाघवमिति तात्पर्यमाहुः मतान्तर
माह नानाविधेति धूमो वह्न्यभाववद्वृत्तिः वह्निमद्वृत्तिर्वेत्यादीनामित्यर्थः वक्ष्यमाणेति साध्यवदन्यावृत्तित्वरूपेत्य
र्थः प्राञ्चस्तित्स्वरसस्तु धूमो साध्याभाववद्गामीत्यादिज्ञानेस्य च हेतुत्वे शुक्तिसाधारण्यादिदोषाभावगर्भव्यभिचारज्ञानमप्रमैवेति विषयके
तदभाव एव हेतुरिति तु अव्यभिचारज्ञानकाले साध्यवद्वृत्तित्वविशिष्टहेतुमत्ताज्ञानानुदयान्नेदं व हेतुरस्त्वित्याश
ङ्क्याह सामानाधिकरण्येति धूमवान्नवेतो वह्निमान्नवेति संशयेपि धूमो वह्निमद्वृत्तिर्नवेति संशयस्यावश्यकतया वह्निम
द्वृत्तित्वविशिष्टधूमवानिति विशिष्टवैशिष्ट्यबोध—— —भवति विशेषणतावच्छेदकस्य वह्निमद्वृत्तित्वस्य निश्चयाभावा
दित्यर्थः अथ केवलान्वयिनि सामानाधिकरण्यमात्रज्ञाने केवलान्वयित्वज्ञाने वाऽनुमितिहेतुरिति पदद्वयं दूषयति केव
लेति नन्वहः केवलान्वयित्वग्रहः तत्त्वेति केवलान्वयित्वेनेत्यर्थः वृत्तिमदिति आकाशाभावस्याप्याकाशाभावाभावप्र
तियोगित्वादाकाशाभावस्य केवलान्वयित्वे न स्यादतो वृत्तिमदिति तस्य त्वाकाशस्वरूपतया न वृत्तिमत्ताभिमानिविशिष्टाभा

वसत्त्वान्त्राऽव्याप्तिः लाघवादाह अन्योन्याभावेति आकाशाभावादिमद्भेदस्य कुत्राप्यभावात् आकाशाभावस्यैवेप
दी॰ दार्थत्वमितिभात् अनुयोगिवृत्तिधर्मस्य भेदप्रतियोगितावच्छेदकत्वानुपपत्तेः सर्वेति अन्वयिव्यतिरेकीत्यर्थः हेतौ
५२ साधनवत्त्वेनाविशेषणेनैसाध्यवद्वृत्तित्वस्य वान्योन्याभावविशेषणेनेत्युक्तं तेन साधनवद्वृत्त्यन्योन्याभावप्रतियोगितान
९३ वच्छेदकसाध्यसामानाधिकरण्यरूपाया व्याप्तेरन्वयिव्यतिरेकिसाधारणीति लाघवं उभयत्र भिन्नकार्यकारणभावकल्प
नेगौरवमित्यर्थः शेषमिति अतोपि साध्यवदन्यावृत्तित्वानेमवलाघवादन्वमितिहेत्वारिति केवलान्वयिवेउनप्रसंगात्
ववद्यामहत्यर्थः मूले असाधकमिति दूषणस्याऽसाधकत्वायाप्यत्वेविनाऽव्याप्यादिसंमेलनदूषणस्यसम्भवात् एवं
वव्याघातोत्तरोधेन व्याप्तिबुद्धिसिद्धान्तद्विपक्षपाव्याप्तेरपि सिद्धिरितिभावः स्वार्थेति व्याघातस्यपरप्रमेवोद्भावकत्वात्
स्वार्थानुमानेनतदभावाद्व्याप्तिस्वरूपानवधारणे परप्रत्युपन्यासानुपपत्तेः कथकसंभावनकव्याश्रितत्वाघातविस्तया
दित्यर्थः नचसामान्यतोलौकिकसाधारणव्याप्तिज्ञानसंभवात्कथाप्रवेशः अस्तिवाच्यं नाद्दशस्यकथायामनुपयोगात् ॥
इति सर्वेपत्तदीधितिप्रवेशः यत्सामानाधिकरण्यं तेनाभावप्रतियोगितावच्छेदकावच्छिन्नयद्वच्छिन्नेनभवतीतिमूल
मनुपपन्नम् वह्नित्वावच्छिन्नस्यसर्वस्यधूमसमानाधिकरण्याभावप्रतियोगितावच्छेदकेनतत्तद्वह्नित्वेनाऽवच्छि
न्नत्वात् तत्तद्वह्नित्वावच्छिन्नातिरिक्तवह्नेरप्रसिद्धेरित्यपकर्षे नवयत्साध्यतावच्छेदकंप्रतियोगितावच्छेदकं यद्वा य

तियोगितावच्छेदकस्यानवच्छेदकमितिविवक्षितमितिवाच्यं उभयत्रापिप्रथमावच्छेदकपदवैयर्थ्यापत्तेरित्यभिप्रायेणाह
प्रतियोगितानवच्छेदकेति तथाचतन्नभवतीतितन्नत्रावच्छेदकेत्यत्रव्यस्तसमनयोजनयाउक्तार्थलाभः तेनोक्तप्रतियोगिता
नवच्छेदकत्वंवह्निमत्त्वलभ्यतइत्यर्थः नचैतत्तद्धूमादिमत्तावच्छिन्नसामानाधिकरण्यस्ययावद्वह्निनिरूपितव्याप्तिताभावा
दुक्तं तद्धर्मावच्छिन्नेनेति धूमादेर्घटत्वादिरूपेणावह्न्यादिव्यापकत्ववारणायोक्तं तद्रूपविशिष्टस्येति तत्तद्वह्नित्वादिना
व्यापकत्ववारणायोक्तं तद्धर्मावच्छिन्नेनेति उक्तप्रतियोगितावच्छेदकेत्यर्थः पर्वतीयवह्निधूमयोः सामानाधिकरण्य
स्यसकलतन्निरूपितत्वलाभायमुक्तं यावदिति तथाचकेवलान्वयिसाध्यकेनाव्याप्तिः हेतुसामानाधिकरण्यात्यन्ता
भावप्रतियोगितावच्छेदकघटत्वादिभेदस्यवाच्यत्वतादोषलभ्यतात् ननुदण्डिमान्दण्डिसंयोगादित्यादावव्याप्तिः सा
ध्यतावच्छेदकानांनानात्वहेतुतानीयथोक्ताभावप्रतियोगितावच्छेदकत्वात् एकदण्डिसंयोगाधिकरणेऽन्यदण्ड्यभावस्यसत्त्वात्
नचैतद्दण्डिसामान्याभावोनास्त्येवकिंतुतत्तद्दण्ड्यभावः नचैतत्साध्यतादेवप्रतियोगितावच्छेदकतायाव्याप्त्यसम्भवइतितात्सा
ध्यतावच्छेदकस्यशुद्धदण्डस्यानवच्छेदकत्वमवच्छेदकतापर्याप्त्यनधिकरणत्वरूपमस्त्येवेतिवाच्यं शुद्धदण्डस्यतद्दण्डाव
च्छिन्नसमानुपपत्तेः नचदण्डः प्रतियोगितावच्छेदकः तत्ताभावप्रतियोगितावच्छेदकतावच्छेदिका अत्रावच्छेदकत्वावच्छे
निरवच्छिन्नावच्छेदकताश्रयत्वेनविवक्षणमितिनदोषइतिवाच्यं शुद्धदण्डस्यावच्छेदकत्वेऽप्यतिप्रसंगाविरहात् नीलव

दोनाश्लीमादौ तु नीलमात्रस्यावच्छेदकत्वे नीलपटवति उक्तव्यवहारो न स्यात् घटत्वमात्रस्य तथात्वे तु पीतघटवत्युक्त-
व्यवहारो न स्यादिति नीलविशिष्टघटत्वस्य तथात्वस्वीकारात् अवत्तत्तायाश्च दण्डमात्रवृत्तितया तदुपलक्षितदण्डादि
व्यक्तेरेवानतिप्रसक्ततया तदभावात् एवं पृथिवीत्वव्याप्यजातिमत्त्वात् पृथिव्याश्च तत्र समवायस्य साध्यता हत्तेनाभया
वच्छेदकत्वे व्याप्तिः पटरूपपृथिवीमात्रमिते तौ घटत्वावच्छिन्नाभावस्य घटरूपपृथिवीमतिकपाले च पटत्वावच्छिन्नाभा
वस्य सत्त्वेन साध्यतावच्छेदकभूतानां सर्वासामेव पृथिवीत्वव्याप्यजातीनां घटत्वपटत्वादिरूपाणां यथोक्ताभावप्रति-
योगितावच्छेदकतया निरवच्छिन्नाया एवाप्रसक्तत्वादित्याशयेनाह दण्डादाविति परम्परेति स्वसमवायिसंयोगरूपेण
ध्येः तेनोक्तसंबन्धावच्छिन्नप्रतियोगिताकदण्डत्वावच्छिन्नाभावस्य तत्र दण्डमत्यसत्त्वान्न दोषः एवं पृथिवीत्वव्याप्यजाति-
तावच्छिन्नाभावस्य कुत्रापि पृथिव्यामभावादिभावः अथ तादृशप्रतियोगितानवच्छेदकधर्मस्यैव व्यापकतावच्छेदक-
तयाऽनुमितेर्दण्डत्वप्रकारकतापत्तिः तत्साध्यव्यापकतावच्छेदकप्रकारकत्वनियमादिति चेन्न तादृशप्रतियोगितान-
वच्छेदकदण्डत्ववद्दण्डविशिष्टसामानाधिकरण्यज्ञानस्यापि हेतुत्वात् तत्र च परम्परया दण्डत्वस्य प्रकारतानुरोधेनानुमिता-
वपि तथात्वात् समवायेन दण्डप्रकारीभूतेऽस्य च दण्डत्वस्य स्वयुक्तपरम्परया दण्डादिनिभाने इत्तिनश्च सामानाधिकरण्ये अनुमि-
तावप्येवमेव भानौचित्यात् सामानाधिकरण्यनिरूपितसाध्यनिष्ठप्रकारतानुपविशेष्यतानिरूपितासाध्यतावच्छेद

कस्याप्येतादृशी प्रकारतानादृश्येवानुमितावपीति नियमात् अत एव यत्रैक्षसमसामानाधिकरण्याभावप्रतियोगितानवच्छेदकवह्नि
त्वावच्छिन्नसामानाधिकरण्यमेवावगमयत एतादृशज्ञानेनैतत्र वह्नित्ववद्वानिमेवानुमितिः सामानाधिकरण्येनानवच्छिन्नस्य वह्नि
त्वेनानवच्छिन्नप्रकारत्वात् यत्र तु तादृशवह्नित्वावच्छिन्नसमानाधिकरणेत्यादि तत्र वह्निमानिति तत्र वह्नित्वनिष्ठप्रकारता
या निरवच्छिन्नत्वात् वह्नित्वनिष्ठनिरवच्छिन्नप्रकारतानिरूपितवह्निनिष्ठविशेष्यतायाश्चैतत्सामानाधिकरण्यनिष्ठ
विशेष्यतानिरूपितप्रकारतानिरूपितत्वात् पूर्वस्या वह्नित्वावच्छिन्नवह्नित्वनिष्ठप्रकारतानिरूपितविशेष्यतायास्तु
भिन्नत्वात् केचित्तु साध्यादिभेदेन व्याप्तिभेदादेतादृशस्थले हेतुसामानाधिकरण्याभावप्रतियोगितानवच्छेदकतानवच्छे
दके यत्साध्यतावच्छेदकतावच्छेदके इत्यादि वाच्यम् उक्तस्थले तु दण्डनिष्ठप्रतियोगितावच्छेदकतायां तद्दण्डत्वमेवावच्छेद
कं न तु दण्डत्वमिति न दोषः एवं दण्डिमदादौ साध्येऽवच्छेदकतान्तरं निवेशयमित्याहुः अपरे तु दण्डिमानेतत्वादित्यादौ वदण्डि
मानित्यनुमितिः तत्र हेतोरन्यत्राहम्यात्तत्राभावस्य हेतुसमानाधिकरणाभावदण्डसंयोगप्रतियोगितानवच्छेदकत्वो
पपत्तेः दण्डिसंयोगादौ तु हेतौ दण्डिमानित्येवाकार इत्याहुः यद्रूपविशिष्टेत्यस्य कृत्यमाह इत्थं चेति इदमिति यत्तानि दे
शत्व समानाधिकरणत्वभावेन गुणकर्मान्यत्वस्य विशेषणत्वलाभार्थम् अन्यथा स्य सामान्यादावपि सत्तात्वस्य वतत्रा
सत्त्वादसंभवात् तन्न शंकास्यात् अयमर्थः साधनसामानाधिकरण्येत्यादिमात्रनिवेशे शुद्धविशिष्टसत्तयोरभेदात्साधनीभूत

ॐ. सत्ताधिकरणे गुणादौ तद्विशिष्टद्रव्यत्वाभावः तत्प्रतियोगितावच्छेदकं च द्रव्यत्वमित्यव्याप्तिः स्यात् यद्रूपविशिष्टेत्युक्ते न विशि
५५ ष्टसत्तावच्छिन्नाधिकरणताशालिद्रव्यमेवेति न तद्विशिष्टेन द्रव्यत्वाभावः किन्तु घटाद्यभावः तत्प्रतियोगितावच्छेदकं घटत्वादि तद्भिन्नं
९६ द्रव्यत्वमिति अनवच्छेदकत्वसत्त्वान्नेति सकलधूमे सकलवह्निव्याप्तिरेवं स्थापिता इदानीमेकैकवह्निसामान्यव्याप्तिरिति प
त्तनाग्रे धूमस्य महानसीयान्तरीयस्यापि ऐक्यमुपपादयति सामानाधिकरण्येति हेतुनिरूपितसत्त्वसाधनभेदेनाभिन्नतयान्यद्वदिति सामा
नाधिकरण्यस्यापि भेदादित्यर्थः निरूपकतावच्छेदकेति उक्तप्रतियोगितानवच्छेदकत्वे सति सामानाधिकरण्यप्रतियो
गिनो प्रकारीभूय भासमानस्य वह्नित्वादेरित्यर्थः अधिकरणतावच्छेदकेति यद्रूपविशिष्टसामानाधिकरण्याभावप्रतियो
गितानवच्छेदकं साध्यतावच्छेदकं तद्रूपकस्य धूमत्वादेरित्यर्थः सामानाधिकरण्याभाववद्वृत्तित्वरूपेणावच्छेदकत्वे गो
धादौ साध्ये द्रव्यत्वादेर्लक्षणत्वं स्यात् तस्य गोधसामानाधिकरण्याभाववद्वृत्तित्वात् द्रव्यत्वे गोधसामानाधिकरण्यसत्त्वात्
ऐक्यमिति एकधर्मावच्छिन्नत्वमित्यर्थः ननूक्तमूलस्य पर्वतीयधूमनिष्ठव्याप्तौ महानसीयधूमनिष्ठव्याप्त्यभिन्नत्वे वि
वक्षिते महानसीयधूमनिष्ठवह्निसामानाधिकरण्यस्य पर्वतीयधूमावृत्तित्वात् सामान्यलक्षणं विना पर्वतीयधूमे व्या
प्तिग्रहो न स्यादित्याशंकायां तस्य ग्रहसत्त्वात् तच्चेनोपपादितमेवेत्यत आह वस्तुतस्त्विति रासभादीति न च तद्रूपविशि
ष्टत्वेन निर्वाहः लक्षणोपदर्शकस्य तस्य लक्षणानन्तर्गतत्वात् ननु रासभादिनिष्ठवह्निसामानाधिकरण्यस्या.

त्तिः नचोक्तवह्निसमानाधिकरणरासभवानिति ज्ञानादनुमित्यापत्तिः यद्रूपविशिष्टसमानाधिकरणाभावप्रतियोगि
तानवच्छेदकं साध्यतावच्छेदकं तद्रूपावच्छिन्नप्रकारताकमेव पक्षधर्मताज्ञानं हेतुरित्यवश्यवाच्यत्वात् अन्यथोक्तइव
वाजिमतोनुमित्यापत्तेः रासभसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्य वह्नित्वेऽभावात् रासभत्वेन पक्ष
धर्मताज्ञानादनुमितेरापादयितुमशक्यत्वात् सत्यं रासभो वह्निव्याप्य इति व्यवहाराभावाद्वस्तुगतिकथनार्थमेव
तत्साधारण्यस्यवाचितत्वात् धूमवादिमतीति तद्विशिष्टमित्यर्थः आमितिज्ञाने धूमीये यद्धूमव्यापकवह्निसामानाधिकर
ण्येतद्धातित्याकारके धूमत्वस्य सामानाधिकरण्यसंबंधेन सामानाधिकरण्यप्रकारतानिरवच्छिन्नैव धूमवत्त्वनिवेशप्र
योजनाभावात् द्वितीये सामानाधिकरण्यं तेन संबंधेन धूमत्वे प्रकारः न च धूमावच्छिन्नेन धूमे तथात्ववह्निसामानाधिकर
ण्यवद्धूमत्ववान् धूम इत्याकारकं धूमो वह्निसामानाधिकरण इति नोत्तरकालीनं ज्ञानं बोध्यं ग्रन्थेन तु धूमव्यापकवह्निसमा
नाधिकरणधूमवत्ताज्ञानमेव हेतुः आद्ये सामानाधिकरण्यविशिष्टधूमत्वे द्वितीये धूमत्वविशिष्टसामानाधिकरण्य
प्रकारकं रक्तदण्डवान् उरक्तवानितिवत् यद्वा उभयत्राप्युभयधर्मितावच्छेदककमेव ज्ञानम् आकारस्तुसपवेता
द्रुः आद्याभिन्नेति सामानाधिकरण्यव्यक्तिभेदात् सकलधूमावृत्तिरित्यर्थः द्वितीयात्वभिन्नेति धूमत्वस्यैकत्वात्स
कलधूमवृत्तिः तदभिप्रायेणैवोक्तमफलमित्यर्थः न च विशेषणस्य सामानाधिकरण्यस्य सकलधूमेष्वभावात्तद्विशिष्टधू

ॐ. ५८ 96

मतस्यापि सकलधूमवृत्तित्वमनुपपन्नम् विशेषणाधिकरणएव विशिष्टाधिकरणतास्वीकारादिति वाच्यं सामानाधि
करण्यस्योपलक्षणत्वात् तदुपलक्षितधूमत्वस्य धूममात्रवृत्तित्वात् परंत्वनुमितिहेतुज्ञाने सामानाधिकरण्यं विशेषणेन
वृधूमवानितिज्ञानानन्तरवत्वापत्तेः केचित्तु स्वाश्रयवृत्तित्वरूपपरंपरया सामानाधिकरण्यविशिष्टधूमत्वं व्याप्तिः तच्च धूम
मात्रसाधारणमित्याहुः प्रतियोग्यसामानाधिकरण्येत्यस्य लक्षणमारभते अयमिति कपिसंयोगीत्यस्य साध्यपदवा
लाभार्थंयत्ननिर्देशाइत्येके हेतुपदसमभिव्याहारादेव तल्लब्धेः स्पष्टार्थमित्यन्ये अधिकरणेतमिति प्रतियोग्य
समानाधिकरणेतीत्यर्थः अव्याप्यवृत्तिसाध्यकसाध्यतावच्छेदकस्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छे
दकत्वादव्याप्तिः विवक्षायां तु साध्याभावस्य प्रतियोगिसमानाधिकरणत्वात् अस्मदीयाभावएव तादृशः तत्प्रति
योगितानवच्छेदकं च साध्यतावच्छेदकमिति न दोषः सार्वभौममतमाह यत्त्विति तदिति अनधिकरणेतमित्य
र्थः ननु संयोगवति द्रव्ये कथं संयोगसामान्याभावः यत्किंचिद्विशेषस्यैव तत्रहितिरोधितादित्यतआह संयोगस्येति
सर्वेषामेव संयोगानामव्याप्यवृत्तितया स्वस्वानवच्छेदकदेशावच्छेदेनाभावोपपत्तेः हेतुतावच्छिन्नविशेषणत
या संयोगसामान्याभावबाधकाभावात् व्याप्तिंवारयति तत्रैवेति आकाशसंयोगोदरतीन्द्रियतयायोग्यानुपल
ब्धेरभावात् प्रतियोगितावच्छेदकमात्रस्य तत्रैवसत्त्वे सामान्याभावादेः प्रसक्त्यापत्तेः ननु महारजनरक्ते पटे पट

तावच्छेदेन तत्संयोगसामान्याभावप्रत्यक्षं स्यान्महारजतसंयोगस्यातीन्द्रियत्वाभावादत आह परित इति तत्संयोग
प्रत्यक्षस्यैव तत्संयोगसामान्याभावप्रत्यक्षे विरोधित्वात् न च प्रागप्युपलंभापत्तिः संयोगप्रत्यक्षत्वात्सर्वे प्रतिबंधका·
भावादिति वाच्यम् तत्प्रत्यक्षसामग्र्या अपि प्रतिबंधकत्वात् केचित्तु कार्यसहभावेनोपलब्धेर्विरोधित्वमित्याहुः
मानाभावादिति प्रत्यक्षस्य तथैव निरस्तत्वात् अनुमानमाशंकते योयदीयेति योयद्धर्मव्याप्यधर्मावच्छिन्नयाव
दभाववान् स तद्धर्मावच्छिन्नाभाववानिति व्याप्तिः तथा च वृक्षः संयोगत्वावच्छिन्नाभाववान् संयोगत्वव्याप्यधर्माव
च्छिन्नयावदभाववत्त्वात् गुणवदित्यर्थः न च संयोगत्वव्याप्यो धर्मः एतत्संयोगावृत्तिसंयोगत्वमन्यसंयोगत्वं वेत्यादिः
तदवच्छिन्नाभावस्य संदिग्धासिद्धिरिति वाच्यं उभयाभावस्यापि व्याप्यधर्मावच्छिन्नत्वात् एकेति एकावच्छेदेन
यावद्विशेषाभावस्य सहेतुनास्ति भिन्नभिन्नावच्छेदेनैव तद्वृत्तेः नन्वयमुपाधिर्गुणेन साध्यव्यापकः तत्र संयोगसा
मान्याभावरूपसाध्यसत्त्वात् एकावच्छेदेन यावद्विशेषाभावानां चासत्त्वात् तत्र तेषां निरवच्छिन्नत्वात् सत्यं अनेका
वच्छेदकानवच्छिन्नत्वस्य तात्पर्यत्वात् तस्य चैकावच्छिन्ननिरवच्छिन्नोभयसाधारणत्वात् नन्वेवमपि क्वचित्संयोगसामा
न्याभाववति वृक्षे यथोक्तोपाधेरप्यभावः तत्र विशेषाभावानामनेकावच्छेदकावच्छिन्नत्वात् सत्यम् यावद्विशेषा
भावावच्छेदकावच्छिन्नत्वसंबंधेन यावद्विशेषाभाववत्त्वस्योपाधित्वात् व्याप्यवृत्तेरप्यवच्छेदकत्वस्वीकारात् गुणे

दौ न साध्यव्यापकत्वानुपपत्तिः पक्षेनेति पक्षावच्छेदेन यावत्संयोगाभावरूपोपाधिनेत्यर्थः नन्वभावादिरेव हेतुः सा
उं. ध्यत आह प्रयोजकत्वेति ननु व्याप्यत्वेनैवावच्छेदकानभ्युपगमात्रोक्तोपाधिरनौपाधिकत्वमेवानुकूलतर्कस्त्वतोऽति
५० गुणत्वादिति गुणवद्भेदत्वादित्यर्थः आदिपदेन द्रव्यान्यत्वादिपरिग्रहः ननु हेतौ न संयोगसामान्याभावादित्युपाध्यभा
१ वेन साध्याभावानुमाने संयोगेन सिद्धिसाधनमिति चेन्न व्याप्यत्वेनैतस्य प्रतियोगिव्यधिकरणत्वस्य वा न साध्याभावे
विशेषणत्वात् व्याप्यत्वेनैतेव प्रतियोग्यधिकरणेऽनवच्छिन्नत्वेनिकत्वे यद्वा संयोगसामान्याभाववदेव साध्यः
केचित् संयोगसामान्याभावो न द्रव्यत्वं निर्गुणत्वव्याप्यत्वात् रूपत्वादिवत् यद्वा संयोगसामान्याभाववत्त्वेन द्रव्यत्व
मिह तिनिर्गुणत्वव्याप्यतावच्छेदकत्वात् रूपवत्त्वादिवत् स्थापनाप्रतिस्थापनयोः पक्षेऽस्य साध्यप्रयोजकत्वादित्याहुः
ननु द्रव्यत्वे संयोगाभावावच्छेदके संयोगानवच्छेदकत्वात् यत्प्रतियोगिनिष्ठमनवच्छेदकं तत्तदभावावच्छेदकं यथा
मूर्तत्वादीति सामान्यव्याप्तिमूलकमनुमानमेव प्रमाणमस्तित्याशंकते नचेति दूषयति गुणेति गुणातिरिक्तत्वमि
त्यादि यतो द्रव्यत्वं न वच्छेदकत्वेऽपि गुणाभावावच्छेदकत्वाभावाद्व्यभिचार इत्यर्थः नन्वव्याप्यत्वमिति प्रतियोगित्वेनोपदनव
च्छेदकं तत्तदभावावच्छेदकमिति वाच्यमतः स्वरूपासिद्धिमाह यथा चेति ननु द्रव्यत्वं तत्संयोगातिरिक्तत्वमिति ता
त्वमनवच्छेदकत्वप्रसंग इत्यत आह घटेत्यादिना ननु तत्र उपहितदण्डत्वरूपाय हेतुतावच्छेदकेऽदण्डत्वे ननु तत्रवत्त्वे हेतु

सर्वतद्रूपायाः प्रतिप्रसक्तत्वात् तथाभेदेऽवच्छेद्यावच्छेदकभावानुपपत्तिः तो दंडत्वमवच्छेद्यं दंडमत्त्वरूपेणावच्छेदकमिति स्वरू
पभेदादत आह वह्नीत्यादि तत्सामान्यस्येति यद्धर्मवत्त्वं तत्सामान्यस्य वह्निसामानाधिकरण्यसामान्यस्यैवेत्यर्थः स्वमतमा
ह नवीनास्तु नरिति गुणस्येति सामान्याभावइत्यनेनान्वयः एतेन कालिकमव्याप्यवृत्तित्वं दर्शितं वृत्तेरिति वह्निसंयो
गस्य शिखराद्यवच्छेदेनाव्याप्यवृत्तेः संयोगेन वह्नेर्व्याप्यवृत्तितानुपपत्तेः न तु संबंधानुरोधेन संबंधिनो व्याप्यवृत्तितापादानमुक्तं संयो
गसमवायस्वव्याप्यवृत्तितया संयोगस्यापि व्याप्यवृत्तितापत्तेरिति चेत्सत्यं तथापि गुणावच्छिन्नसमवायसंबंधसंबंधत्वात् तथा
च यत्र यत्संबंधानवस्तत्र तत्संबंधावच्छिन्नप्रतियोगिताकतदभावइति व्याप्तिः तेनानवच्छिन्नवृत्तिकत्वानुरोधेन संबंधावच्छे
देन वृत्तिमत्त्वस्य व्याप्यवृत्तित्वस्वरूपत्वाभावेपि न क्षतिः क्वचित्समवायेनापि द्रव्यमव्याप्यवृत्तिः तेन तु दण्डमत्पटइत्या
दिप्रतीतिः तन्न तत्साध्यकेति गुणवद्द्रव्यत्वात् वह्निमान्धूमात् गोमान् एतत्कालत्वात् इत्यादावित्यर्थः प्रतियोगिमद्दे
शस्य कालान्तरावच्छेदेनैव प्रतियोगिमत्कालस्यापि देशान्तरावच्छेदेन तदभाववत्त्वात् इत्यर्थः तथा चैतत्कालत्वाधिकरणेऽप्य
तत्कालेदेशान्तरावच्छेदेन वत्समानस्य गवात्यंताभावस्य प्रतियोगितावच्छेदकमेवच्छेदक मित्यव्याप्तिः स्यात् प्रतियोगिवैय
धिकरण्यपदनिवेशेन तयोर्व्यक्तेषु साध्यभिन्नप्रतियोगिकपृथगभावत्वमेतिति न दोषः नोपादयमिति प्रयोजनाभावात् सर्वथैवे
ति व्याप्यवृत्तेर्व्यक्त्यापि न देयं क्वचिदव्याप्यवृत्त्याभावपि न देयं संयोगाभाववान्गुणत्वादित्यादौ तत्र संयोगरूपस्य भावस्य हे

ॐ तसमानाधिकरणत्वात् अव्याप्यवृत्तेरपि व्याप्यवृत्तिसाधारणरूपेण साध्यतायां नेदं येयथासंयोगस्य समवेतत्वेन कालिके
५८ नाव्याप्यवृत्तेरपि घटत्वादेः समवायेन साध्यतायां नेदं नन्वाकाशाभावस्य कालिकसंबंधावच्छिन्नाभावे साध्ये आत्मत्वादि
३६ ९८ हेतावव्याप्तिः आकाशाभावरूपसाध्याभावस्य हेतुमद्वृत्तित्वात् मैवं कालिकसंबंधविशिष्टाकाशाभावस्यैव साध्याभा
वस्यैव साध्याभावत्वात् तस्य चात्मादावृत्तेः ईदृशाव्याप्यवृत्तावपि नेदं यमिति केचित् वस्तुतस्तु संबंधेनैवेति व्याप्यवृत्ता
भिमतत्वात् इति साध्यतावच्छेदकसंबंधेन हेतुसामानाधिकरण्याभावाप्रतियोगिसाध्यके नेदं यमिति यावत् तेन गंधवा
न्पृथिवीत्वादित्यादौ देयं देशतोऽव्याप्यवृत्तित्वेपि कालिकतोऽव्याप्यवृत्तित्वात् संयोगतद्ध्वंसप्रागभावान्यतरत्वेन तद्ध्वंसत्वादि
त्वादावपि देयमेव हेतुमति साध्याभावस्य कालानवच्छिन्नत्वेपि देशावच्छिन्नत्वात् ननु विशिष्टसत्तावान् जातिमत्वात्
भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ चाव्याप्तिः तत्र विशिष्टसत्ताभावस्य उभयाभावस्य च सत्तामूर्तत्वेतवेन्यतत्प्रतियोगि
सामानाधिकरण्यत्वात् तदसमानाधिकरणघटाभावादिरेव तत्प्रतियोगितानवच्छेदकत्वस्य विशिष्टसत्तात्वेउक्तोभय
त्वे च साध्यतावच्छेदके सत्त्वादित्यत आह प्रतियोग्यसामानाधिकरण्यं चेति तथा च प्रतियोगितावच्छेदके विशिष्टसत्तात्वे
भूतत्वमूर्तत्वोभयत्वे च तदवच्छिन्नाधिकरणतायां गुणादौ मनसि चात्वेगीकारान्नवृत्तिर्विशिष्टसत्तात्वावच्छिन्नउभयत्वावच्छि
न्नस्याभावः तत्प्रतियोगितावच्छेदके च योग्योक्तत्वावच्छेदकमिति नोक्तदोषः न चैवं भूतत्वविशिष्टमूर्तत्वमेवोभयत्वम् ३६

तत्रविशेषणाभावान्मतमिनास्ति एवंविशिष्टसत्तायामपि तथाचप्रतियोग्यसामानाधिकरण्येनैवदोषवारणमितिप्रति
योगितावच्छेदकत्वाभिप्रायेणवा ननूभयत्वमसत्त्वविशिष्टत्वातिरिक्तं उभयाभावस्तुविशिष्टाभावएवस्यादतआह नचेति
युक्तिमाह वैशिष्ट्येति घटत्वपटत्वोभयस्थले घटत्वविशिष्टपटत्वादेरप्रसिद्ध्योभयत्वस्यतद्रूपत्वासंभवात् एवंविरुद्ध
धर्मोभयस्थलेसर्वत्रयोज्यं एवंघटत्वपटत्वोभयंनास्तीत्यत्रोभयत्वावच्छिन्नाभावप्रतीतिर्नस्यात् उक्तप्रतियोगितावच्छेद
काप्रसिद्धेः उभयत्वाधिकरणस्येति समवायेनेत्यर्थः उभयत्वेनेति मतेनैवत्वपिमतनासिउभयत्वावच्छिन्नाभावप्रतीतेस्त
त्रचपर्याप्तेरेवप्रतियोगितावच्छेदकत्वात् तस्याएवात्रसाध्यतावच्छेदकत्वात् हेतुमतीतिमतेनस्तूभयत्वावच्छिन्नाभावसत्त्वात्
तथाचसाध्यतावच्छेदकावच्छिन्नाधिकरणतायाहेतुमतिसत्त्वएवव्याप्तिर्नेत्रसाध्यतावच्छेदकाश्रयमत्त्वमात्रेणेत्यर्थः नचा
विरुद्धोभयाभावएकविशिष्टपरत्वावच्छिन्नप्रतियोगिताकएवास्त्विवाच्यं तयोरपिविरुद्धत्वभ्रमदशायांउभयाभावप्रतीतेः
ननुभेदादेःप्रतियोग्यसामानाधिकरण्यानिवेशादेववारणादसेतत्पदंव्यर्थमतआह अत्रेतत्पदंचेति अत्रेतताभावत्वनिरूपक
प्रतियोगितात्वव्यस्यासामानाधिकरण्ये तादृशयावत्प्रतियोगितायाअनवच्छेदकंचेत्यर्थलाभायतदित्यर्थः तत्प्रयोजनमा
ह असमर्थेति घटाभावोऽस्त्वत्रतादृशोविवक्षितः सचतद्विशिष्टघटाभावभेदस्वरूपः अभावाधिकरणकाभावस्याधिकरण
तत्स्वरूपत्वात् एवंचघटाभावस्यप्रतियोगीघटाभावोपि तत्समानाधिकरणत्वात्प्रतियोग्यसमानाधिकरणाभावाप्रसिद्धिः

ॐ· २५ ११

अत्यंतपदोपादानेतु घटाभावेधर्मद्वये घटात्यंताभावत्वेपटाभावभेदत्वेच घटाभावनिष्ठेपद्भेदत्वेतत्तन्निरूपकप्रतियोगिता·
श्रयोयद्यपिपटाभावः तथापितन्निष्ठात्यंताभावत्वनिरूपकप्रतियोगिताश्रयोघटएवेतिभवतितस्यासिद्धिरित्यर्थः अत्यं
ताभावत्वनिरूपकप्रतियोगितानवच्छेदकेत्यस्यफलमाह सर्वेषामेवेति पटत्वाभाववान्घटत्वादित्यत्रसाध्याभावःपट
त्वं हेतुसामानाधिकरण्यस्यतन्निष्ठात्यंताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणोगोत्वाभावः तन्निष्ठःपटत्वाभावभेदो
गोत्वाभावस्वरूपः पटत्वाभावभेदस्यचपटत्वाभावत्वेप्रतियोगितावच्छेदकमित्यव्याप्तिः यथोक्तेतुगोत्वाभावस्यात्यंताभाव
त्वनिरूपकप्रतियोगितायागोत्वत्वमेवावच्छेदकं घटत्वाभावत्वेनभेदत्वनिरूपकप्रतियोगितायाएवेतिनदोषः संप्रदा
यवृत्त्यरूढि याद्दशप्रतियोगित्यादिअवश्यमग्रेविवक्षणीयं अन्यथासर्वस्यैवतल्लक्षणाहानिस्त्वविशिष्टस्याभावरूपप्र·
तियोगित्वेत्यादिअवश्यसामानाधिकरण्यत्वादप्रसिद्धेः तथाचात्यंतपदवैयर्थ्यमेवेति संप्रदायमतमेवानुसृत्यशंक
ते अथयदिति कालोगोमानीलत्वादित्यादौकालिकेनसाध्यतायांहेतुतायांवाव्याप्तिः हेतुमान्कालःतद्वृत्तिश्चन
गवात्यंताभावः ध्वंसप्रागभाववतितदत्यंताभावानुपगमात् कालस्यगोध्वंसवत्वात् प्रलयपदेतुतस्यव्यभिचारनिरूप
काधिकरणत्वदर्शनार्थम् किंत्वाकाशघटात्यंताभावएवतत्प्रतियोगितानवच्छेदकंचगोत्वमित्यर्थः नवदैशिकविशेष
णतयैवतत्त्वंसतदत्यंताभावयोर्विरोधोनतुकालिकेनेतिवाच्यं प्राचीनैस्तेनापिविरोधस्वीकारात् कालेपिदैशिकेन

वध्वंसस्य हन्त्रिरितिकेचित् नचकालनात्यन्ताभावस्य कालिकेन कालेस्वीकाराद्भवात्यन्ताभावस्य तेन सन्तरां तत्र सत्त्वमादायैव
नातिव्याप्तिरितिवाच्यम् वन्हिमान्धूमादित्यादावव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यनिर्भक्तलक्षणे हेतुसामानाधि·
करण्यपदेन हेतुमति दैशिकेनाभावस्य हन्त्रित्वविवक्षणात् नचकालिकेन गवादेर्व्याप्यहन्तितयात्रत्रिहृपितव्याप्तिप्रति
योगिवैयधिकरण्यघटितत्वस्यैव लक्षणस्य वाच्यतया तत्राऽभावादिति शिसंबंधविवक्षणे प्रयोजनाभावात् कालिकेन वर्त्त
मानेगवाभावमादायैवातिव्याप्तिवारण .... नैवंतत्र हेतुसमानाधिकरणप्रतियोगिव्यधिकरणाभावाप्र·
सिद्धिः तल्लक्षणहन्त्रित्वविशिष्टगोत्वाभावादेस्तथात्वात् संसर्गेति अत्यन्ताभावपदेन संसर्गाभावमात्रविवक्षायामित्यर्थः
तथा च गोत्वावच्छिन्नध्वंसस्य महाप्रलये दैशिकेन हेतुन्नेस्तत्प्रतियोगितावच्छेदकं गोत्वमिति न दोषः यदेति घटएकत्वा
न्स्यंदादित्यत्र कालिकेन स्पंदवति खंडप्रलये वर्त्तमानोऽभावो घटएकत्वावच्छिन्नध्वंसप्रागभावात्मकानसंभवति
तयोः सामान्याभावस्वीकारेपि यत्कध्वंसवति घटएकत्वान्तरप्रागभाववति च काले घटएकत्वावच्छिन्नप्रतियोगिताक
योरसंभवात् किं तु यदीयध्वंसाभावः तत्प्रतियोगितानवच्छेदकमेव घटएकत्वमित्यतिव्याप्तिः तज्जचरमसंयोग
नाशप्यस्य चरमपरमाणुस्यंदस्य घटएकत्वनाशदशायां सत्त्वान्तदा घटएकत्वावच्छिन्नध्वंससंभवान्न दोषस्तत आह यदा
दृष्टेमिति जन्यज्ञानवान् स्पंदवानस्माद्दृष्टादित्यत्र हेतुमति खंडप्रलये जन्यज्ञानत्वावच्छिन्नध्वंसप्रागभावयोरसंभवाडव्याप्ति

ऐं· १००
100

व्याप्तिः ध्वंसाप्रतियोगिनी स्वत्वाभिव्यक्तिर्मुक्तिरिति मतेऽस्य सदुःखत्वनाशादाह दुःखेवेति दुःखवानदृष्टादित्यत्रेत्यर्थः ननु खे
डप्रलये ब्रह्माण्डान्तरवर्तिनो दुःखसंभवादयमपि सदुःखत्वेवेत्यत आह यदायस्येति केचित्तु वरमादृष्टवतिमहाप्रलयाव्य
वहितपूर्वक्षणे दुःखसाक्षात्कारनाश्यदुःखसत्त्वात्तदादुःखत्वावच्छिन्नध्वंसासंभवान्नत्प्रतियोगितावच्छेदकमवदुःखत्व·
मित्यत आह यदायस्येतिवदंति तत्र दुःखसाक्षात्कारेण दुःखवदृष्टस्यापिनाशान्नसदुःखत्वसमानाधिकरणत्वात् काल
स्यैव ज्ञानवान् वैराग्यदृष्टादित्यत्र महाप्रलये तदृष्टज्ञानयोर्योगपद्यान्नाशान्तरानीनन दुःखत्वावच्छिन्नध्वंसो न दुःखत्वसामानाधि
करणः खण्डप्रलये तु तदसंभव एवेति चेत्तत्र ज्ञानतस्य दुःखत्वसामानाधिकरण्यध्वंसप्रतियोगितानवच्छेदकत्वादतिव्याप्तिरि·
त्यर्थः तामेव घटयति खण्डएकत्वादेरिति खण्डप्रलयकालीनध्वंसप्रतियोगितायाः खण्डएकत्वेनावच्छेदके तच्छून्यान्
यत्र खण्डएकवृत्तित्वात् एवं प्रागभावीयापायाश्चपि तस्याः तच्छून्यो यत्र खण्डएकवृत्तित्वात् अत्यन्ताभावस्तु ध्वंसादिमतिका
लेनास्त्येवेति यथोक्तसंसर्गाभावमात्रप्रतियोगितानवच्छेदकत्वाद्दुःखत्वसाध्यतावच्छेदकानामतिव्याप्तिरिति प्रघट्टका
र्थः तत्र तदत्यन्ताभावस्यापेनतोपरिहरति प्रतियोगिमतद्वेवेति गोमत्यपि काले कालिकेन घटाभाववृत्तित्वात् ध्वंसादिमत्य
पि तदत्यन्ताभाववृत्तित्वाबाधकाभावात् प्रलये गौर्नास्तीति प्रतीतेस्तत्साधकत्वात् अन्यथेति ध्वंसादिमति काले तदत्यन्ताभाव
वृत्ताविव्यर्थः कालमात्रेति ननु समवायेन गवाभावस्य दैशिकेन कालिकेन गवाभावस्यात्मादिवृत्तेः कालिकेन कालवृ

त्तिर्नैस्यादित्यर्थात् नचैतेन व्याप्तिः इदानीमात्मनि काले नैगौर्नास्तीति प्रतीतेः न चात्मावच्छेदेन कालधर्मगवाभावो विषयः
कालावच्छेदेनात्मनि तद्विषयत्वमादाय विनिगमनाविरहात् एतेन कालिकसंबंधावच्छिन्नगवाभावस्य कालिकेनापि का
लवृत्तित्वेनास्तीति शंकापास्तवृत्तित्वसाधकमिदंमित्याहुः अन्यथाऽभावस्य हेतुमतिवृत्तौ संबंधविशेषाप्रवेशादतिव्याप्तिशं
कानौचित्यात् ननु कालिकेननवृत्तिकथं दैशिकसंबंधेन कालिकसंबंधावच्छिन्नतदभाव इत्यत आह इयांस्त्विति एकस्येति
प्रतियोगिमत इत्यर्थः देशभेद इति कालिकेन गोमति काले गवानधिकरणदेशावच्छेदेन गवाभावो दैशिकसंबंधेन वर्तत इति
भावः परस्येति ध्वंसादिमत इत्यर्थः स्वरूपावच्छिन्नमिति निरवच्छिन्नमिति यावत् गोध्वंसवति कालेऽनवच्छिन्नदैशिकविशेष
णेनयेव गवाभाव इत्यर्थः ननु कालस्य प्रतियोग्यधिकरणतया तद्वृत्त्यभावस्य प्रतियोगिवैयधिकरण्यमनुपपन्नमतः प्रति
योग्यसामानाधिकरण्यघटितलक्षणस्यावश्यमतिव्याप्तिरत आह तत्कृत्स्नेयेवेति तत्पदं प्रतियोगिपरं तेन गोरहितकाले
कालिकेन वर्तमानो यः कालिकसंबंधावच्छिन्नप्रतियोगिताको गवाभावः स प्रतियोग्यसमानाधिकरणो हेतुसमानाधिकरणो
हेतुसमानाधिकरणश्च प्रतियोगिवैयधिकरण्यघटितलक्षणे हेतुसामानाधिकरण्यघटवृत्तित्वे सत्वे समानाधिकरणं
तत् तत्प्रतियोगितावच्छेदकं च गोत्वमिति नातिव्याप्तिः एवमपरत्रयोऽपि संसर्गाभावविशेष इति नित्यः संसर्गाभाव इत्यर्थः
संसर्गारोपेति यत्राधिकरणे प्रतियोगिसंसर्गारोपजन्या यत्प्रतीतिः स इति प्राचां सिद्धान्तः जन्यतेति नियतोत्तरवर्तित्वरूपत्वात्

ॐ· तद्वदिति तथाचप्रकृतव्याप्तेस्तत्राश्रयतान्नात्माश्रयः नियमांतरस्येति विशिष्टबुद्धिनियामकतद्रूपसंसर्गतत्वादकस्येत्यर्थः तत्रापि
१०१ तद्वदन्यावृत्तित्वनिवेशनात् श्राद्धविसन्तु विवीजस्याद्यपति वदेवतवेति नियमाचदितमेवेति संसर्गावच्छिन्नप्रतियोगिताकाभावत्वद्रू
पे अखण्डोपाधिरूपं वा केचित्तु भेदभिन्नाभावत्वं संसर्गाभावत्वं भेदत्वं तु तादात्म्यावच्छिन्नप्रतियोगिताकत्वमित्याहुः प्रयोजनविर
हइति साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नानधिकरणेहेतुमत्तादृशप्रतियोगितावच्छेदकत्वविवक्षयैव
भेदत्वनिरूपकप्रतियोगितामादायदोषप्रसक्तिविरहात् प्रतियोगिनीति तादात्म्येन साध्यतायां तदवच्छिन्नसंसर्गाभावाप्रसिद्धेः
तादात्म्यसंभेदत्वनिरूपकस्यप्रतियोगितानामवच्छेदकत्वात् नवसाध्यतावच्छेदकसंबंधेनप्रतियोगिसंबंधीयाभावस्यैवं वा
यं प्रयोजनाभावात् प्रतियोगिवैयधिकरण्यप्रविष्टसंबंधकथनाथ्यपूर्वपक्षयतिः अथेति ज्ञानवानद्रव्यत्वादित्यत्रद्रव्यत्व'
सामानाधिकरण्येज्ञानाभावोनप्रतियोगिव्यधिकरणः विषयतयाप्रतियोगिनोज्ञानस्यतत्रवृत्तेः किंतुघटाद्यभावएव तत्प्र
तियोगितानवच्छेदकंचज्ञानत्वमित्यव्याप्तिः अथविषयतायावृत्तिनियामकतानत्संबंधेनज्ञानाधिकरणाप्रसिद्ध्यानेदंदूषणमि
त्यतआह विशेषेति विशेषणतावान्मनोन्यद्रव्यत्वादित्यत्रव्यभिचारनिरूपकाधिकरणंकालदिशावेव पृथिव्यादिपंचकेआत्म
निवसाध्यसत्वात् मनसिचहेतोरेवासत्वात् कालदिशोश्चकालिकदैशिकविशेषणताभ्यांवृत्तिनियामिकाभ्यांसाध्यसत्वात्तत्र
विशेषणताभावस्यप्रतियोगिव्यधिकरणताभावात् अभावांतरमेवतादृशंतत्प्रतियोगितानवच्छेदकंचविशेषणत्वमित्यव्याप्ति ः

गुरु

नचमनसोपिमूर्तत्वेनदिगुपाधित्वेनइतिमनोन्यपदवैयर्थ्यंदिगुपाधीनांदेशत्वावच्छेदकत्वमेवनतदधिकरणत्वं अतःसमवाया
दिनातदधिकरणत्ववैदेशिकसंबंधोभ्युपेयते मनसिचविशेषणतयाइतिप्रतीत्यभावात्तस्यदिगुपाधित्वेनांगीकारस्यहेतुसार्थकत्वात् इ
घटत्वादित्ववदेतेनातदधिकरणेमनस्येवविशेषणताभावस्यप्रतियोगिव्यधिकरणत्वसंभवादतिव्याप्त्यनवकाशात् एवंजन्यमा
त्रस्यकालोपाधित्वान्नभ्युपगममपिदोषवदानार्थंघटत्वान्यत्वादिकंविहायकालदिशोरेवयथाव्यभिचारनिरूपकत्वमायातीतिन
घोक्तं नन्वेवविशेषणतापदेनद्वयोरेकरूपेणप्रतियोगिसामानाधिकरण्येनलभ्यतइत्यतआह जातीति अमेतद्दिकालयोरी
श्वरानतिरिक्तत्वपक्षेस्यसम्बद्धत्वादाह जातीमाहः जातिमान्न्यावत्त्वादित्यव्यभिचारनिरूपकेसामान्यादि तत्राप्येकार्थसमवा
येनसामानाधिकरण्यरूपेणजातिमत्त्वान्नचजात्यभावोनप्रतियोगिव्यधिकरणइतिनघटाद्यभावषट्केतिव्याप्तिः समाधत्ते
प्रतियोगितावच्छेदकेति तथाचोक्तस्थलेषुव्यभिचारनिरूपकाधिकरणेनोसमवायात्मकप्रतियोगितावच्छेदकसंबंधेनइतिवि
शेषणादिरूपप्रतियोग्यनधिकरणत्वेनतेषामपिविशेषणताभावानांप्रतियोगिव्यधिकरणत्वं तत्प्रतियोगितावच्छेदका
विशेषणतादिकमित्तिनातिव्याप्तिरित्यर्थः प्रतियोगिसंबंधितनिवेशफलमाह भवतीदंवमिति प्रतियोगितावच्छेदकेनतादा
त्म्येनप्रतियोगिनीघटादौसंबंधेघटादौघटादिभेदस्याः इतितात् अन्यथाहेत्वः शिंशपायाइत्यादौतादात्म्येनसाध्यतायांघटभेदो
दः तादात्म्येनप्रतियोग्यधिकरणप्रसिद्धेः घटात्यंताभावादेस्तुसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वाभावस्यव्याप्तिः

ॐ.
१०२

स्यात् अथ संयोगी सत्त्वादित्यादावतिव्याप्तिः साध्याभावस्य साध्यवद्वृत्तितया प्रतियोगिसामानाधिकरण्याभावात् तदभावाभावात्
न च संयोगाभावे गुणत्वावच्छेदेन साध्यवद्वृत्तित्वाभावोऽस्त्येव सामानाधिकरण्यस्य साध्यवद्वृत्तित्वादिति वाच्यं एतत्संयोगी एतत्त्वादित्या
दावव्याप्तेः साध्याभावस्य संसर्गीयप्रतियोगिव्यधिकरणत्वात् तत्प्रतियोगितावच्छेदकत्वाच्च साध्यतावच्छेदकस्येत्यत आह त
द्विशिष्टस्यैवेति प्रतियोगिसामानाधिकरण्याभावविशिष्टस्य संयोगाभावस्य हेत्वधिकरणगुणादिवृत्तित्वात्संयोगत्वस्य तत्प्र
तियोगितावच्छेदकत्वान्नाव्याप्तिः उक्तविशिष्टस्य संयोगाभावस्यैतन्मात्राधिकरण इत्याह वृत्तित्वान्न च घटाद्यभाव एव तथा तत्प्र
तियोगितावच्छेदकं च संयोगत्वमिति नाव्याप्तिरपीत्यर्थः ननु प्रतियोगिसंबन्धिवृत्तिभिन्नत्वमेव प्रतियोगिव्यधिकरणत्वं स्यादत आ
ह तद्भिन्नवृत्तित्वेति तत्पदं प्रतियोगिसंबन्धिपरं व्याख्येति संयोगी सत्त्वादित्यादौ संयोगसंबन्धिवृत्तेः संयोगाभावस्य तद्भिन्न
त्वानुपपत्तेः भेदस्य व्याप्यवृत्तित्वात् यथाश्रुतेऽपि दोषमाह अत्र चेति प्रतियोग्यधिकरणवृत्तित्ववतोऽनन्तदभाववत्त्वे गुणे संयो
गाभावे न संयोगवद्वृत्तित्वमिति प्रतीतेर्गुणे च वर्तमानत्वे संयोगतदभावसामानाधिकरण्याभावाधिकरणत्वेन च गुणत्वावच्छे
देन संयोगाभावे संयोगवद्वृत्तित्वाभावस्य सामानाधिकरण्यव्याप्यवृत्तित्वव्यवस्थापनप्रस्तावे ग्रन्थकृता उक्तत्वात् वक्ष्यतीति
यद्वा प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वमपि तदभावविशेषणमिति ग्रन्थेन मूलकृदित्यर्थः ननु गुणे संयोगाभावस्य
प्रतियोगिवैयधिकरण्यावच्छेदकावच्छिन्नत्वे संयोगी द्रव्यत्वादित्यादावव्याप्तिरत आह तच्चेति उक्तावच्छिन्नत्वमित्यर्थः हेत्व

ति गुणत्वस्य द्रव्यत्वरूपहेत्वनधिकरणत्वान्न दोषः अवच्छेदकत्वादिनिवेशेऽग्रे वा दोषाह प्रतियोग्यनधीत्यादि तथा च प्रतियोगि
तावच्छेदकावच्छिन्नानधिकरणं यद्धेत्वधिकरणं तद्वृत्तेरभावस्येति फलितार्थः तेन विशिष्टसत्ताभाववान् जातेरित्यादौ नाति
व्याप्तिः नन्वित्यादि अत्र प्रतियोगितावच्छेदकावच्छिन्नयत्किंचिद्व्यक्त्यनधिकरणत्वं तादृशसकलव्यक्त्यनधिकरणत्वं
येन केनचित्प्रतियोगितावच्छेदकेनावच्छिन्नव्यक्त्यनधिकरणत्वं वेति त्रयो विकल्पाः एकेति कपिसंयोगाधिकरणस्यापि
एतत्त्वाधिकरणस्य कपिसंयोगव्यक्त्यन्तरानधिकरणत्वात् इदं च संयोगसामान्याभाववादिमतेन तस्य संग्रहेत्वेनादाह द्रव्यत्वा
भावान्वेति प्रथमातिव्याप्तिमप्यादयति साध्याभाववदिति साध्याभावः संयोगः तत्प्रतियोगी संयोगसामान्याभाव इव
संयोगविशेषाभावोऽपि तस्य द्रव्ये सत्त्वाद् घटाद्यभावस्य वा प्रतियोगित्वाधिकरणेन तु संयोगरूपः संयोगसामान्याभावाभा
व इत्यर्थः द्वितीयातिव्याप्तिं घटयति नित्यत्वादीति द्रव्यत्वाधिकरणे द्विविधे नित्यमनित्यं च द्रव्यत्वाभावरूपसाध्यस्या
भावो द्रव्यत्वरूपो न प्रतियोग्यधिकरणः अनित्यद्रव्ये नित्यत्वविशिष्टद्रव्यत्वाभावरूपस्यानित्ये वा नित्यत्वविशि
ष्टद्रव्यत्वाभावरूपस्य तत्प्रतियोगिनः सत्त्वात् न च तदभावो नित्यत्वविशिष्टद्रव्यत्वादिरूप एव न तु द्रव्यत्वरूप इति तेन
द्रव्यत्वप्रतियोगितावितिवाच्यं द्रव्यत्वस्य विशिष्टद्रव्यत्वानतिरिक्तत्वस्य इति सकलितार्थः तथा च घटाभावादिरेवाप्यत्रापि
प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तिः तत्प्रतियोगितानवच्छेदकं च संयोगसामान्याभावत्वे द्रव्यत्वाभावत्वे वेत्यतिव्याप्तिः

ऊं. १३ 103

नचैवमभावमात्रस्यतत्तत्त्वागाहनित्वविशिष्टस्याभावरूपप्रतियोगिसामानाधिकरण्यात्प्रतियोगिव्यधिकरणाभावाप्रसिद्धिरे
वात्ररूषणांकुतोनोक्तमितिवाच्यंएवंत्वमात्मस्याकाशाभावस्यतथात्वात् प्राचीनमतेपिसंक्षेत्तत्वलाभार्थम् कृपीति एतद्दृताद
ध्रुवत्वत्रिकालावच्छेदेनगुणसामान्याभावसंबोदतद्दृत्वादिकमपेव्याप्तत्वानुधावने ननुद्रव्यंपसमवायेनमेयसामान्या
भावरूपस्यद्रव्यमात्रसमवे ताभावरूपस्यवसंयोगसंबन्धाभावीयप्रतियोगिनोऽनधिकरणत्वमस्त्येवेतिचेत् सत्यं समवायेन
मेयसामान्याभावाभावस्यसत्ताद्रूपत्वात् द्रव्यमात्रसमवेतत्वाभावाभावस्यद्रव्यत्वात्मकत्वात् समवेतमेयात्वोद्रव्यसम
वेतानोचवहूनोतत्तकल्पनेगौरवात् नवसंयोगहृत्तेतत्तदन्यतरत्वावच्छिन्नाभावस्याभावः संयोगहृत्तेमयस्वरूपः
तत्प्रतियोगिनउक्ताभ्यतरत्वावच्छिन्नाभावस्यानधिकरणत्वेहृत्तेस्त्येवेतिवाच्यं उक्तान्यतराधिकरणत्वाभावस्यैवलाघवेन
प्रतियोगितावच्छेदकत्वात् प्रव्याप्तिंघटयति साध्याभावानामिति गुणसामान्याभावाभावत्वसंयोगस्यदर्शयति गुणा
नामिति संयोगस्यापिगुणत्वादित्यर्थः तत्प्रतियोगितेति गुणत्वकाभावनिरूपितप्रतियोगितायाश्चवच्छेदकेपद्गुणसा
मान्याभावत्वे तदवच्छिन्नस्यगुणसामान्याभावात्मकस्यप्रतियोगिनोनधिकरणमात्माभावस्येवेतितद्दृत्तेः संयोगाभावाभा
वस्यापिप्रतियोगिवैयधिकरण्यात् तत्प्रतियोगितानवच्छेदकत्वेसाध्यतावच्छेदकेनास्तीत्यव्याप्तिरित्यर्थः तृतीयपदमेवा
श्रित्यसमाधत्ते पारशेति इदंचप्रतियोगिताविशेषणं तथाचकपिसंयोगत्वावच्छिन्नाप्रतियोगितायत्संदेनधर्मेनशक्या तद

वच्छेदकेन कपिसंयोगत्वेनावच्छिन्नो यः कपिसंयोगस्तदनधिकरणत्वस्य हेतावेतद्वृक्षत्वादावसत्त्वात् किन्तु यद्धर्मावच्छिन्नैव तद
नवच्छेदकत्वं साध्यतावच्छेदकमिति वाच्योऽदोषः नित्यत्वसहितत्वादिविशिष्टद्रव्यत्वाभावत्वावच्छिन्नप्रतियोगिताया पदेन वक्तुमश
क्यत एव तदवच्छिन्नस्यानित्यत्वसहितत्वादिविशिष्टद्रव्यत्वाभावस्य हेतुमति नित्यत्वादित्वेन द्रव्यत्वाभावाभावस्य प्रतियोगिव्यधिकर
णत्वादिति न द्वितीयः कपिसंयोगाभावत्वावच्छिन्नप्रतियोगिताया पदेन वक्तुमशक्यत्वात् तदवच्छिन्नकपिसंयोगाभावस्यात्म
त्मनि सत्त्वात् किन्तु गुणसामान्याभावत्वावच्छिन्नैव तदनधिवच्छेदकं साध्यतावच्छेदकमस्त्येवेति न तृतीयोपीत्यर्थः नन्वय
द्धर्माश्रयस्यानधिकरणं हेत्वधिकरणं तद्भिन्नसाध्यतावच्छेदकमित्येवास्तु लाघवादुक्तदोषानवकाशश्चेति चेत् सत्यं प्रति
योगितावच्छिन्नस्य मूलेऽकृतत्वान्न दूरोद्धारादेव सत्त्वात् यावदिति साध्यसामानाधिकरण्येत्यर्थः तद्रूपविशिष्टस्य
तद्धर्मावच्छिन्नेन येन केनापि सामानाधिकरण्यमित्यभिन्नेति यावत् साध्याधिकरणे येन संबंधेन हेतोर्हेतित्वानिविष्टरूपा
विशिष्टसमानाधिकरणत्वव्याप्तिप्रभावस्य हेत्वधिकरणवृत्तित्वके हेत्वधिकरणं तेन तेन वै संबंधेन वाच्यं येन संबंधेन च सा
ध्याधिकरणे साध्यसामानाधिकरण्यं निविष्टं तत्संबंधावच्छिन्नप्रतियोगिताया अनवच्छेदकत्वे साध्यतावच्छेदके वाच्य
मित्यर्थः आद्यस्य फलमाह तेनेति अन्यथा समवायेन धूमत्वविशिष्टस्याधिकरणं धूमावयवस्तद्वृत्तिः संयोगेन घटाभाव
तत्प्रतियोगितावच्छेदकत्वस्य वह्नित्वे सत्त्वेपि नाव्याप्तिः विवादितत्त्वं संयोगेन वह्न्यनधिकरणे हेतुस्तस्य साध्यसामानाधिकर

ॐ० १०४
104

णो वृत्तित्वस्य साध्यसामानाधिकरण्ये निविष्टत्वात् संयोगेन वह्न्यधिकरणं पर्वतादिरेव तद्वृत्तित्वस्य संयोगावच्छिन्नप्रतियोगिता
को वह्न्यभावो नायाति किन्तु घटाद्यभाव एवेति न दोषः द्वितीयस्य फलमाह धूमसंयोगीति संयोगेन धूमाधिकरणं पर्वतादि
स्तद्वृत्तिः समवायेन वह्न्यभाव इत्यव्याप्तिः स्यात् विवक्षिते तु संयोगावच्छिन्नायाः पर्वतवह्न्यधिकरणतायाः साध्यसामाना
धिकरण्ये निवेशात् समवायावच्छिन्नवह्न्यभावीयप्रतियोगितायाश्च संयोगावच्छिन्नत्वाभावात् संयोगावच्छिन्नप्रति
योगिताकघटाद्यभाव एव तादृशो लभ्यत इति तत्प्रतियोगितानवच्छेदकत्वस्य वह्नित्वे सत्त्वान्नेति भावः तथा च हेतु
भावयोः सामानाधिकरण्यघटके हेत्वधिकरणे हेतुतावच्छेदकसंबंधावच्छिन्नं विवक्षणीयम् हेतुसामानाधिकर
ण्ये भावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताको ग्राह्य इति तात्पर्यम् नन्वेवं प्रतियोगितावच्छेदकसंबं
धेन यत्प्रतियोगिसंबद्धं तद्भिन्ने हेतुमति वर्तमानस्याभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नायाः प्रतियोगिताया अन
वच्छेदकमिति फलिते तत्र च संबंधद्वयस्य प्रतियोगितासाध्यतावच्छेदकरूपस्य प्रवेशो गौरवम् किंच विषयतादिना सा
ध्यतायामव्याप्तिः वृत्त्यनियामकसंबंधस्य प्रतियोगितानवच्छेदकतया साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताया अ
प्रसिद्धेः इत्यत आह यद्वेति साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबद्धं यद्धेत्वधिकरणं तद्वृत्तित्वमभावस्य प्रतियोगि
व्यधिकरणत्वमित्यर्थः संबंधभेदेनेति साध्यतावच्छेदकसंबंधावच्छिन्नत्वं प्रतियोगितायां न निवेश्यमित्यर्थः धूमाभाव

देः संयोगादिनावच्छिन्नत्वादिसंबंधावच्छिन्नतयानवच्छिन्नस्यापि समवायेन वन्ह्यभावस्य प्रतियोगिव्यधिकरणताभावेनैव वारितत्वात् प्र
तियोगितावच्छेदकसंबंधेन प्रतियोगिनो यत्संबंधितत्संबंधावच्छिन्नत्वरूपप्रतियोगिवैयधिकरण्यविवक्षायां त्वस्यापि तथात्वा
त्तरणाय प्रतियोगिवैयधिकरण्यविवक्षायां त्वस्यापि तथात्वात्तरणाय प्रतियोगिता वाच्या साध्यतावच्छेदकसंबंधा
वच्छिन्नत्वं प्रवेशे विवादितमिति गौरवमिति भावः एवं स्थिते इति यथोक्तप्रतियोगिवैयधिकरण्ये निरुक्तौ सत्यामित्यर्थः सा
मानाधिकरण्यादाविति आदिपदे हेतुभावयोः सामानाधिकरण्यपदादाविति आदिपदे हेतुभावयोः परं संबंधितमिति
अधिकरणत्वस्यान संबंधितमेवमिति विशेषे तदेवाह नत्वधिकरणत्वमिति तथा च साध्यतावच्छेदकसंबंधेन प्रति
योगिसंबंधिनि हेतुतावच्छेदकसंबंधेन हेतुसंबंधिवर्तमानस्याभावस्य प्रतियोगितायाऽनवच्छेदकं यत्साध्यतावच्छेद
कं साध्यतावच्छेदकसंबंधेन तद्वत्त्वं धर्मिणि व्याप्तिरित्यर्थः धर्मिणः इति धूममद्दादेर्व्याप्तिरित्यर्थः तेन वन्हिमद्दादेर्व्यापकत्वे वेत्य
र्थः तदेव स्पष्टयति तथा हीत्यादिना एवमिति धूमवद्दादेर्वन्ह्यादिव्याप्यत्वे वन्हिमद्दाद धूमादिव्यापकत्वेनेत्यर्थः अत्र ध
र्मिणो धर्मव्याप्यत्वे प्रमाणसंवादमाह अत एवेति जलादेर्व्यापकः पृथिवीत्वाभाववान्नतु इति तदभावात्मके न पृथिवीत्वाभा
वो त्वान् इति तदभावात्मके न पृथिवीत्वेन जलपृथिव्योरन्योन्याभावोऽप्रसिद्ध एव व्याप्तिः इतीतिग्रन्थदर्शनादित्यर्थः विशेष
णताविशेषेण पृथिवीत्वाभावसंबंधिनि जले वर्तमानस्यान्योन्याभावस्य प्रतियोगितानवच्छेदकं यत् जलत्वं तद्वत्त्वि

उौं· नस्यजलस्यतादात्म्येनसंबंधित्वेजलेविशेषणताविशेषेणपृथिवीत्वाभावस्यसंबंधित्वात् नन्वेवंजलस्यतादात्म्येन
व्याप्यत्वेपृथिवीत्वाभावरूपव्यापकनिवृत्त्यापृथिव्यांजलादेरेवाभावःसिद्ध्येन्नतुजलत्वादेरित्यतआह यथाचेति व्याप्य
१०५ तावच्छेदकसंबंधेनहेतोः पक्षवृत्तित्वज्ञानेव्यापकतावच्छेदकसंबंधेनपक्षेव्यापकस्यानुमितिरित्यर्थः आद्यस्यफलमा
105 ह तेनेतिसंयोगेनधूमस्यव्याप्यत्वग्रहेतस्यसमवायेनधूमावयववृत्तित्वज्ञानाद्धूमावयवेवसंयोगेनवह्न्यनुमितिरित्य·
र्थः द्वितीयस्याह नचेति उक्तस्थलेधूमस्यसंयोगेनपर्वतवृत्तित्वग्रहेतत्रसमवायेनवह्न्यनुमितिर्नेत्यर्थः प्रकृतमा
ह तथैवेति व्यापकतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकव्यापकाभावेनव्याप्यतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकस्यव्याप्याभावस्यसिद्धिनियमात् विशेषणताविशेषावच्छिन्नप्रतियोगिताकेनपृथिवीत्वाभावेनव्या·
प्यतावच्छेदकतादात्म्यसंबंधावच्छिन्नप्रतियोगिताकोजलाभावःसिद्ध्यतुनत्वत्यन्ताभावसाधकसामग्रीमर्यादयैवान्यो
न्याभावःसिद्ध्यति यत्तुजलत्वादेःसमवायेनव्याप्यत्वंगृहीतंतेनतत्तेनजलत्वाभावएवसिद्ध्यतीत्यर्थः तदेवोपपादय
ति कथमिति धूमावयवेसंयोगेनवह्न्यभावात्तत्रसंयोगावच्छिन्नधूमाभावसिद्धिः पर्वतेचवह्न्यभावात्संयोगाव·
च्छिन्नधूमाभावसिद्धिरितिनियमउक्तनियमानंगीकारेनोपपद्यतेत्यर्थः ननुतादात्म्येनजलाभावसिद्धावपिकथ
मन्योन्याभावसिद्धिरतआह सएवेति तादात्म्यावच्छिन्नप्रतियोगिताकाभावस्यैवान्योन्याभावत्वादितिभावः य

र्मिणोर्व्याप्यव्यापकभावे संवादमाह अयमेवेति पर्वोक्तसंबंधितघटितव्याप्तिर्निर्वचनपथेवेत्यर्थः इहेति दत्तादात्म्ये
न शिंशपासंबंधिनोः शिंशपायां वर्तमानस्यान्योन्याभावस्य प्रतियोगितानवच्छेदकेन इहत्वेनावच्छिन्नस्य इहत्वस्य तादा
त्म्येन संबंधित्वात् अधिकरणत्वाग्रर्भव्याप्तौ तत्र इहत्वशिंशपात्वयोरेव साम्यात् ननु इहत्वशिंशपयोः तादात्म्येनाधिक
रणता असिद्धेरित्यर्थः धर्मिणोर्धर्मव्यापकत्वे प्रयोजनमाह अतएवेति यत्र सास्नादीति अत्र व्याप्यतावच्छेदकसंबंधः
समवायः व्यापकतावच्छेदकं तादात्म्यं समवायेन सास्नादेः पक्षहेतुत्वग्रहे तादात्म्येन गोसिद्धिः तादात्म्येन गवाभा
वाभावरूपव्यापकनिरूपिता च समवायावच्छिन्नसास्नाद्यभावसिद्धिरित्यर्थः समवायेन सास्नादिसंबंधिनि गवि वर्तमानस्य
न्योन्याभावस्य प्रतियोगितानवच्छेदकेन गोत्वेनावच्छिन्नस्य गोस्तादात्म्येन संबंधिनि गवि समवायेन सास्नायाः संबंधि
तादिति व्याप्तत्वं योज्यं न च गोत्वत्वेनानुपस्थिते गोत्वे प्रतियोगितानवच्छेदकत्वग्रहो न उपपन्नः गोत्वे सास्नादिसमानसं
बंधिकाभावप्रतियोगितानवच्छेदकमिति ज्ञानस्य धर्मितावच्छेदकावगाहित्वनियमात् सत्यं लौकिकप्रत्यक्षे तथात्वे
प्यलौकिकस्य तस्य निर्धर्मितावच्छेदकत्वस्याप्युपपत्तेः अथैवं तत्सास्नादियत्के यत्र हेतुत्वं तत्र प्रतियोगपक्षहेतियोर्हेतु
मत्त्रिष्ठाभेदस्य तत्प्रतियोगिसाध्यकत्वमेव व्याप्तिः साध्यादिभेदेन तद्भेदात् तत्र गवि प्रतियोगित्वमेव ग्राह्यं ननु
गोत्वे प्रतियोगितानवच्छेदकत्वं तद्गोत्वत्वाग्रहेऽप्युपपन्नं प्रकृतलक्षणं सानवच्छेदकत्वघटितत्वेऽपि तादात्म्य-

दी०
९९
106

नव्याप्तिप्रतिपादनमात्रेणतद्ग्रंथस्यतात्पर्यमित्याह॥ सएवेति हेत्वधिकरणेत्यपहायहेतुसंबंधाधीत्युक्ताविस्यर्थः गगनादे
रिति अवृत्तित्वस्यापीत्यर्थः संयोगेनगगनसंबंधिनिद्रव्येवर्तमानस्यसमवायावच्छिन्नाभावस्यप्रतियोगितावच्छेदकेनद्र
व्यत्वेनावच्छिन्नस्यद्रव्यत्वस्यसमवायेनसंबंधिनिद्रव्येगगनस्यसंयोगेनसंबंधित्वमस्तीत्यर्थः वृत्तिनियामकत्वेनएवद्रव
च्छिन्नाधारताधेयताबत्वं गगनादिसंयोगश्चनतथा तेनघटादिर्गगनवानितिव्यवहाराभावात् अतएवचघटेपटवा
नित्यादिर्नव्यवहारः इतितादात्म्यमपिवृत्त्यनियामकं घटोनास्तीत्यादौआधेयत्वावच्छिन्नएवसंयोगादिः प्रतियोगिताव
च्छेदकः संयोगमात्रस्यतथात्वेपिप्रकृतेतोपपत्तेः वृत्तिनियामकस्यापिप्रतियोगितानवच्छेदकत्वेतद्व्यत्ववानागगनादित्या
दौसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितायाअप्रसिद्ध्यापत्तेः तथाचप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसंबंधिप
तद्भिन्नहेतुमतिवृत्तित्वस्याभावविशेषणत्वपक्षेप्रतियोगितायांसाध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशान्नदोषइत्युक्ताद्वि
तीयपक्षेवृत्तिनियामकसंबंधस्यप्रतियोगितानवच्छेदकत्वपक्षेगगनादेः पृथिवीत्वव्यापकत्वस्याप्युपपत्तिरित्याह साध्य
तेति तत्रप्रतियोगितायांसाध्यतावच्छेदकावच्छिन्नत्वनिवेशनप्रयोजनाभावस्योक्तत्वात् ननुघटादावुत्पत्तिकालावच्छेदेन
संयोगेनगगनाभावसत्वाद्गगनस्यपृथिवीत्वव्यापकत्वमनुपपन्नमतआह तदभाववत्तोपीति तदभावस्यप्रतियोगिव्य
धिकरणत्वेनेत्यर्थः॥ तत्संबंधित्वादिति गगनादिसंबंधित्वादित्यर्थः तथाचगगनवान्द्रव्यत्वादित्यत्रवृत्त्यनियामकसंयोगेन

साध्यतावच्छेदकसंबंधेन प्रतियोगिनाऽगगनेन हेतुमतः पृथिव्यादेः संबंधिताऽगगनाभावो न तत्र प्रतियोगिव्यधिकर
णः गुणादेस्तु हेत्वधिकरणत्वमेव नास्ति तेन तादृशाभावो घटादेरेवाभावः तत्प्रतियोगितानवच्छेदकेन गगनत्वेना
वच्छिन्नस्य गगनस्य तादृशसंयोगेन संबंधिनी पृथिव्यादौ पृथिवीत्वस्य संबंधिताऽगगनादेः पृथिवीत्वादिव्यापकत्वाप
त्तिः तथैवेति वृत्तिनियामकेत्यर्थः एवकारव्यावर्त्यमाह नत्विति तत्र हेतुमाह तेनेति वृत्तिनियामकसंयोगेनेत्य
र्थः असंबंधित्वादिति उक्तप्रतियोगितानवच्छेदकावच्छिन्नस्य गगनस्य वृत्तिनियामकसंयोगेन संबंधित्वाभावादित्य
र्थः येन संबंधेन साध्यवन्निरूततावच्छेदकसंबंधेन हेतोः संबंधित्वे तेनैवानुमितौ साध्यभानमिति नियमात् ननु वृ
त्तिनियामकसंयोगेन साध्यतायामपि तेनु गगनाभावो न प्रतियोगिव्यधिकरणस्तेन गगनादिसंबंधितोऽप्रसिद्धे
किंतु घटाद्यभाव एव गगनादेश्च तदप्रतियोगितात्वेन नियामकसंयोगिनापि तस्य पृथिवीत्वव्यापकत्वं स्यादत आह
व्यक्तिभविष्यतीवेति खंडशः प्रसिद्धाः तादृशगगनाद्यभावस्यापि प्रतियोगिव्यधिकरणत्वस्य सत्त्ववत्त्वादित्यर्थः तदेव
निर्वक्तुं पूर्वपक्षयति नन्विति महाकाललाभाय आत्मकेति खंडकालसाधारणस्य कालत्वादिहेतोर्वारणाय मा
त्रेति क्रियादिरूपकालखंडे अतीतादिना तदभावस्य प्रतियोगिव्यधिकरणत्वसंभवात् विशेषणतेति कालिके
नेत्यर्थः तथा च घटवान्कालपरिमाणादित्यादौ कालिकसंबंधेन घटादिः कालपरिमाणव्यापको न स्यादित्यस्या

उ॰ १८

107

त्तेः व्याप्यवृत्तिमेयत्वादिसाध्यकप्रतियोगिवैयधिकरण्यानुपादानादाह अव्याप्यवृत्तीति मेयत्वस्य वाव्याप्यवृत्तित्वं
न संभवति प्रतियोगिमतोपि देशस्य प्रतियोग्यनधिकरणत्वानुपादानादाह अव्याप्यवृ कालावच्छेदेन दैशिकसंबं
धावच्छिन्नतदभाववत्त्वं यथा संभवति तथा प्रतियोगिमतोपि कालस्य प्रतियोग्यनधिकरणदेशावच्छेदेन कालिकाव
च्छिन्नतदभाववत्त्वस्यात् मेयत्वानधिकरणत्वस्य वाप्रसिद्ध्या तथात्वानुपपत्तेः कालिकेन मेयत्वानधिकरणस्यात्मादेः
सत्त्वेपि इदानीमात्मनि मेयत्वमिति प्रतीत्या आत्मावच्छेदेन कालमेयत्वसिद्ध्या आत्मावच्छेदेनैव तदभावानुपपत्तेः नवेदा
नीमात्मनि कालिकेन मेयत्वं नास्तीति प्रतीत्यात्मावच्छेदेनेन कालेमेयत्वाभावोपि सिद्ध्यतीति वाच्यं पूर्वोक्तप्रतीतिव
लादैतत्कालावच्छेदेनात्मनि मेयत्वाभावस्यैवैतत्प्रतीतिविषयत्वकल्पनात् नचैतदवरोधात्तस्याप्यैतत्कालावैतत्
कालावैतत्कालावच्छेदेनात्मनि प्रमेयत्वावगाहित्वमस्तु विनिगमकाभावादिति वाच्यं तथाप्येतस्याप्येतत्कालावच्छे
देनात्मनि मेयत्वाभावस्यैवविषयो न तत्तात्मावच्छेदेन कालमेयत्वाभावो विनिगमकाभावात् इदानीं प्रमेयत्वं इदानी
कालिकसंबंधावच्छिन्नमेयत्वाभावश्चावच्छेदकानवगाहि प्रतीत्या मेयत्वतदभावयोः कालिकेन कालवृत्तित्वसिद्धेः
नन्वेवमपि कालिकावच्छिन्नमेयत्वाभावस्य कालिकेन कालेवृत्तित्वात्तद्धारणाय प्रतियोगिवैयधिकरण्ये निवेश्यमि
तिवाच्यम् व्याप्यवृत्तिसाध्यके हेत्वधिकरणेऽभावस्य दैशिकतया वृत्तित्वस्य प्रवेशादेव तद्धारणात् प्रतियोगितावच्छे

दकसंबंधेन प्रतियोग्यसंबंधितनिवेशपदेऽप्रसिद्धिमाह स्वावच्छेदकेति कालिकासंबंधावच्छिन्नप्रतियोगिता
कस्य घटाद्यभावस्य कालवृत्तित्वाभावात् संबंधांतरावच्छिन्नस्य च समवायः तत्र प्रतियोगितावच्छेदकेन संयोगादि
संबंधेन प्रतियोग्यसंबंधिनि काले वर्तमानस्याभावस्य साध्यतावच्छेदककालिकसंबंधावच्छिन्नप्रतियोगिताया
अप्रसिद्धेः साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधितनिवेशपदेऽप्यप्रसिद्धिमाह तेनेति साध्यतावच्छेदकेना-
कालिकेनेति यावत् कालिकेन घटादिसंबंधितावत्कालस्य तद्वृत्तित्वाभावात् अन्यस्य च देशेनाधिकरणत्वात् कालि
केन घटादिसंबंधिभिन्नस्य हेतुमतोऽप्रसिद्धेः अथ महाकालान्यत्वविशिष्टघटाभाव एतादृशः प्रसिद्धः विशिष्टाधि
करणताया विशेषणविशेष्योभयवत्त्वेनैव स्वीकारात् महाकाले वाभावीयविशेषणतया महाकालान्यत्वाभावात् तद्वि
शिष्टघटत्वावच्छिन्नाधिकरणताया अप्यभावात् प्रतियोगितावच्छेदकेन साध्यतावच्छेदकेन च कालिकसंबंधेन
प्रतियोगिनो महाकालान्यत्वविशिष्टघटस्य विशिष्टधीविरहकालस्य तद्वृत्तित्वेऽपि तदधिकरणे महाकालस्य तद्वृत्ति
त्वरूपस्य प्रतियोगिव्यधिकरणत्वस्य महाकालान्यत्वविशिष्टघटाभावे सत्त्वात् न च महाकालमात्रवृत्तिविशेष-
णतया साध्यताया विरहकालीनत्वेन संबंधेन प्रतियोगिसंबंधीति वाच्यं तत्र मानाभावात् इदानीं घट इत्यादिप्रती
तौ महाकालावच्छिन्नाकिंचिदवच्छिन्नो महाकालो वा विषय इत्यत्र विनिगमनतयोभयस्यापि विषयत्वात् मैवम् तथा

डों० १०८

108

पितद्वह्नि निरूपितसंयोगेनसाध्यतायांतद्रूपसंयोगेनधूमेहितावत्वाभेस्य तद्वह्नीयसंयोगेनप्रतियोगिसंबंधिन
स्तद्वह्निभिन्नस्याप्रसिद्धेः तादृशेति प्रतियोगितावच्छेदकेनसाध्यतावच्छेदकेनैवावच्छिन्नस्ययत्किंचिद्वृत्तेरधिकर
णेहतित्वस्योऽभावत्वत्प्रतियोगिसामान्यकत्वेनतदित्यर्थः तेनप्रकृतेसंयोगादितावदाद्यभावः प्रतियोगिव्य
धिकरणः प्रसिद्धइतिनाव्याप्तिः अत्रहेतीति अभेदेनगगनादिविशेषणे कालिकसंबंधावच्छिन्नस्यहेतोरधिकरणे
महाकालेहतित्वस्ययोभावस्तद्वत्त्वस्यगगनाद्यभावप्रतियोगिनिगगनादौसत्वादित्यर्थः तादृशपदेनकृतायाः सं
बंधविशेषविवक्षायाः फलमाह सत्वादीति संबंधाविवक्षायां ज्ञानवान्सत्वादित्यत्रज्ञानाभावोऽकप्रतियोगिव्यधि
करणः सत्वाधिकरणेष्ठुसर्वत्रविषयतयाज्ञानसत्वात् इत्यतिव्याप्तिः विवक्षायांतुसमवायेनज्ञानाभावस्यहेत्वधि
करणेआत्मभिन्नेसत्वात्तत्प्रतियोगितान्ज्ञानसंबंधेनज्ञानसत्वात्सापिप्रतियोगिव्यधिकरणस्तत्प्रतियोगितावच्छेदकं
चज्ञानत्वमितिनदोषः ननुयद्यपिआत्मनिसमवायेनपृथिव्यादिवत्वद्येमनसिकालदिशोर्गुणकर्मणोश्चयथा
संभवेकालिकदैशिकविशेषणताभ्यांज्ञानमस्तितथापिनस्याकाशादेर्विषयत्वकिंचिद्वृत्तेरधिकरणेहतित्वाभावो
स्त्येव विषयतायाह्मनियामकत्वात् अतः संबंधाविवक्षायामपिज्ञानाभावस्यप्रतियोगिवैयधिकरण्यसत्वल
भमेवेतिनातिव्याप्तिरतआह संयोगीवेतिसंयोगीसत्वादित्यत्रद्रव्यमात्रेसंयोगस्यसमवायेनसत्वाद्गुणकर्मणोश्चका

६६,५४

लिकेनेति संयोगाभावेन प्रतियोगिव्यधिकरणः किं त्वभावान्तरमेवेत्यतिव्याप्तिः ननु नित्यगुणे कालिकेनापि संयोग
स्याहृत्तित्वाद्यत्किंचिद्वृत्त्यनधिकरणाहृत्तिप्रतियोगिकत्वं संयोगाभावस्येति नोक्तदोष इत्यत आह आदीति संयोगिगुण
त्वतविशिष्टसत्त्वादित्यत्र नित्यगुणस्य हेत्वनधिकरणत्वादत्र च संयोगस्य सत्त्वात् संयोगाभावस्य प्रतियोगिव्यधिकरणता
भावादुक्तक्रमेणातिव्याप्तिरित्यर्थः अत एव कर्मादाविति कर्मगुणाद्याहत्य हेतोस्तेन विवादितत्वात् समवायेन हेत्वधि
करणाहृत्तित्वसामान्याभावस्य संयोगोऽभावे धिकर्मादिहृत्यत्किंचिद्वेत्वधिकरणाहृत्तिताभावसत्त्वादिति यथोक्तप्रतियो
गिव्यधिकरणे संयोगाभावे तिनातिव्याप्तिरिति यत्किंचिदित्यत्र विशेषफलमप्युक्तमित्यर्थः केचित्तु ज्ञानवान्सत्त्वादि
त्यनेन तादृशसंबंधेनेत्यस्य संयोगीसत्त्वादित्यनेन च यत्किंचिदित्यस्य फलमतिव्याप्तिवारणरूपं दर्शितमित्याहुः प्रतियो
गितावच्छेदकविशिष्टेत्यस्य फलमाह मूर्त्तत्वेति मूर्त्तत्वमूर्त्तत्वोभयवान्मूर्त्तत्वादित्यत्र मूर्त्तत्वमूर्त्तत्वोभयत्वावच्छिन्नाभा
वस्य प्रतियोगियन्मूर्त्तत्वं तस्य मूर्त्तत्वेहृत्यहेत्वधिकरणव्याप्तिमात्रे सत्त्वाद भावान्तरमेव प्रतियोगिव्यधिकरणमित्यतिव्या
प्तिः उक्तविवक्षायां तूभयत्वरूपप्रतियोगितावच्छेदकविशिष्टं मूर्त्तत्वं मूर्त्तत्वं चेति द्वयमेव तस्य च हेत्वधिकरणमनासि
हृत्तित्वाभावसत्त्वात् सोपि प्रतियोगिव्यधिकरणस्तत्प्रतियोगितावच्छेदकं चउभयत्वरूपं साध्यतावच्छेदकमिति न दोषः
नन्वेतदर्थं प्रतियोगितावच्छिन्नप्रतिवेशणम् उभयाभावीयप्रतियोगितायाव्याप्तमहृत्तित्वस्वीकृत्य एतसाध्यस्य तदवच्छिन्न

3

ॐ
१५
109

त्वावगणसंभवात् तत्राह अविशिष्टसत्त्वेति विशिष्टभावीयप्रतियोगितायाः विशेष्यमात्रवृत्तितात्सत्त्वस्यैव तदवच्छिन्नता
त् सत्त्वस्य च जात्यधिकरणे सर्वत्र वृत्तितया तदभावस्य प्रतियोगिव्यधिकरणत्वेनास्ति किंत्वभावांतरस्यैवेति गुणकर्मान्यत्ववि
शिष्टसत्ताभावात् जातेरित्यत्रातिव्याप्तिः विवक्षायां तु प्रतियोगितावच्छिन्नाया विशिष्टसत्ताया हेत्वधिकरणे गुणादावभावात्
तद्वृत्तिताभावे विशिष्टसत्तात्वावच्छिन्नाभावप्रतियोगिनी अस्तीति सोपि प्रतियोगिव्यधिकरण इति न दोष इत्यर्थः सामान्य
पदस्य फलमाह संयोगसामान्येति संयोगिद्रव्यत्वादित्यादौ यत्किंचित्संयोगस्य यत्किंचिद्द्रव्यावृत्तित्वेन सत्त्वात्संयोगाभावो
पि प्रतियोगिव्यधिकरणः स्यात् तत्प्रतियोगितावच्छेदकं च संयोगत्वमित्यव्याप्तिः सामान्यपदोपादाने तु कस्यचित्संयोग
स्य द्रव्यमात्रेऽव्यापकत्वात् हेत्वधिकरणे यत्किंचिद्द्रव्यत्वाभावः संयोगसामान्यस्य नास्तीति तस्य प्रतियोगिव्यधिकर
णाभावान्न दोषः विशिष्टसाध्यकातिव्याप्त्या यथोक्तप्रतियोगिव्यधिकरणं दूषयति विशिष्टस्येति तथा च विशि
ष्टसत्तात्वरूपप्रतियोगितावच्छेदकविशिष्टस्य सत्तात्वरूपस्य प्रतियोगिनो हेत्वधिकरणे सर्वत्र सत्त्वादभावांतरमेव प्रतियो
गिव्यधिकरणमित्यतिव्याप्तिरित्यर्थः ननु यत्किंचिद्धेत्वधिकरणीयाधेयतानवच्छेदकप्रतियोगितावच्छेदकत्वं वाच्यं तथा च गु
णादिवृत्तितानवच्छेदकं विशिष्टसत्तात्वरूपं प्रतियोगितावच्छेदकमस्त्येव तदवच्छिन्नाधिकरणतायाः गुणादावभावादि
ति विशिष्टसत्तात्वावच्छिन्नाभावस्य प्रतियोगिव्यधिकरणत्वान्नातिव्याप्तिः अत आह समवायेनेति यद्वा विशिष्टस्यातिरि

क्तपक्षेऽपि दोषमाह समवायेनेति जातिमात्रस्येत्यादिस्तत्र जातेरभावो न प्रतियोगिव्यधिकरणः द्विविधे हि मेयत्वाधिकरणे
जातिमद्व्यक्त्यादि तद्भिन्ने सामान्यादि तत्र जातिमति जातित्वावच्छिन्नाभावो नास्त्येव जातिशून्ये च समवायेन वृत्तित्वमप्रसि
द्धम् अतोऽभावांतरमेव तथा तत्प्रतियोगितानवच्छेदकं च जातित्वमित्यतिव्याप्तिरिति प्रघट्टकार्थः अव्याप्यवृत्तिसाध्य
केऽप्यतिव्याप्तिमाह संयोगादीति यद्वा जातेर्व्याप्यवृत्तित्वात्तत्साध्यके प्रतियोगिवैयधिकरण्यं न निवेश्यमत आह सं
योगादीति संयोगी गुणकर्मान्यत्वादित्यत्र व्यभिचारनिरूपकं सामान्यादि तत्र साध्यतावच्छेदकसमवायसंबंधावच्छिन्न
वृत्तित्वमप्रसिद्धं द्रव्ये च समवायेन संयोगस्य वृत्तित्वमेवेति संयोगाभावस्य प्रतियोगिव्यधिकरणत्वं नास्ति किंत्वभावां
तरस्यैवेति उक्तरीत्यातिव्याप्तिरिति फलितार्थः साध्यतावच्छेदकसंबंधेन प्रतियोग्यसंबंधिनि हेतुमति वृत्तित्वरूपं द्वितीय
पक्षमाकाशाभावसाधारण्येन लक्षयति साध्यतावच्छेदकेति नन्वेवं तत्स्थाने प्रतियोगितावच्छेदकेति निवेश्य प्रथमपक्ष
स्यापि निरुक्तिसंभवात्कथमेतस्य विभाग इति वाच्यम् तस्याग्रे निर्वाच्यत्वात् न च साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्य पृथक
निवेशे गौरवादिति केचित् तादृशेति प्रतियोगितावच्छेदकविशिष्टस्येत्यर्थः तथा च साध्यतावच्छेदकसंबंधेन सामान्ये य
दभावीयप्रतियोगितावच्छेदकविशिष्टप्रतियोगिकत्वयत्किंचिद्धेत्वधिकरणानुयोगिकत्वे चैतेतदुभयाभावः सोऽभयप्रति
योगिव्यधिकरण इत्यर्थः अत्र यत्किंचिद्धेत्वधिकरणानुयोगिकसाध्यतावच्छेदकसंबंधे यथोक्तप्रतियोगिकत्वाभाव इत्युक्ते

उ॰ ११० 110

सत्तावान्मेयत्वादित्यत्रातिव्याप्तिः द्रव्याद्यनुयोगिकसमवायेसत्ताप्रतियोगिकत्वसत्त्वात् सामान्याद्यनुयोगिकसम
वायस्य वा ऽप्रसिद्धेः यथोक्तप्रतियोगिकसाध्यतावच्छेदकसंबंधे यत्किंचिद्धेत्वधिकरणानुयोगिकत्वाभाववत्त्वस्योक्तेऽपि घ
टवान्कालपरिमाणादित्यत्राव्याप्तिः आकाशाभावो ह्यत्र प्रतियोगिव्यधिकरणो वाच्यः आकाशप्रतियोगिकालिकसंबं
धस्य वा ऽप्रसिद्धेः घटादिप्रतियोगिककालिकसंबंधे च हेत्वधिकरणमहाकालानुयोगिकत्वसत्त्वादित्युभयाभावानुधा
वनम् अस्तिच कालिकसंबंधसामान्ये आकाशप्रतियोगिकत्वंमहाकालानुयोगिकत्वं चेत्युभयाभाव इति नाप्रसिद्धिः
हृदपर्वतसंयोगे वह्न्यभावप्रतियोगी यो वह्निस्तत्प्रतियोगिकत्वे हेत्वधिकरणयत्किंचिद्व्यक्त्यनुयोगिकत्वोभयाभावस
त्वाद्वह्न्यभावोऽपि प्रतियोगिव्यधिकरणः स्यात् तत्प्रतियोगितावच्छेदकं च वह्नित्वमित्यव्याप्तिः स्यादत उक्तं सामान्यप्रति
वह्निपर्वतसंयोगे तदभावान्न दोषः धूमपर्वतसंयोगे वह्निमदनुयोगिकत्वधूमप्रतियोगिकत्वोभयसत्त्वाद्धूमाभावोऽपि प्र
तियोगिव्यधिकरणो न स्यादित्यतिव्याप्तिरत आह यत्किंचिदिति तेनायोगोलकानुयोगिकत्वाभावप्रयुक्तोभयाभावसत्त्वेऽपि
ति न दोषः अयोगोलकादिकं तत्तद्व्यक्तित्वेन यत्किंचित्पदेन धर्तव्यम् अन्यथा सर्वस्यैव यत्किंचित्त्वेन यत्किंचिदनुयोगिकत्वसा
मान्याभावानुपपत्तेः पर्वतीयवह्निप्रतियोगिकत्वमहानसानुयोगिकत्वोभयाभावस्य वह्निप्रतियोगिकत्वं तत्क्षणवृत्ति
त्वमहानसानुयोगिकत्वं चेत्येतदुभयाभावस्य संयोगसामान्ये वह्न्यभावस्यापि प्रतियोगिव्यधिकरणत्वप्रसंगादव्याप्तिवा

रणाय सामान्येनाश्रयेणोक्तौ नन्वेतज्ज्ञानवानुद्भवत्त्वादित्यत्र ज्ञानाभावस्य प्रतियोगिव्यधिकरणत्वेन स्यात् समवायसामान्ये-
ज्ञानप्रतियोगिकत्वसत्त्वात् समवायसामान्ये ज्ञानप्रतियोगिकत्वसत्त्वात् समवायस्य विषयतया ज्ञानसंबद्धत्वात् मैवं
संबंधनिरूपितताया विलक्षणप्रतियोगिताया उक्तत्वे निवेशनात् विषयतारूपाया ज्ञानीयप्रतियोगितायास्तथात्वाभावात् एव
मनुयोगितायामधिकरणत्वादिकमाह स्वरूपसंबंधेन रूपसंबंधरूपायाश्चात्मा ग्रन्थ्यां जातिमान् मेयत्वादित्यादौ जातिसमवा-
यस्य हेत्वधिकरणध्वंसादौ कालिकेन वृत्तित्वादित्याशयः मेयत्वरूपहेत्वधिकरणसमभावादितदनुयोगिकत्वस्य विशेषण-
तायां प्रसिद्धस्य समवाये विरहात् यन्निष्ठसंसर्गतानिरूपिता यद्विशिष्टप्रमा यत्र भवति तन्निष्ठैव विशिष्टस्य तत्संबंधानुयो-
गित्वस्य स्वीकारात् ध्वंसादिविशेष्यकसमवायसंसर्गकजातिप्रकारकज्ञानस्य प्रमात्वाभावेन तत्र तदनुयोगिकत्वाभा-
वात् ध्वंससंयोगादिकरणत्वरूपस्य ध्वंससंयोगानुयोगिकत्वस्याभावात् गोलकादौ कालिकेन सत्त्वाच्च हेत्वधिकरणे यत्-
किंचित्त्वप्रवेशस्य फलमाह यथेति गोलकेति निरुक्तपदोक्तस्य प्रतियोगितावच्छेदकविशिष्टत्वस्य फलमाह चैत्रा-
न्येति चैत्रान्यत्वविशिष्टेन दण्डवान् चैत्रान्यत्वविशिष्टदण्डवान्वा यत्तद्दण्डादित्यत्र यमतिव्याप्ति चैत्रदण्डसंयोगे दण्डप्रतियो-
गिकत्वसत्त्वात् प्रतियोगिव्यधिकरणत्वेनाप्यस्तीत्यभावान्तरमेवेतीदृशमिति तत्प्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेद-
केऽसत्त्वात् विवक्षायां तु प्रतियोगितावच्छेदकचैत्रान्यत्वविशिष्टदण्डत्वरूपप्रतियोगिकत्वाभावसत्त्वान्नेत्यर्थः यत्तद्दण्डा-

धिकरणप्रकृष्टानुयोगिकत्वस्य तत्र सत्त्वेऽपि तत्प्रतियोगिकत्वाभावप्रयुक्तस्योभयाभावस्य सत्त्वसंभवात् एवं गुणकर्मान्य
त्वविशिष्टसत्तात्वावच्छिन्नप्रतियोगिताश्रयकत्वरूपत्वस्य सत्तादिविशिष्टसत्तात्वावच्छिन्नाभावस्य प्रतियोगिव्यधिकरणता
न्नातिव्याप्तिः न च समवायस्यैव तदुभयसत्त्वमिति वाच्यम् तस्य नानात्वमित्याशयात् द्वितीयकल्पे समवायस्यैकत्वेनेति व
क्ष्यमाणत्वात् यद्वा तदवच्छिन्नस्य समवायत्वसंसर्गः शुद्धस्यातिप्रसंजकत्वात् सत्तावच्छिन्नसमवायेऽभयसत्त्वेऽपि
विशिष्टसत्तावच्छिन्नसमवायेऽभयाभावस्यैतल्लाभात् समवायस्यैकत्वे तु नरश्रेयस्यापि क्वचित् शुद्धसमवायस्य सं
सर्गत्वे क्वचिदवच्छिन्नस्यैवेत्याशयात् स्वरूपेति कालिकेनेत्यर्थः गगनादेः सदातनत्वव्यवहारात् शब्दादिकारणत्वस्य
पूर्ववर्तित्वघटितत्वाच्च इदानीं गगनमित्यादिव्यवहाराच्च तथा च गगनीयकालिकसंबंधे गगनाभावोऽप्रसिद्ध एवे
त्यर्थः निरुक्तेति प्रतियोगितावच्छेदकसंबंधेन यादृशप्रतियोगितावच्छेदकावच्छिन्नानधिकरणमित्यर्थः एता
दृशं यद्वृत्तमत्र विशिष्टाभावीयतादृशप्रतियोगितासामान्ये इत्यर्थः धूमवान्वह्नेरित्यादौ घटाद्यभावप्रतियोगितायां धू
मत्वावच्छिन्नत्वाभावप्रयुक्तोभयाभावसत्त्वादतिव्याप्तिरत उक्तं सामान्य इति तथा च तादृशप्रतियोग्यनधिकरणं हेत्व
धिकरणं संयोगोऽलकं तन्निष्ठसंयोगेन धूमाभावे संयोगावच्छिन्नत्वधूमत्वावच्छिन्नत्वोभयाभावसत्त्वान्न दोषः तेन च द्रव्या
नुकालपरिमाणादित्यादौ संयोगादिना घटाद्यभावीयप्रतियोगितायां कालिकसंबंधावच्छिन्नत्वाभावप्रयुक्तोभयाभा

वद्धर्माभावीयप्रतियोगितानवस्सफलधर्मसहितप्रतियोगितासत्त्वसत्तादभाववद्धर्मभिन्नमेवतदहितत्वरूपमनतिरिक्तत्व-
उं० त्विमेधर्मत्वेस्फीतितत्त्वतदवच्छेदकमात्रायेदोषइत्याशंकाने नवेति तथाविधेति प्रतियोग्यसमानाधिकरणहेतुस
१४ मानाधिकरणेत्यर्थः धर्माभावीयप्रतियोगितासामान्यसत्त्वेवधर्मभिन्नमेव तदहितत्वरूपमवच्छेदकत्वधर्मत्वेस्यैवे
115 तिनातिव्याप्तिरितिभावः स्वप्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावप्रतियोगितासामान्यसत्त्वतस्यप्रसिद्धम्
सर्वत्रैवातादृशप्रतियोगितायाःसत्त्वात् यदितस्यान्यनुहितिताहशप्रतियोगिताकत्वमवच्छेदकत्वउच्यतेतदासाध्यता
वच्छेदकमात्रस्यतथात्वाद्दृष्टिवादेरप्यवच्छेदकत्वापत्तेरसंभवइत्यतउक्तं यत्किंचिदेकेति एकपदंतत्तदभावानांप्रत्ये
करूपेणधारणार्थम् यत्किंचित्पदंतादृशावच्छेदकभेदकूटग्रहणार्थम् तेनप्रतियोगिव्यधिकरणहेतुसमा-
नाधिकरणहेतुसमानाधिकरणतत्तदभावीयप्रतियोगितासामान्यसहितियत्ततत्प्रतियोगिकभेदकूटवत्वे
नावच्छेदकलक्षणंफलति तत्तन्महीमहितततदसीमधीमन्महेन्मताकलतसेवनतधन्यताकः लक्ष्मीधरोयमुदरह
न्मुदेप्रसृतांविश्वेश्वरस्यकृतिरस्यविरस्यलोके ॥

चिन्तामणि विवरणम्

न्याय ~~शिरोमणी~~ पत्रे १४८ श्लोक ४३०० [illegible]